This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३८

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ३८ वर्गांक इतर ~~धर्मशास्त्र~~
नांव - देवालय ग्राम महात्म्य
लेखक/लिपीकार ..... पृष्ठ १३१
काळ शके १८२७ पूर्ण/~~अपूर्ण~~

लेखकाव राजाचे
महात्म्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ देवालयग्राममाहात्म्यप्रारम्भः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूमिका.

ॐ श्रीगणेशदत्तशिवगुरुरेणुकासूर्यश्रीलक्ष्मीव्यंकटेशेभ्यो नमः ॥ ॐ हें व्यंकटेशाचें माहात्म्य देऊळगांवांत देव कशाकरितां आले, कधीं आले, या गांवात तीर्थें कोण कोणतीं, देव कोणचे कोठें आहेत हे सर्व विषय आहेत. या देऊळगांवचे माहात्म्यांत असें व्यासवचन आहे कीं पूर्वी झालेले रामकृष्णादि अवतार हे व्यवहार दृष्टीनें गुप्त झाले, तसा हा व्यंकटेशाचा अवतार व्यवहारदृष्टीनेंही गुप्त नाहीं; कलियुगांतील सर्व जड जीवांच्या उद्धारार्थ प्रत्यक्षस्थित आहे: जसे गणपतीचे अवतार अनेक गुप्त होऊन स्वानंदलोकीं गेले पण श्रीगजानननामक अवतार राजुरामध्येंच राहिला " सदने राजपूर्वके " गणेशपुराणीं उत्तरखंडांत गणेशगीते नंतर हें वाक्य असावें, तसाच बालाजीचा अवतार आहे. श्रीव्यंकटेश पर्वतावरून येथें आले आहेत. या गोष्टीस कलियुगाचा आरंभ व द्वापाराचा अंत हा काल असावा. यावर कोणाची शंका आहे हें माहात्म्य कोणच्या पुराणांत आहे, कारण सर्व पुराणें पाहिलीं दृष्टीस पडत नाहीं म्हणून हें कोणी तरी नवीन केलेलें असावें ही शंका नको; कारण हें माहात्म्य ब्रह्मांडपुराणीं मानसोत्तरखंडामध्यें आहे. याची जुनी प्रत एक फाटकी सांपडली त्या प्रतीवरून एक दोन ठिकाणीं मात्र एक दोन ओळी संबंधास्तव लिहिल्या आहेत. आतां जें ब्रह्मांडपुराण दृष्टीस पडते त्यांत खंडाचा भाग नाहीं हें खरें, परंतु ब्रह्मांडपुराण एकच नाहीं दुसरे तऱ्हेचें ब्रह्मांडपुराण अष्टें येथें रा. रा. गोविंदरावजी लिमये यांचे घरीं पाहिलें. त्यांत मध्यभाग म्हणून आहे, दहा पांच हजार तो ग्रंथ आहे, तरी पुराण पूर्ण नाहीं. तें पुराण तर भागवत द्वादश स्कंधांत बारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हजार संख्येचें आहे, यावरून व प्रभासखंडांतील कांहीं पुराण वर्णन प्रसंगावरून सर्व पुराणें या वराहकल्पांत अठ्ठावीस अठ्ठावीस असावींत, कारण दर द्वापारांत व्यास निराळे व पुराणें करणें व वेदविभाग करणें हें कर्म त्यांचेंच आहे या कल्पांतही अठ्ठाविसावी चौकडी आहे. हीं पुराणें अशीं असावींत याला दुसरी प्रमाणें अग्निपुराण व वाह्निपुराण हीं दोन निराळीं दृष्टी पडतात शिवाय रामविजयामध्यें सुलोचनेचें चरित्र किंवा अहीमहीचें अग्निपुराणीं आहे असें वर्णन आहे, या दोहींतही त्याचें नांव सुद्धां नाहीं. येवढे थोर ईशभक्त ग्रंथकर्ते खोटें लिहीत नसतात. शिवाय अग्निपुराणांतील स्तोत्रें आढळतात तींही यांत नाहींत. व्रतराजादि ग्रंथांमध्यें ब्रह्मपुराणांतील कांहीं श्लोक घेतले, ते ब्रह्मपुराणीं नाहींत. गुरुचरित्रांतील दुसऱ्या अध्यायांतील संदीपकचरित्र ब्रह्मवैवर्तपुराणांतील ह्मटलें आहे. पण तेंही त्यांत नाहीं अशा अनेक कथा आढळतात. ते थोर ग्रंथकर्ते असत्य नव्हेत यावरून पुराणेंच अनेक असावींत त्यांचीं रहस्यें निराळीं आहेतच. ब्रह्मवैवर्तरहस्यांत गुरुचरित्रांतील संदीपकाची कथा आहे यावरून पुराणेंच उपलब्ध नाहींत. महीपतीनें कोणत्या ऐका (भक्तलीलामृत असावा) ग्रंथामध्यें प्रथमाध्यायींच ज्ञानेश्वरादिकांचें वर्णन भविष्यपुराणीं आहे पण ते ग्रंथ पुष्कळ लुप्त झाले असें वर्णिलें आहे. ह्मणून दृग्गोचर ब्रह्मांडपुराणीं नसेल तरी खोटे आहे असें मानणें युक्त नाहीं. आणि या भागांतील तीर्थवर्णनांत लोणार, मेहकर हीं तीर्थें पद्मपुराणीं आहेत. गणेशपुराणीं राजुर आहे आणि हें सर्व प्रसिद्ध श्रीलक्ष्मीव्यंकटेशस्थळ नसावें असें बरें नाहीं ह्मणून व्यासांनीं ब्रह्मांडपुराणीं वर्णन केलें. करवीरमाहात्म्य ७२ अध्याय, बारशीमाहात्म्य हें पाद्मोक्त असें असून त्यांत दृष्टीस पडत नाहीं. थोर ग्रंथांत श्राद्धप्रकरणीं लिहिलेले श्लोक आदि ब्रह्मपुराणांत नाहींत अर्थात् सर्व पुराणें पहाणें आपणा सर्व जनांस होत नसल्यामुळें आपणांस तीं सर्व चरित्रें दृग्गोचर

नसल्यामुळें खोटीं ह्मणावीं लागतात. विचारा अंतीं ईश्वर व्यासानें किती ग्रंथ केले यांत कोठें तरी हें विषय असावेत हें मनांत येऊन फाट्क्या प्रतीवरून हा ग्रंथ लिहिला व हा अद्भुतच समजून देऊळगांवीं श्रीबालाजीची प्रीति व्हावी ह्मणून श्रीबालाजीचे माहात्म्य श्रीबालाजीचे संस्थानाधिकारी माझे परम स्नेही व रक्षणकर्ते व्यंकटराव मुधोळकर हे सुशील असल्यामुळें हें पुस्तक श्रीचे दरबारांत निरंतर राहील या बुद्धीनें त्यांना दिलें आहे. हें पुस्तक अन्य कोठेंही मिळण्याचा संभव नाहीं. जी प्रत सांपडली होती तीही नष्टतुल्य आहे; म्हणून हें माहात्म्य नूतनच समजणें आहे. करितां श्रीव्यंकटेशप्रीतिद पुस्तक देवाचे प्रतिनिधीस दिलें आहे ते याचें रक्षण करोत ही विज्ञापना. श्रीव्यंकटेशार्पणं भवतु. शके १८२७ आश्विनशुद्ध सप्तमी.

सही वक्रतुंड भालचंद्र कवीश्वर,

नरसोबाचे वाडीकर श्रीलक्ष्मीव्यंकटेशाज्ञापालक.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ श्रीगणेशाय नमः ।

अथ देवालयग्राममाहात्म्याध्यायानुक्रमणिका ।

अ०	विषयः	पृष्ठम.
१	मंगलाचरणम् । बालाजीकथाप्रश्नः । देवशर्मब्राह्मणकथा । संततिप्रदहरिद्रागणेशमंत्रः (श्लो० ६७)	.... १
२	पुत्रलाभः । देवशर्मगृहे विधवया कलहोत्पत्तिः कृता । (श्लो० ५२)	.... ४
३	देवशर्मगृहे कलहवृद्धिः । तस्य लक्ष्मीर्गता । स्नुषाद्वय-हरणं पुत्रहरणं च । (श्लो० ७७)	.... ६
४	करविराढने निर्गमः । स्त्रीनाशः । शिवणस्य साधुकृतो-पदेशः । श्रीव्यंकटेशपर्वतं गतः । (श्लो० ५५)	१०
५	देवशर्मतपः । व्यंकटेशः प्रसन्नः यत्र स्मरणं करिष्यसि तत्रागमिष्ये । (श्लो० ५६)	.... १३
६	पुत्रस्नुषास्त्रीलाभः । देवालग्रामे व्यंकटेशा-गमनम् । (श्लो० ९८)	.... १५
७	देवशर्मणः देवलकत्वं न गोसावीति नाम इति वरदा-नम् । (श्लो० २८)	.... १९
८	व्यासजैमिनिसंवादारंभः । व्यंकटेशकथा-महिमा । (श्लो० २४)	.... २२
९	देवाल्यग्रामस्य तीर्थनामानि । एकादशहनुम-द्वर्णनम् । (श्लो० ३१)	.... २३
१०	पूर्वादिक्तीर्थवर्णनम् । इंद्रकथातीर्थम् । (श्लो० ४२)	२४
११	आग्नेतीर्थवर्णनम् । गुग्गुलातीर्थम् । विद्याधरब्राह्मणकथा ।	

॥ श्रीगणेशाय नमः ॥ श्रीरेणुके दत्त शिवगुरो श्रीलक्ष्मीव्यंकटेश जय नमोऽस्तु ॥ अथ देवालयग्राममाहात्म्यप्रारंभः ॥ ॐ महागणपतिं देवं सिद्धिबुद्धिसमन्वितम् ॥ दशायुधैर्विघ्नहरं रत्नकुंभेन रत्नदम् ॥ ॥ १ ॥ प्रणौमि बुद्धिदां देवीं रेणुकां भक्तपालकाम् ॥ दत्तात्रेयं गुरुं शंभुं व्यंकटेशं धरां रमाम् ॥ २ ॥ ऋषय ऊचुः ॥ सूत सूत महाभाग सर्वशास्त्रविशारद ॥ त्वया खलु पुराणानि सेतिहासानि चानघ ॥ ३ ॥ आख्याताप्यत्यधीतानि वेदव्यासप्रसादतः ॥ विष्णोः शिवस्य माहात्म्यं गणेशस्य शिवप्रदम् ॥ ॥ ४ ॥ श्रुतं देवीचरित्रं च सूर्यस्य जगदात्मनः ॥ अवतारकृत्यमेतेषां कथितं बहुशस्त्वया ॥ ५ ॥ कृतत्रेताद्वापरेषु भगवान् परमेश्वरः ॥ अवतारान् बहुविधान् दधार जगतां शिवे ॥ ६ ॥ इदानीं श्रोतुमिच्छामो युगे तिष्ये जनार्दनः ॥ व्यंकटेशोऽभवन्नाम्ना कानि कर्माणि चाकरोत् ॥ ७ ॥ कस्मिन् कस्मिन् स्थले तस्य वासः कथमभूद्भुवि ॥ किं किं कर्म चकारासौ लीलां मानववत्कथम् ॥ ८ ॥ नारायणगिरे-

---

श्रीगणेशाय नमः ॥ श्रीमहागणपतिं । सिद्धिः बुद्धिः तद्भार्ये । सः दशभुजः । तद्ध्यानमुक्तं शिवार्चनचंद्रिकायाम् । रत्नकुंभः शुंडायां ॥ १ ॥ दत्तः गुरुः तेनैवोपदिष्टत्वात् ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चित्रं चरित्रं कथितं त्वया ॥ तत्र देवो रमानाथः चक्रपुष्करिणीतटे ॥ ९ ॥ वसतीति श्रुतं पूर्वमन्य-
स्थानेऽपि भक्तपः ॥ किं तत्स्थानं वद मुने श्रवणेच्छा प्रवर्तते ॥ १० ॥ यस्य नाम्ना महापापी मुच्यते
भवबंधनात् ॥ यस्य दर्शनभावेन सर्वसिद्धिः कलौ युगे ॥ ११ ॥ तच्चरित्रश्रवे कस्य न भक्तिर्जायते कि-
ल ॥ अतस्त्वं वद माहात्म्यं व्यंकटेशस्य सुंदरम् ॥ १२ ॥ इति श्रुत्वा वचस्तेषां मुनीनां भावितात्मनाम् ॥
वक्तुं प्रचक्रमे सूतः प्रहृष्टात्मा हरिं स्मरन् ॥ १३ ॥ सूत उवाच ॥ अखंडं सच्चिदानंदमवाङ्मनसगोचरम् ॥
मायातीतं जगन्नाथं मंगल्यं मंगलावहम् ॥ १४ ॥ प्रणम्य परमात्मानं श्रीनिवासं जगद्गुरुम् ॥ प्रवक्ष्या-
मि कथां पुण्यां मया व्यासमुखाच्छ्रुताम् ॥ १५ ॥ व्यंकटेशसमो देवो न भूतो न भविष्यति ॥ कलौ क
लुषचित्तानां तारकं मंदचेतसाम् ॥ १६ ॥ तस्य देवस्य चरितं वक्ष्यामि शृणुतानघाः ॥ दक्षिणस्यां दि-
शि श्रेष्ठा काशीति प्रथिताभवत् ॥ १७ ॥ यद्यत् तीर्थमभूत्काश्यां तदत्र सर्वमेव हि ॥ महालक्ष्म्याश्च
वसतिस्थानमंतर्गृहं विभोः ॥ १८ ॥ करवीरमिति ख्यातं तत्रासीद्ब्राह्मणो वरः ॥ गार्ग्यशास्त्रे ज्ञानमयो
गोत्रं यस्य तु काश्यपम् ॥ कण्वशाखोद्भवः श्रीमान् देवतातिथिपूजकः ॥ १९ ॥ वेदमार्गपरो नित्यं वेद-

शास्त्रविचक्षणः ॥ शिष्याणां पाठकश्चैव सौजन्यगुणभाजनः ॥ २० ॥ दानमार्गपरो यागी त्रिकालं सं-
ध्यया युतः ॥ देवशर्मा इति ख्यातो रूपवान् सुभगो वशी ॥ २१ ॥ तस्य प्रिया सुसाध्वी सा वसिष्ठ-
गोत्रसंभवा ॥ पराशरपुरस्थस्य तनया विष्णुशर्मणः ॥ २२ ॥ भाग्यवतीति विख्याता नाम्नोऽर्थस्य च
गौरवात् ॥ पतिव्रता पतिप्राणा पतिप्रियहिते रता ॥ २३ ॥ सर्वदा धर्मकार्येषु निरता स्वामिना सह ॥
धर्मं प्रकुर्वतोः काले वृद्धत्वमगमत्तयोः ॥ २४ ॥ तथापि नाभवत्पुत्रः सुखदः सर्वदेहिनाम् ॥ किं कार्यं
कुत्र गंतव्यं कथं पुत्रो भवेन्मम ॥ २५ ॥ अपुत्रस्य गतिर्नास्ति स्वर्गेऽपि न सुखं कदा ॥ ऋणत्रयापाक-
रणं कर्तव्यं भूतिमिच्छता ॥ २६ ॥ पित्रर्षिदेवतानां च संतत्याध्ययनैर्मखैः ॥ पितरः पुत्रमिच्छंति ग-
यायां पिंडदं सदा ॥ २७ ॥ वंध्ययोर्वा कथं पुत्र इति चिंतापरावुभौ ॥ यावत्तावत्समायातो मुद्गलो ज्ञान-
दोऽसताम् ॥ २८ ॥ ताभ्यां वै पूजितस्तुष्टो गाणेशो ज्ञानिनां वरः ॥ उवाच देवशर्माणं पुत्रोपायं वदामि
ते ॥ २९ ॥ शिवविष्णुगणेशानां देव्याः सूर्यस्य च द्विज ॥ अभेद एव पंचानां भेदकृन्नारकी भवेत् ॥ ३० ॥
निर्गुणं परमं ब्रह्म सच्चिदानंदमद्वयम् ॥ तदेव पंचरूपेण भक्तार्थं सगुणं बभौ ॥ ३१ ॥ तेषां वै पूजया सर्वै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसिद्ध्यंति मनोरथाः ॥ तत्रादौ विघ्नशांत्यर्थं पुत्रार्थं श्रीगजाननम् ॥ ३२ ॥ संपूज्य दत्त्वा सिद्धान्ननैवेद्यं तन्मनुं जप ॥ द्वात्रिंशदक्षरं सिद्धं हरिद्रागणपस्य च ॥ ३३ ॥ तद्विधानं प्रवक्ष्यामि शृणुष्वैकाग्रचेतसा ॥ गुरुं संपूज्य वस्त्राद्यैर्गृहाण मंत्रमुत्तमम् ॥३४॥ मंत्रदोषप्रशांत्यर्थं संस्कारदशकं चरेत् ॥ जननं दीपनं बोधो ताडनं चाभिषेचनम् ॥ ३५ ॥ विमलीकरणं जीवस्तर्पणं गोपनं कुरु ॥ आप्यायनं दश ख्याताः संस्कारा मंत्रशुद्धये ॥ ३६ ॥ एतैर्विना मंत्रसिद्धिः कस्यापि न भविष्यति ॥ संस्कारांते गुरुं देवं संपूज्य द्विज-भोजनम् ॥ ३७ ॥ कृत्वा जपेद्देवमंत्रं पूर्वसेवार्थमादरात् ॥ अयुतं त्र्ययुतं देव्या गायत्र्या जपमाचरेत् ॥ ३८ ॥ ततः पुरश्चरणमार्गेण हविष्याशी जपं चरेत् ॥ कामक्रोधौ निरस्याशु मदलोभौ च मत्सरम् ॥ ॥ ३९ ॥ एकाग्रचित्तः समता नित्यस्योक्ता जपस्य हि ॥ वेदलक्षं ततो होमो दशांशेन विधीयताम् ॥ ॥ ४० ॥ तर्पणं तद्दशांशेन तद्दशांशेन मार्जनम् ॥ तद्दशांशा द्विजा भोज्या मिष्टान्नेन सुमोदतः ॥ ॥ ४१ ॥ देवं संपूज्य स्वगुरुं प्रणमेद्भक्तिपूर्वकम् ॥ सांगाशीर्वचनं ग्राह्यं दक्षिणादानपूर्वकम् ॥ ४२ ॥ मौनेन भोजनं कुर्यात्कलावेतच्चतुर्गुणम् ॥ सुस्वप्ने मंत्रसिद्धिः स्यादन्यथा पूर्ववत्पुनः ॥ ४३ ॥ ततो

यदि न सिद्धिर्हि कार्यं हि गुटिकादिकम् ॥ यो यो मंत्रस्तस्य तस्य वर्णौषधिविनिर्मितः ॥ ४४ ॥ तत्त-द्वर्णोक्तसंख्याभिर्गुटिका मंत्रसिद्धिदा ॥ तदाभिषेकस्तद्धरणं तत्क्काथस्तद्विलेपनम् ॥ ४५ ॥ तत्पूजा च तथा सिद्धिदायकौषधयः स्मृताः ॥ तेनाप्यसिद्धो मंत्रश्चेन्मधुरत्रितयेन वै ॥ ४६ ॥ विद्यासाधकयो-रैक्यसिद्ध्यर्थं जुहुयात्ततः ॥ ततोऽप्यसिद्धः कुर्याद्वै संस्कारसप्तकं बुधः ॥ ४७ ॥ द्रावणं बोधनं वश्यं पीडनं पोषशोषणे ॥ दहनं चैव मंत्रस्य तेन सिद्धो भवेन्मनुः ॥ ४८ ॥ द्विगुणं क्षत्रियो वैश्यस्त्रिगुणं तु समाचरेत् ॥ शूद्रे चतुर्गुणं प्रोक्तं यद्वा दशगुणं भवेत् ॥ ४९ ॥ मंत्रसिद्धिस्तदावश्यं जायते नात्र संशयः ॥ ततः काम्यं प्रकुर्वीत ह्यसिद्धे दोषभाग् भवेत् ॥ ५० ॥ मंत्रं गृहाण भो मत्त इत्युक्त्वास्मै ददौ मनुम् ॥ मंत्रोद्धारं प्रवक्ष्यामि मंत्रज्ञानकरं तव ॥ ५१ ॥ तारो वर्म गणेशो भूर्हरिद्रागणलोहितः ॥ आषाढीये वरवरसत्यः सर्वजतर्जनी ॥ ५२ ॥ हृदयं स्तंभयद्वंद्वं वल्लभा स्वर्णरेतसः ॥ हरिद्रागणप-स्यायं मंत्रः सर्वप्रदायकः ॥ ५३ ॥ द्वात्रिंशदक्षरो मंत्रो मदनो मुनिरीरितः ॥ छंदोऽनुष्टुब् देवता तु

तारः ॐ वर्म हुं गणेशः गं भूः ग्लौं गणस्वरूपं लोहितः पः । आषाढीतये स्वरूपं वरवरस्वरूपं सत्यः । दसवर्जस्वरूप तर्जनी न हृदयं स्तंभय स्तंभय । स्वरूपं स्वर्णरेतसोऽग्नेः वल्लभा प्रिया स्वाहा । अयं मंत्रोद्धारः ॥ ५२ ॥ ५३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिद्रागणनायकः ॥ ५४ ॥ वेदाष्टशरसप्तांगनेत्राणैरंगमीरितम् ॥ वक्ष्ये ध्यानं सुखकरं भक्ताभीष्टप्रदा-
यकम् ॥ ५५ ॥ पाशांकुशौ मोदकमेकदंतं करैर्दधानं कनकासनस्थम् ॥ हरिद्रखंडप्रतिमं त्रिनेत्रं पीतां-
शुकं रात्रिगणेशमीडे ॥ ५६ ॥ एवं ध्यानं मया प्रोक्तं मालां पूज्य जपेन्मनुम् ॥ काम्ये भोज्या द्विजा
नित्यं बटुकाश्च कुमारिकाः ॥ ५७ ॥ वंध्या नारी रजःस्नाता पूजयित्वा गणाधिपम् ॥ पलप्रमाणगोमूत्रे
पिष्ट्वा सिंधुवचानिशाः ॥ ५८ ॥ सहस्रं मंत्रयेत् कन्या बटून् संभोज्य मोदकैः ॥ पीत्वा तदौषधं पुत्रं
लभते गुणसागरम् ॥ ५९ ॥ देवशर्मन् कुरुष्वाद्य पुत्रार्थं भार्यया सह ॥ पुत्रौ ते भवितारौ हि गच्छामि
स्वाश्रमं प्रति ॥ ६० ॥ देवशर्मोवाच ॥ भो मुद्गल महाभाग सिद्धान्नं कथितं त्वया ॥ कृपया लक्षणं
ब्रूहि विनायक सुतोषदम् ॥ ६१ ॥ मुद्गल उवाच ॥ तंडुलान् शालिसंभूतान् प्रस्थमानमितान् शुभान् ॥
द्विदलीकृतमुद्गान्नं तदर्धेन च योजयेत् ॥ ६२ ॥ गुडं वेदपलं भूयो नारिकेलं च तत्समम् ॥ मरिचं
मुष्टिमात्रं च सैंधवं च तदर्धकम् ॥ ६३ ॥ तदर्धं जीरकं चाज्यं कुडवार्धसमं भवेत् ॥ एतत्सर्वं चतुःप्र-

दक्षोर्ध्वे अंकुशः । दक्षाधः मोदकः । वामोर्ध्वे पाशः अधः दंतः ॥ ५६ ॥

स्थगोदुग्धे मंदवह्निना ॥ ६४ ॥ पचेत्सिद्धोदनं ह्येतत् गणेशस्य महत्प्रियम् ॥ नैवेद्यं बलिदानं च होमं
कुर्यादनेन तु ॥ ६५ ॥ सुप्रीतो गणराजस्तु सर्वान् कामान् प्रदास्यति ॥ आयुर्धनं यशो जायामारो-
ग्यं पुत्रमुत्तमम् ॥ ६६ ॥ सूत उवाच ॥ इत्युक्त्वा मुद्गलः स्थानं गंगयावेष्टितं स्वकम् ॥ तस्यैव नाम्ना
विख्यातं जगाम दीनरक्षकः ॥ ६७ ॥ इति देवालयग्राममाहात्म्ये प्रथमोऽध्यायः ॥ १ ॥ ॥ सूत
उवाच ॥ गते मुनौ देवशर्मा स चकार यथोदितम् ॥ पत्न्या सह गणेशस्य जजाप परमं मनुम् ॥ १ ॥
भक्त्या तुष्टः परमया गणेशो भक्तवत्सलः ॥ स्वप्ने तं दर्शयामास वरं ब्रूहीति सोऽब्रवीत् ॥ २ ॥ पुत्रं
देहि गणेशान विष्णुभक्तं मम प्रियम् ॥ दत्तः पुत्रो मयेत्युक्त्वा सोंऽतर्धानमगाद्विभुः ॥ ३ ॥ जाग्रतः
स्वस्त्रियं प्राह स्वप्नो दृष्टो मयानघे ॥ साप्युवाच गणेशेन द्वे दत्ते श्रीफले मम ॥ ४ ॥ सूत उवाच ॥
उभावानंदसंयुक्तौ पूजां चक्रतुरंगसा ॥ ब्राह्मणान् भोज्यपक्वान्नैः प्रसादं भक्षतुर्लघु ॥ ५ ॥ तेन गर्भवती
जाता सुमुहूर्ते सुषाव सा ॥ तस्याः पुत्रद्वयं जज्ञे ज्येष्ठोऽभून्माधवाह्वयः ॥ ६ ॥ कनिष्ठः कृष्णसंज्ञश्च
पिता माता ननंदतुः ॥ कुमारौ बुद्धिसंपन्नौ लिपिविद्यामवापतुः ॥ ७ ॥ चूडाकर्म तयोर्जातं व्रतबंधं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिताकरोत् ॥ वेदाभ्यासपरौ नित्यं शास्त्राभ्यासकरौ मुहुः ॥ ८ ॥ विवाहश्च तयोर्जात आनंदेन तदा किल ॥ कृष्णवेण्या यत्र संगः पुण्योऽभूत्पंचगंगया ॥ ९ ॥ अनंतानि च तीर्थानि तत्र संति द्विजोत्तम ॥ अष्ट तीर्थानि सिद्धानि सर्वपापहराणि वै ॥ १० ॥ तत्र देवो जगन्नाथो दत्तात्रेयो व्यवस्थितः ॥ अन्नपूर्णा सदा यत्र श्रीनृसिंहसरस्वती ॥ ११ ॥ दत्तावतारो भगवान् यतिर्भूत्वा करिष्यति ॥ नाशनं भूतबाधादेर्कल्याणं च करिष्यति ॥ १२ ॥ औदुंबरतरोर्मूले तन्निवासेन तत्स्थलम् ॥ ख्यातं नृसिंहवाडीति ब्रह्मदं च भविष्यति ॥ १३ ॥ तत्समीपगतं क्षेत्रं कुरवपुरसंज्ञकम् ॥ अमरापुरं द्वितीयं च नगरं पुण्यदायकम् ॥ ॥ १४ ॥ तत्रस्थौ कर्मनिपुणौ कण्वौ ब्राह्मणपुंगवौ ॥ कुरवपुरसंस्थस्य द्विजस्य विष्णुशर्मणः ॥ १५ ॥ तनया यमुना दत्ता माधवायाग्रजाय सा ॥ यवीयसे तु कृष्णाय तनयाऽमरवासिनः ॥ १६ ॥ श्रीपादशर्मणो दत्ता रुक्मिणी नामतः शुभा ॥ स्वस्वपत्नीरताः सर्वे धर्ममार्गपरायणाः ॥ १७ ॥ द्वे स्नुषे श्वशुरौ नित्यमर्चयामासतुर्मुदा ॥ पित्रोश्च सेवनं काले पुत्राभ्यां सुकृतं बहु ॥ १८ ॥ धनधान्यसमायुक्तं कुटुंबं वर्धते सदा ॥ आगतास्तत्र मोदेन ज्ञातयः सकुटुंबकाः ॥ १९ ॥ भक्ष्यं नानाविधं नित्यं भक्ष-

यंति वदंति च ॥ देवशर्मस्तुतिपरं सर्वेषां वाक्यमुत्तमम् ॥ २० ॥ देवशर्मा देवशर्मा माधवोः माधवः स्वयं ॥ कृष्णः कृष्ण इव ख्यातो यमुना यमुना सती ॥ २१ ॥ रुक्मिणी रुक्मनाभिर्या संपद्भाग्यवतीति च ॥ एवं नामार्थतो भाग्यं वर्णयंति महात्मनः ॥ २२ ॥ एवं स्तुतिं सदा चक्रुः सर्वे लोका महात्मनः ॥ एवं बहुगते काले पूर्वकर्मविपाकतः ॥ २३ ॥ जातं विचित्रं विप्रर्षे शृणु चैकाग्रमानसः ॥ तस्मिन्नेव पुरे दुष्टप्रज्ञो द्विजो महाधमः ॥ २४ ॥ देवशर्मगृहे वृत्तं सुखदं सर्वदेहिनाम् ॥ तेन ज्ञात मत्सरेण तन्नाशार्थं समुद्यतः ॥ २५ ॥ कथमस्य गृहे दुःखमलक्ष्म्या वसतिः कथम् ॥ कथं वियोगो भवति पुत्रभार्यास्नुषादिभिः ॥ २६ ॥ किं कृत्वा मम सौख्यं स्यात्किं कृत्वा दुःखभागयम् ॥ इति

देवशर्मा देवानां शर्म हर्षः यस्मात् । शर्मशातसुखानि चेत्यमरः । माधवः मां व्यथां धवयति दूरीकरोतीति । मा जालं धीर्व्यथा लक्ष्मीः । इति मातृकाविलासे सौभरिः । कृष्ण इव मनःकर्षकः मोहक इत्यर्थः । यमुना ये याचके मुवत् मातृवत् नः भावो यस्याः । याचके योऽतिकुत्सिते । इत्येकाक्षरीनाममाला । मुर्माता मूर्महाबलः । नो नाप्यज्ञो नलो नम्रो भावो नस्यो नरांतकः । इति मातृकाविलासः । भाव अभिप्रायः ॥ २१ ॥ रुक्मं सुवर्णं णायां नाभौ यस्याः । णा नाभिर्णिर्वृकोदरः । इति मातृकाविलासे । भाग्यं सौभाग्यं संपत् ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चितार्णवे मग्न आहूय गतभर्तृकाम् ॥ २७ ॥ वृद्धां दुष्टां घातकरीं जीर्णत्वाच्च पतिव्रताम् ॥ दुष्टप्रज्ञ-
स्वभावस्थां वैरिणीं देवशर्मणः ॥ २८ ॥ सा प्राप्य दुष्टप्रज्ञस्य गृहं हास्यमुखाब्रवीत् ॥ हे मित्र किं मया
कार्यं वद जातं च मानय ॥ २९ ॥ तेन श्रुत्वा सुकथितमिदमित्थं विचार्य च ॥ गता गृहं
स्वकीयं सा भोजनादि निवर्त्य च ॥ ३० ॥ एकस्मिन् दिवसे प्रातर्गोपीचंदनमुद्रिकाम् ॥ धृत्वा भाले
कपोले च शुक्लं सुपरिधानकम् ॥ ३१ ॥ दुकूलाच्छादनपटं गले तुलसिमालिकाम् ॥ मुखे नाम हृदि
प्रेम कलहस्य सुतापदम् ॥ ३२ ॥ रुक्मिण्या मंदिरं गत्वा प्रेमगोष्ठीश्चकार सा ॥ प्रिये रुक्मिणि साध्वी
त्वं धन्यासि पृथिवीतले ॥ ३३ ॥ प्रेमपात्रं सदा या हि बांधवानां वरानने ॥ सत्यं वद धवप्रीतिस्तवो-
परि ध्रुवा किमु ॥ ३४ ॥ रुक्मिण्युवाच ॥ भगवद्ध्यानशीले भो पत्युः सख्यं मया सदा ॥ यद्यद्याचे
तत्तदैव प्राप्यते प्रेमभावतः ॥ ३५ ॥ वृद्धोवाच ॥ रात्रौ तिष्ठति गेहे किं दिवा कुत्र प्रगच्छति ॥
रुक्मिण्युवाच ॥ क्षपायां सेवने सक्ता तिष्ठामि परमादरात् ॥ ३६ ॥ त्र्यंबुल्या दर्शनार्थं मे दिवा गच्छति

त्र्यंबुलीदेवी भाषायां टेमलाईति करवीरे प्रसिद्धा ॥ ३७ ॥

वै पतिः ॥ वृद्धोवाच ॥ गच्छामि स्वगृहं कन्ये तव प्रेमार्थमागता ॥ ३७ ॥ यदा यदा गृहं प्राप्ता
श्वश्वा ते मानिताभवम् ॥ अन्नपानाच्छादनैश्च तुष्टाहं सर्वदा सति ॥ ३८ ॥ भाग्यवती तव गुणान्
बहून् वदति स्वाधिकान् ॥ तस्मात्तव शिवायाहं प्रश्नानरकवं बहून् ॥ ३९ ॥ बहिः श्रुतं न ते वक्त्रात्
निर्गतं तो षताभवम् ॥ गच्छामि स्वगृहं पुत्रि शिवं भवतु सर्वदा ॥ ४० ॥ रुक्मिण्युवाच ॥ किं श्रुतं वद
हे वृद्धे किं वच्मि तनयेऽकदम् ॥ असह्यमपि माचक्ष्व शृणु तर्हि यथातथम् ॥ ४१ ॥ असत्यं ते धव-
प्रेम परस्त्रीकामुकः स हि ॥ स्त्रीनिमित्तं बहिर्याति त्र्यंबुल्या दर्शनं मिषम् ॥ ४२ ॥ तत्रैवायाति समये
सुंदरी सुंदराभिधा ॥ तया स रमते नित्यं दुष्टप्रज्ञस्य तत्स्थले ॥ ४३ ॥ सत्यं वच्मि महाप्राज्ञे तव
श्वश्वैव तत्कृतम् ॥ रूपे गुणे न ते योग्या पतिर्भ्रांतिमगात्कथम् ॥ ४४ ॥ रुक्मिण्युवाच ॥ श्रुत्वा
त्वद्वाक्यमतुल चित्तमुद्विग्नतां गतम् ॥ सत्यं न भाति चित्ते मे नेदृक् भर्ता मम प्रियः ॥ ४५ ॥ त्वं
वृथा वदसि प्राज्ञे केनापि कथितं तव ॥ वृद्धोवाच ॥ परापवादनिरताद्दूरं गच्छामि चान्वहम् ॥ ४६ ॥
प्रत्यक्षं मम संजातं तव तद्दर्शयामि किम् ॥ रुक्मिण्युवाच ॥ यदि सत्यं वचो मातमम रक्षणकार-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कम् ॥ ४७ ॥ उपायं वद सत्कर्म दर्शयस्व कृपां कुरु ॥ वृद्धोवाच ॥ दुःखं न कुरु भद्रं ते दर्शयामि क्वचिद्दिने ॥४८॥ उपायमपि वक्ष्यामि वश्यमंत्रप्रदानतः ॥ एवं वदंत्यां तस्यां तु पतिः कृष्णः समागतः ॥ ॥ ४९ ॥ हास्यं कृत्वा प्राह वृद्धा कृष्ण कृष्ण सुखं तव ॥ सुंदरा सुभगा नारी रुक्मिण्येव न चापरा ॥५०॥ एकपत्नीव्रतं साधो तव कल्याणदायकम् ॥ गमिष्ये भोजनार्थं वै दुष्टप्रज्ञस्य मंदिरे ॥५१॥ सूत उवाच ॥ गता सा दुष्टधीः कृत्वा कलहस्यांकुरं तदा ॥ ५२ ॥ इति श्रीब्रह्मांडपुराणांतर्गतमानसखंडे देवालयग्राममाहात्म्ये द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ पतिं दृष्ट्वा खिन्नमुखी नीचदृष्टिर्बभूव सा ॥ तां खिन्नां रुक्मिणीं मत्वा कृष्णस्तस्याः समीपगः ॥ १ ॥ कंठे हस्तं निधायाह कस्माद्दुःखं प्रिये वद ॥ त्वं मे प्राणात्प्रियतमा तव दुःखेन दुःख्यहम् ॥ २ ॥ रुक्मिण्युवाच ॥ अलं ते भाषणेनाद्य वाचा मधुरया च भो ॥ हृदयं कठिनं यस्य कापट्यपरिसंयुतम् ॥ ३ ॥ मधुलिप्तः क्षुर इव मर्माणि परिकृंतति ॥ मीनानां घातकं यद्वत् बडिशं भक्ष्यसंयुतम् ॥ ४ ॥ तद्वत्ते भाषणं मन्ये विपाके दुःखदं खलु ॥ सूत उवाच ॥ तदप्रियं समाकर्ण्य विस्मितः प्राह हे प्रिये ॥ ५ ॥ सत्यं

वच्मि न मे चित्ते कदापि कपटं सति ॥ किमर्थं कुपिता ब्रूहि जीवने मम वल्लभे ॥ ६ ॥ इत्युक्त्वा स हनुं धृत्वा कोपं त्यज वद प्रियम् ॥ रुक्मिण्यश्रुमुखी खिन्ना प्राह ते प्रियभागिनी ॥ ७ ॥ सुंदरा सुभगा नारी प्रीतिपात्रं न चाप्यहम् ॥ कृष्ण उवाच ॥ रुक्मिणि त्यज संदेहं सर्वेषां नाशकारणम् ॥ ८ ॥ रुक्मिण्युवाच ॥ त्र्यंबुलीदर्शनमिषं कृत्वा यास्यसि तत्र वै ॥ कृष्ण उवाच ॥ देव्याः संदर्शनार्थं हि गम्यते मातुराज्ञया ॥ ९ ॥ सर्वदेवाधिका श्रेष्ठा माता सर्वस्य रक्षका ॥ किमर्थं संशयाविष्टा केन प्रोक्तमिदं तव ॥ १० ॥ नेत्रालोकनतो सुभ्रु कोपं कुरु ममोपरि ॥ इत्युक्त्वा सांत्वयित्वा तां त्र्यंबुलीं त्वरयागमत् ॥ ११ ॥ रुक्मिणी तद्दिनारभ्य खिन्नैवासीद्गतप्रभा ॥ प्रत्यहं दर्शने याति कृष्णस्तत्र ददर्श ह ॥ १२ ॥ एकां स्त्रियं रूपवतीं वृद्धया प्रेषितां तदा ॥ सुंदरा नाम तस्या वै सोचे कृष्णं सुनम्रधीः ॥ १३ ॥ कृष्ण कृष्ण महाभाग ममेच्छा परिवर्तते ॥ संसारतरणार्थं हि गुरुः सेव्यो मयानघ ॥ १४ ॥ त्वत्पितुर्मुखतो मंत्रो ग्राह्य इत्येव मे मनः ॥ परं न दत्ते कस्यापि बहुधा प्रार्थितो मया ॥ १५॥ किं का-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यमिति चिंता मे वृद्धया प्रेरितास्म्यहम् ॥ पितुस्त्वद्वचनं मान्यमतस्त्वां प्रार्थयाम्यहम् ॥ १६ ॥ मंत्रो यथा मया प्राप्यो भविष्यति तथा कुरु ॥ कृष्ण उवाच ॥ करिष्यामि शुचं मुंच कंचित्कालं प्रतीक्ष च ॥ १७ ॥ एवमुक्त्वा देवताया दर्शनं गृह्य वै गतः ॥ देवतायाः समीपेऽगे दुष्टप्रज्ञः स्वकारणात् ॥१८॥ मंदिरं सुदृढं बद्ध्वा स्थितिं चक्रे सुदारुणः ॥ रुक्मिणी स्वगृहे श्वश्वाः श्वशुरस्यापि भामिनी ॥ १९ ॥ वचनं नैव कुरुते ममाहितावुभावपि ॥ यमुनायाश्च वाक्यं सा माधवस्य प्रियस्य च ॥ २० ॥ सदैवोल्लंघते क्रुद्धा कलहो वृद्धिमेति सः ॥ वृद्धा गत्वा बोधयित्वा देवतादर्शनेन हि ॥ २१ ॥ सुबुद्धिः प्राप्यते सर्वैरुक्त्वा भाग्यवती खला ॥ सर्वैर्निवारिता प्रागाद्रुक्मिणी वृद्धया सह ॥ २२ ॥ त्र्यंबुलीं प्राप्य सा दुष्टा रुक्मिणीं प्राह मे शृणु ॥ स्थितिं कुरु महाप्राज्ञे दुष्टप्रज्ञस्य मंदिरे ॥ २३ ॥ पतिः करोति यद्यत्ते सर्वं भवति गोचरम् ॥ उक्त्वा तां स्थापयामास सा गतान्यस्थलं प्रति ॥ २४ ॥ सुंदरा चैव कृष्णोऽपि मार्गे संमीलितावुभौ ॥ आगतौ दर्शनार्थं तौ प्रार्थयामास सुंदरा ॥ २५ ॥ भो भो कृष्ण कदा कार्यं करिष्यसि ममानघ ॥ अद्य श्वो वा परश्वो वा कार्यकर्तेति यद्वचः ॥ २६ ॥ दिनानि बहुजातानि वचनं दत्तमाश्रय ॥ तदैव सा महादुष्टा वृद्धा प्राप्य तदंतिकम् ॥ २७ ॥ प्रोवाच शृणु रे कृष्ण वाचा दत्तमुपेक्षसे ॥ अश्वमेधसहस्राणि सत्यं च तुलया धृतम् ॥ २८ ॥ अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ सत्ये समाप्यते धर्मः क्षमा सत्ये समाप्यते ॥ २९ ॥ सत्ये समाप्यते हिंसा सर्वं सत्ये समाप्यते ॥ अतस्त्वं मुंच मा सत्यं वाचा दत्तं ददस्व हि ॥ ३० ॥ आज्ञाभंगं न कुर्वंति भक्तस्यार्याः कथंचन ॥ तव भक्ता सुंदरीयं किमुपेक्षसि शोभन ॥ ३१ ॥ कृष्ण उवाच ॥ किमिदं कष्टसे भीरु करिष्ये वचनं तव ॥ इति श्रुत्वा स्मितं कृत्वा तूष्णींभावमुपस्थिता ॥ ३२ ॥ सा वृद्धा हर्षिता भूत्वा रुक्मिणीं प्राप्य चाब्रवीत् ॥ पश्य पत्युस्तु दुर्वृत्तं अथान्यदपि दर्शये ॥ ३३ ॥ दुष्टप्रज्ञं समाहूय दर्शयस्वेति सा गता ॥ रत्नालंकरणं तस्यै दर्शयामास दुष्टधीः ॥ ३४ ॥ तव भर्त्रा सुंदरार्थे कृतं वै बहुमौल्यतः ॥ अनेकानि च रत्नानि वस्त्राणि भूषणानि च ॥ ३५ ॥ दत्तानि बहुमौल्यानि वचनं ह्येतदर्थकम् ॥ वृद्धा कृष्णं प्रगृह्याथ प्रदक्षिणमिषेण सा ॥ ३६ ॥ दुष्टप्रज्ञं रुक्मिणीं च दर्शयामास हर्षिता ॥ दुष्टप्रज्ञस्वभावं स जानाति माधवाग्रजः ॥ ३७ ॥ अतिकोपयुतो दृष्ट्वा भार्यां तन्मंदिरे स्थिताम् ॥ स दुष्टरन्यमार्गेण पलाय्य गतवान् ब-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिः ॥ ३८ ॥ वृद्धा गृहीत्वा तां जायां गता सा कृष्णसन्निधिम् ॥ कृष्णं कोपयुतं ज्ञात्वा हननार्थं समुद्यतम् ॥ ३९ ॥ कृष्ण कोपः कथं तेऽद्य सावधानमना भव ॥ गृहं गच्छ विचारं त्वं कुरुष्व मनसेच्छया ॥ ४० ॥ इत्युक्तो वृद्धया कृष्णः कोपेनैव गतो गृहम् ॥ रुक्मिण्यपि तया सार्धं कंपमानांगयष्टिका ॥ ४१ ॥ स्फुरदोष्ठी रक्तनेत्रा भाषमाणा न केनचित् ॥ गत्वा सा मंदिरं निद्रामकरोत् त्यक्तभूषणा ॥ ४२ ॥ कृष्णः स्वभार्यामाहेदं त्वं दुष्टा जारसेवनम् ॥ कर्तुमिच्छसि यन्मोहान्नाशमेष्यसि निश्चितम् ॥ ४३ ॥ श्रुत्वैव कटु तद्वाक्यमुत्थाय प्राह सा पतिम् ॥ मय्यारोपयसि स्वीयं कर्म योग्यं न ते खलु ॥ ४४ ॥ त्वमेव जारिनिपुणस्तव मात्रा त्विदं कृतम् ॥ सापि दुष्टा घातरूपा योग्यं सर्वमिदं खलु ॥ ४५ ॥ तस्यास्तद्वचनेनैव जातकंपो क्रुधा मुहुः ॥ तां भार्यां ताडयामास मुखे पृष्ठे च वक्षसि ॥ ४६ ॥ आगत्य मातापितरौ सांत्वयामासतुस्तदा ॥ तद्वृत्तं तेन कथितं साब्रवीच्छ्वशुरं रुषा ॥ ४७ ॥ अनया दुष्टया श्वश्वा मम घातकरं कृतम् ॥ ऊचे भाग्यवती तां तु दुष्टे किं बहु जल्पसि ॥ ४८ ॥ त्वं दुष्टा त्वं शठा मूढा पररूपरमथोचतुः ॥ श्वश्रूः कोपेन संयुक्ता ताडयामास तां वधूम् ॥ ४९ ॥ रुक्मिण्यपि तथा चक्रे यमुनां चापि मध्यगाम् ॥

समाजो मिलितस्तत्र किमिदं किमिदं वदन् ॥ ५० ॥ वृद्धागत्य प्रहर्षेण दुःखेन संयुता बहिः ॥ शांता भवत सर्वे वै सुज्ञानां कर्म नेदृशम् ॥ ५१ ॥ त्र्यंबुल्या दर्शनफलं प्राप्तं सर्वैर्महीतले ॥ इत्युक्ते तु गताः सर्वे स्वं स्वं स्थानं सुकोपिनः ॥ ५२ ॥ एवं प्रवृत्तः कलहः प्रत्यहं त्रासदायकः ॥ किं कार्यं कुत्र गच्छामस्त्र्यंबुल्या दर्शनादिदम् ॥ ५३ ॥ सा देवी नैव विघ्नः सा त्रासासंतोषदायिनी ॥ अद्यप्रभृति नामापि न गृह्णीमः कदाचन ॥ ५४ ॥ एवं निंदापरं जातं कुटुंबं सर्वमेव हि ॥ महालक्ष्मीः क्रोधयुता त्र्यंबुलीप्रियकारिणी ॥ ५५ ॥ स्वकीयनिंदाश्रवणात् कस्य कोपो न वर्धते ॥ सा त्र्यंबुली महालक्ष्म्यारतीव प्रियकारिणी ॥ ५६ ॥ तेन कोपेन सा लक्ष्मीर्या गृहे देवशर्मणः ॥ गता नष्टा चोरहृता कलहांकुरतः फलम् ॥ ५७ ॥ क्रमात्सर्वं गतं भ्रष्टमन्नचिंतापरं बभौ ॥ कुलं तल्लोकनिंद्यं च कालस्य महिमा खलु ॥ ५८ ॥ कालः पचति भूतानि कालः संहरते प्रजाः ॥ कालः सुप्तेषु जागर्ति स कालः प्रभुरीशिता ॥ ५९ ॥ लोका वदंति सहसा बहुनिंदाकरं वचः ॥ देवशर्मगृहे दुष्टाः सर्व एव व्यवस्थिताः ॥ ६० ॥ दंभकर्मकराः सर्वे ह्यदि दुष्टास्ततो गता ॥ लक्ष्मीः सौख्यं गतं भाग्यं दुष्टकर्मफलं त्विदम् ॥ ६१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवशर्मा देवशर्मा माधवो माधवः स्वयम् ॥ कृष्णः कृष्ण इव ख्यातो यमुना यमुनाऽसती ॥६२॥ रुक्मिणी रुक्मनाभिर्याऽसंपद्भाग्यवतीति च ॥ सूत उवाच ॥ पश्य कालस्य माहात्म्यं पूर्वं यन्नामभिः स्तवः ॥ ६३ ॥ तैरेव नामभिर्निंदा स्वकर्मफलमीदृशम् ॥ न सत्कारं प्रकुर्वंति वर्णाश्चत्वार एव च ॥ ६४ ॥ वर्णबाह्या उपालंभमपमानं च चक्रिरे ॥ ते सर्वे दुःखमतुलं प्राप्ता वै नीचसंगतः ॥ ६५ ॥ सतां श्रुत्वा गुणान्नीचः सद्य एव विषीदति ॥ शुभमिच्छन्निजं प्राज्ञो नीचैः सह न संगतम् ॥ ६६ ॥ क्षणमेकमपि ज्ञात्वा नीचैर्गच्छन् प्रदुष्यति ॥ दुष्टप्रज्ञस्य वृद्धायाः संगात् क्रुद्धा रमाभवत् ॥ ६७ ॥ तस्माद्धि-

---

देवशर्मा देवं इंद्रियं तस्यैव शर्म हर्षः यस्मात् इंद्रियात्मवादीत्यर्थः । देवं हृषीके देवस्तु नृपतौ तोयदे सुरे । इत्यभिधानचिंतामणिपरिशिष्टे द्विस्वरकांडे । माधवः मस्य विषस्य आसमंतात् धवः वृक्षविशेषः । धवः पुमान् धवे धूर्ते । मो यमे समयेऽपि स्याद्विषे च मधुसूदने । इति मेदिनी । विषवृक्ष एवायमित्यर्थः । विषवत् विषेण वा धूर्तः वंचको वा कृष्णः कृष्ण इव काक इव छिद्रदर्शीत्यर्थः । कृष्णः काके पिके वर्णे । इति द्विस्वरकांडेः । यमुना यमभागिनीति साभिप्रायमिदम् । असतीति पद्व्यच्छेदः ॥ ६२ ॥ रुक्मनाभिः । रुक्मं लोहे सुवर्णे च इति द्विस्वरकांडे । लोहं नाभौ यस्याः सर्वनाडीनां स्थानं नाभिः । अतः सर्वशरीरं लोहमयं कठोरमित्यर्थः । असंपत् भाग्यवती इति अकारप्रश्लेषेणार्थः । अभाग्यवतीत्यर्थः ॥ ६३ ॥

चार्यं कर्तव्यं कर्म सर्वार्थसिद्धिदम् ॥ एवं तापमुपायाताः कर्तव्ये भ्रांतिमागताः ॥ ६८ ॥ धातुपात्रविहीनं तद्वस्त्राच्छादनवर्जितम् ॥ गृहं शून्यमिवाभाति रात्रौ निद्राविवर्जितम् ॥ ६९ ॥ एकदा निशि सुप्तेषु गृहे बद्धकपाटके ॥ यमुना रुक्मिणी चोभे गुप्ते कोऽपि न विंदति ॥ ७० ॥ प्रातरुत्थाय सर्वेऽपि शोकं चक्रुर्वाङ्मुखाः ॥ केन नीते मम सुते स्थिते गृहकपाटके ॥७१॥ द्वारं शृंखलया युक्तं पूर्ववत् स्थितमेव हि ॥ कथं जातं कथं कार्यं किमिदं दैवकारितम् ॥ ७२ ॥ हा हा हताः स्म हे सर्वे का वा कालगतिस्त्वयम् ॥ अत्र वासो न मे योग्यो गृहं दुःखप्रदं यतः ॥ ७३ ॥ इत्युक्त्वा निर्गतो गेहाद्देवशर्मा सखिन्नधीः ॥ भार्या पुत्रौ खिन्नचित्ता मार्गे गच्छंति दुःखिताः ॥ ७४ ॥ यावत्तावदुभौ पुत्रौ हा हेत्यवदतां मुहुः ॥ भो तात हे सुजननि राक्षसो भक्षयिष्यति ॥ ७५ ॥ पश्य पश्य दुरात्मायं रोदनं चक्रतुस्तदा ॥ एवं ब्रुवंतौ तौ पुत्रौ ह्यदर्शनपथं गतौ ॥ ७६ ॥ पिता माता च लोकाश्च सर्वे सुविस्मयं गताः ॥ सौख्यस्य भाजनं यो हि कालेनाऽकस्य भाजनम् ॥ ७७ ॥ इति श्रीब्रह्मांडपुराणे मानसोत्तरखंडे श्रीदेवालयक्षेत्रमाहात्म्ये तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॐ सूत उवाच ॥ निर्गत्य नगराद्विप्रः भार्यया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सह दुःखितः ॥ कुत्र गच्छामि हे कांते मम भाग्यं कुतो गतम् ॥ १ ॥ नीते स्नुषे महाभागे पुत्रौ नीतौ च रक्षसा ॥ किं मयाचरितं पूर्वं साधवस्तु सुदूषिताः ॥ २ ॥ कस्य भक्ष्ये कृतो विघ्नो गुरवो निंदिता मया ॥ मातृपितृगुरुत्यागः कृतो वै पापकर्मणा ॥ ३ ॥ गर्भहत्या कृता वापि कस्येदं कर्मणः फलम् ॥ ॥ भाग्यवत्युवाच ॥ हा हतास्मि विनष्टास्मि कथं पुत्रं विना कृता ॥ ४ ॥ नाथ मां पातयाशु त्वमग्नौ वापि जलेऽपि वा ॥ हृदये दहनं नाथ प्राणा गच्छंति मे प्रभो ॥ ५ ॥ देवशर्मोवाच ॥ प्रिये किं भाषसे दुःखं दैवाधीनमिदं जगत् ॥ दैवमेव परं मन्ये धिक् पौरुषमनर्थकम् ॥ ६ ॥ यो यथा कुरुते कर्म तथैव फलमश्नुते ॥ क्षेत्रे यथा बीजमुप्तं तथैवांकुरभावना ॥ ७ ॥ यद्भावि तद्भवतु मे शोकं मुंच प्रिये मम ॥ त्वद्विलापान्मनस्तापो वृद्धिमेति क्षणे क्षणे ॥ ८ ॥ इत्युक्त्वा गमनं चक्रे दिशं पूर्वामवेक्ष्य च ॥ भ्रमते मासमात्रे स सस्त्रीको दुःखभाजनः ॥ ९ ॥ कंदमूलफलान्यादन् भ्रममाण इतस्ततः ॥ आससाद महारण्यं निर्जलं कंटकान्वितम् ॥ १० ॥ मध्याह्ने तृषिता भार्या खिन्ना जलमयाचत ॥ कस्यचित् स्वल्पपत्रस्य वृक्षस्याधः स्थिराभवत् ॥ ११ ॥ उदकानयनार्थं हि देवशर्माभ्रमद्वने ॥ कुत्रापि न जलं दृष्टं

सायंकालोऽभवत्तदा ॥ १२ ॥ सूर्ये प्राप्ते चास्तगिरिमंधकारो महानभूत् ॥ देवशर्मा परावृत्तो जायास्थानं जलं विना ॥ १३ ॥ शोधयामास तत्स्थानं ध्वनिमुच्चैश्चकार ह ॥ न मीलिता यदा जाया निशीथं समपद्यत ॥ १४ ॥ भाग्यवत्यपि सायं सा पत्युर्दर्शनलालसा ॥ वने विचिन्वयामासानिशीथं सा वरानना ॥ १५ ॥ गच्छंती सा विमार्गेण कूपमध्ये पपात ह ॥ देवशर्मा प्रभाते स स्वां भार्यां तु वने वने ॥ १६ ॥ भ्रमन् भ्रमन् ददर्शाथ कूपतीरे स्त्रियोऽशुकम् ॥ दुःखेन गमनं तत्र चकार संशयेन सः ॥ १७ ॥ अन्यद्वस्त्वपि संवीक्ष्य जीवस्त्यक्तोऽनया ध्रुवम् ॥ इत्युक्त्वा शोकसंविग्नो हा भार्ये क्व गतासि माम् ॥ १८ ॥ त्यक्त्वा त्वं विपिने घोरे कथं रुष्टा ममोपरि ॥ हा पुत्र हा प्रिये कांते हा स्नुषे किं करोम्यहम् ॥ १९ ॥ इत्युक्त्वा पतितो भूमौ मूर्च्छया सुपरिप्लुतः ॥ एतस्मिन्नेव काले तु साधुरेकः समागतः ॥ २० ॥ ब्रह्मनिष्ठो महायोगी सर्वशास्त्रविशारदः ॥ शापप्रसादयोरीशो यतचित्तेंद्रियक्रियः ॥ २१ ॥ सत्यं ज्ञानमनंतं यद्ब्रह्मज्योतिः सनातनम् ॥ तदेव तेन रूपेण कल्याणार्थं जनस्य च ॥ २२ ॥ भार्यापुत्रैः स्वशिष्यैश्च रामेशं गंतुमुद्यतः ॥ तस्मिन्वने पुरारात्रौ वासो जातस्तदानघ ॥ २३ ॥ दुःख-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शब्दं स श्रुत्वैव दयालुत्वात्समागतः ॥ शिवणे नगरे यस्य वसतिः पूर्वजैः कृता ॥ २४ ॥ शिवायाश्च शिवस्यैव णो जपो यत्र सर्वदा ॥ अतस्तन्नाम विख्यातं श्रुतं कल्याणदायकम् ॥ २५ ॥ शिवस्य सुहृ भद्रस्य यत्र णो बहुविस्तरः ॥ शिवया सहितः प्रेम्णा सर्वदा संस्थितः शिवः ॥ २६ ॥ तत्रत्यैः सेव्यते सर्वैः साधोः शासनवर्तिभिः ॥ धनं धान्यं पयोऽप्यत्र सर्वदा शिवदं खलु ॥ २७ ॥ दुष्टस्यापि शिवं यत्र शिवणेति प्रकीर्तितम् ॥ यस्य वंशे महात्मानो जगदुद्धारकारकाः ॥ २८ ॥ द्वारभूता ईश्वरस्य समलोष्टाश्मकांचनाः ॥ भविष्यंति कलावेव विष्णोरंशेन भूतले ॥ २९ ॥ यद्यद्विभूतिमत्सत्वं शमादिगुणसंयुतम् ॥ वेदशास्त्रपरं शुद्धं तत्तद्विष्ण्वंशसंभवम् ॥ ३० ॥ अयं साधुर्महाप्राज्ञो लोकार्थं कर्मकृत्सदा ॥ पूर्वमेव वरो दत्तो विष्णुना गिरिवासिना ॥ ३१ ॥ तवान्वये महाभागा बालकृष्णादयः परे ॥ ज्ञानमंत्र-

---

णो निर्गुणे जपे योग्ये । इत्येकाक्षरीनाममाला । शिवा च शिवश्च शिवौ तयोः णः जपः यत्र तत् शिवणं नगरम् ॥ २५ ॥ णो मत्स्यो बहुविस्तारो । इति मातृकाविलासे सौभरिः ॥ २६ ॥ क्षी रे रणे धने धान्ये णः । इत्येकाक्षरीनाममाला । दुग्धादिपदार्थाः शुभदा यत्र शिवाः शुभाः णाः क्षीरादयो यस्मिन् एकशेषेणेदम् ॥ २७ ॥ रणः शब्दोऽपि यत्र स शिवदः । इति शिवणं नगरम् । शिवं णस्य दुष्टस्य यस्मिन् इति णः । दुष्टे क्रोडे च तस्करे । इत्येकाक्षरीनाममाला ॥ २८ ॥

प्रदानेन पापानामपि तारकाः ॥ ३२ ॥ भविष्याः कीर्तिमंतो हि जगद्गुरुपदाभिधाः ॥ दीनानां पालकाः श्रेष्ठा युगे तिष्ये सुतारकाः ॥ ३३ ॥ एवं प्राप्तवरः साधुर्यजुर्वेदपरायणः ॥ पतितं प्राह विप्रं तमुतिष्ठोत्तिष्ठ हे द्विज ॥ ३४ ॥ तव दुःखं नाशयामि सर्वं कथय मेऽनघ ॥ वेंकटेशो रमानाथस्तव सौख्यं प्रदास्यति ॥ ३५ ॥ इति तद्वचनं श्रुत्वा ह्युत्थितः प्रणनाम सः ॥ भो साधो करुणापूर्ण हृदयाह्लादकारक ॥ ३६ ॥ तव संदर्शनेनैव भाग्यं मे महदुद्गतम् ॥ मम वृत्तं शृणु प्राज्ञ त्वं हि माता पिता मम ॥ ३७ ॥ सूत उवाच ॥ कथयामास वृत्तांतं मनसा दुःखितेन सः ॥ साष्टांगं प्रणिपत्याह किं करोमि महामते ॥ ३८ ॥ पुत्रनाशो स्नुशानाशो मृता भार्या गतं गृहम् ॥ धनं नष्टं लोकनिंदा तस्मान्मे मरणं वरम् ॥ ३९ ॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ सर्वै विहीनो जीवामि किं भोगैर्जीवितेन वा ॥ ४० ॥ ईश्वरो मे कथं रुष्टः कथं लक्ष्मीर्गता मम ॥ मरणं मे कथं भावी दयालो कथयाद्य मे ॥ ४१ ॥ इत्युक्त्वा स रुरोदोच्चैः पादयोः पतितस्तदा ॥ एवं निशम्य तद्वाचं करुणः साधुसत्तमः ॥ ४२ ॥ उत्थापयित्वा तं प्राह शीर्ष्णि हस्तं निधाय सः ॥ नेत्रे प्रमृज्य तस्याथ स्वांशुकेनाह तं द्विजम् ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखं मुंच महाभाग वत्स वत्स महामते ॥ मम पुत्रोपमस्त्वं हि गतकष्टो भवाधुना ॥ ४४ ॥ निंदया व्यंबुलीदेव्या महालक्ष्मीस्तवोपरि ॥ रुष्टा तोषं कुरुष्वाद्य तस्या लक्ष्म्याः सुभक्तितः ॥ ४५ ॥ तस्या नाथं श्रीनिवासं श्रीयुक्तं भज सादरम् ॥ शेषाद्रिं गच्छ भद्रं ते पंचयोजनमानतः ॥ ४६ ॥ इतो हि वर्तते विप्र गच्छ गच्छ त्वरां कुरु ॥ तस्य सेवनतो विप्र तद्भार्या तोषमेष्यति ॥ ४७ ॥ तस्याज्ञया सर्वमेव सुखदं ते भविष्यति ॥ पुत्रभार्यादिभिर्योगं प्राप्स्यसि त्वं न संशयः ॥ ४८ ॥ इमं मंत्रं गृहाण त्वं व्यंकटेशस्य सुंदरम् ॥ पुरश्चरणमार्गेण जपं कुरु विधानतः ॥ ४९ ॥ इत्युक्त्वा प्रददौ मंत्रं विधानमुपदिश्य च ॥ मस्तके हस्तमाधाय तस्यांगं परिमार्जयत् ॥ ५० ॥ देवशर्मोवाच ॥ महाराज दयासिंधो पुनर्मे दर्शनं कदा ॥ भविष्यति गुरो देव सर्वेषां सुखदं शिवम् ॥ ५१ ॥ साधुरुवाच ॥ ज्ञानदृष्ट्या प्रपश्यामि मया सह समागमः ॥ भविष्यति पुनर्धीर सत्यं सत्यं वदाम्यहम् ॥ ५२ ॥ इत्युक्त्वा स गतः श्रीमान् वने स्वस्थानमेत्य सः ॥ भार्यापुत्रादिसंयुक्तो रामेशं प्रति संगतः ॥५३ ॥ यात्रां कृत्वा गृह्य सेतुं प्रयागं पुनरागतः ॥ काशीं गत्वा विश्वनाथं पूज्य स्वनगरं गतः ॥ ५४ ॥ तत्र देवीं शिवां भक्तपालकां

शिवमेव च ॥ संपूज्य ग्रामदेवांश्च संतोषं जनयन् प्रभुः ॥ उवास सर्वलोकानां पूज्यो मान्यश्च दुःखहा ॥ ५५ ॥ इति श्रीदेवालयग्राममाहात्म्ये चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॐ सूत उवाच ॥ देवशर्मा महाभागः प्राप्य मंत्रं गुरोर्मुखात् ॥ सर्वं भ्रमं च मोहं च दुःखं त्यक्त्वा समाहितः ॥ १ ॥ अपराधं क्षमस्वेति लक्ष्मीं प्रार्थ्य गिरिं गतः ॥ सुवर्णमुखरीतीरे गत्वा स्नानं चकार सः ॥ २ ॥ अगस्त्येशं प्रणम्याथ श्रीवराहं ननाम सः ॥ चक्रपुष्करिणीतीर्थे पुनः स्नात्वा समाहितः ॥ ३ ॥ संध्यां यज्ञं तर्पणं च कृत्वा पूजां परात्मनः ॥ गुरूपदिष्टमार्गेण पुरश्चरणमारभत् ॥ ४ ॥ प्रत्यहं देवपूजां सकृत्वोपोषणमाचरत् ॥ षष्ठे मासे समाप्तं तदनुष्ठानं महात्मनः ॥ ५ ॥ कंदमूलफलैर्विप्रान् भोजयित्वा ननंद ह ॥ पुनः प्रार्थ्य व्यंकटेशं स्तोत्रं चक्रे महामनाः ॥ ६ ॥ जय लक्ष्मीपते नाथ जय भक्तप्रियंकर ॥ जयशेषाद्रिनिलय भक्तकामप्रपूरक ॥ ७ ॥ तव नाम्ना महापापी गच्छते परमां गतिम् ॥ संसारे सुखदं नाम पुत्रभार्यासुषाप्रदम् ॥ ८ ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विजः ॥ इति वक्ति भवान् देव तदसत्यं न वै कुरु ॥९॥ अहं तव पदांभोजमिलिन्दो रससेवकः ॥ लक्ष्म्या मयापराद्धं हि तत्क्षमस्व दया-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निधे ॥ १० ॥ पवित्राणां पवित्रस्त्वं मंगलानां च मंगलम् ॥ अपराधः सकृद्धर्त्रा सोढव्यः स्वप्रजा-
कृतः ॥ ११ ॥ तव प्रजा न किमहं भवता स्वीकृते मयि ॥ भविष्यति सदा लक्ष्मीः सुतुष्टा सुखदा
मम ॥ १२ ॥ जनन्या ताडितो बालः पितरं गच्छति स्वयम् ॥ पिता लालयते सूनुं तथा त्वं मां हि
पालय ॥ १३ ॥ पित्रा हतं सुतं माता स्तनपानं ददात्यसौ ॥ मया कृतापराधेन क्रुधा मात्रा बहिष्कृतः
॥ १४ ॥ पितरौ शरणं प्राप्तस्तव श्रीस्त्वयि सर्वदा ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ १५ ॥
दासोऽयमिति मां मत्वा व्यंकटेश दयां कुरु ॥ महालक्ष्मि नमस्तुभ्यं नमस्ते त्र्यंबुलिप्रिये ॥ १६ ॥ मातु-
रंके शयानेन बालेन पदताडनम् ॥ संतोषाय भवेन्मातू रक्ष मां दीनवत्सले ॥ १७ ॥ अंगणे क्रीडने
मग्नो बालो नायाति मंदिरम् ॥ आहूतोऽपि क्षुधाविष्टो तदा स्मरति तां सुवम् ॥ १८ ॥ मम तातो
व्यंकटेशो लक्ष्मीः सुजननी मम ॥ त्वद्रूपिणी त्र्यंबुली च शरणं त्वामहं गतः ॥ १९ ॥ इत्युक्त्वा प्रण-
नामासौ साष्टांगं पुरतो हरेः ॥ तस्य भक्त्या ततस्तुष्टः सर्वदेवशिरोमणिः ॥ २० ॥ आविर्बभूव भग-
वान् तुलसीदलमंडितः ॥ आविर्भूतं हरिं दृष्ट्वा तेजसां राशिमव्ययम् ॥ २१ ॥ शिरसा भूमिमालिंग्य

ववंदे चरणौ हरेः ॥ सा लक्ष्मीर्हृदये यस्य प्रांजलिः स्तोतुमारभत् ॥ २२ ॥ देवशर्मोवाच ॥ नमस्ते
देवदेवाय नमस्ते परमात्मने ॥ परेशाय सुरेशाय नमस्ते ज्ञानदायिने ॥ २३ ॥ नमस्ते परमानंद पुरु-
षोत्तम केशव ॥ नमस्ते पद्मनेत्राय कमलापतये नमः ॥ २४ ॥ नमस्ते बहुरूपाय नीरूपाय नमो
नमः ॥ विचिंत्यायाविचिंत्याय दृश्यादृश्याय वै नमः ॥ २५ ॥ नमस्त्रैलोक्यनाथाय लोकपित्रे नमो
नमः ॥ नमस्ते ज्ञानगम्याय नमस्ते सर्वसाक्षिणे ॥ २६ ॥ कंसारये नमस्तुभ्यं नमस्ते कैटभारये ॥
मधुहर्त्रे नमस्तुभ्यं विधात्रे च नमो नमः ॥ २७ ॥ येन त्वयोद्धृता वेदा मीनरूपधरेण वै ॥ गंभीरांभो-
निधेरंभोभ्यंतरात्तमहं भजे ॥ २८ ॥ येन त्वयोद्धृता पृथ्वी सशैलवनकानना ॥ कूर्मरूपधरेणेयं तस्मै
तुभ्यं नमो नमः ॥ २९ ॥ वराहमूर्तिना येन धरणी धरणीपते ॥ उद्धृता निजदंतेन तस्मै तुभ्यं नमो
नमः ॥३०॥ नृसिंहमूर्तिना येन त्वया दैत्यो विदारितः ॥ हिरण्यकशिपुः क्रुद्धस्तस्मै तुभ्यं नमो नमः॥
॥ ३१ ॥ बलियज्ञस्त्वया ध्वस्तो येन वामनरूपिणा ॥ तस्मै तुभ्यं नमो देव कश्यपानंदकारिणे ॥ ३२ ॥
पितरस्तर्पिता येन त्वया क्षत्रियशोणितैः ॥ कार्तवीर्यो हतो येन तस्मै रामाय ते नमः ॥ ३३ ॥ रावणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निहतो येन कौशल्यासूनुना त्वया ॥ मारीचः कुंभकर्णश्च तस्मै रामाय ते नमः ॥ ३४ ॥ प्रलंबो निहतो येन रेवतीपतिना त्वया ॥ कालिंदिभेदिने तुभ्यं तस्मै रामाय ते नमः ॥ ३५ ॥ वेदा विनिंदिता येन विलोक्य पशुहिंसनम् ॥ सकृपेन त्वया येन तस्मै बुद्धाय ते नमः ॥ ३६ ॥ म्लेछाश्च निहता येन युगांते कल्किमूर्तिना ॥ सर्वलोकहितार्थाय तस्मै तुभ्यं नमो नमः ॥ ३७ ॥ हरे जिष्णो दैत्यजिष्णो नारायण कृपामय ॥ संसारसागरे घोरे पतितं मां समुद्धर ॥ ३८ ॥ व्यंकटेश नमस्तुभ्यं लक्ष्म्यै देव्यै नमो नमः ॥ पर्वते ये संवसंति भक्तास्तेभ्यो नमो नमः ॥ ३९ ॥ ततो हर्षाद्ब्राह्मणोऽसौ प्रक्षाल्य चरणौ हरेः ॥ लक्ष्म्याश्च चरणद्वंद्वं पूजयामास भक्तितः ॥ ४० ॥ गोविंद परमानंद मुकुंद मधुसूदन ॥ त्राहि मां पापिनं कृष्ण यतस्त्वं सर्वपापहा ॥ ४१ ॥ इति स्तोत्रं तस्य श्रुत्वा भगवान् भक्तवत्सलः ॥ परमां प्रीतिमासाद्य लक्ष्म्या सह जगाद तम् ॥४२॥ श्रीव्यंकटेश उवाच ॥ वरं वरय भो वत्स यस्ते मनसि वर्तते ॥ ब्रह्मत्वं वा शिवत्वं वा शक्रत्वं वा विमिच्छसि । ४३॥ देवशर्मोवाच ॥ सर्वमेव मया प्राप्तं जगदीश न संशयः ॥ दैवतैरप्यदृश्यं त्वां पश्यामि वरदं प्रभुम् ॥४४॥ मुक्तिं मुक्तिं धनैश्वर्यं दातुं सर्वं भवान् क्षमः ॥ प्रभो न भक्तियोग्योऽस्मि भक्तिमेव प्रयच्छ मे ॥४५॥ श्रीव्यंकटेश उवाच ॥ तव भक्त्यानया वत्स प्रीतोऽहं रमया सह ॥ किमस्ति वस्तु यद्दत्वा तवानृण्यं भजाम्यहम् ॥ ४६ ॥ इत्युक्त्वा परमप्रीतः प्रसार्य चतुरो भुजान् ॥ तमालिंगितवान् विष्णुः पिता पुत्रमिव द्विज ॥ ४७ ॥ श्रीलक्ष्मीरुवाच ॥ वरं गृहाण विप्रेंद्र भार्यापुत्रस्नुषादिभिः ॥ योगो भवतु सुखकृद्गुरुणा च तवानघ ॥ ४८॥ यो गुरुस्तव मे विप्र भक्तोऽतीव महामनाः ॥ शिवणस्थो ब्रह्मनिष्ठो हृदये यस्य मे पतिः ॥ ४९ ॥ ध्यानं करोति स यदा प्रत्यक्षो माधवस्तदा ॥ तद्वंशजोपदेशेन शिष्यप्रीती रमाधवे ॥ ५० ॥ अतस्त्वयातुलं सौख्यं प्राप्तव्यं नात्र संशयः ॥ देवशर्मोवाच ॥ यत्र स्मरामि त्वां देव त्वां च मातर्नमाम्यहम् ॥ ५१ ॥ तत्र त्वया शीघ्रमेवागंतव्यं मम सन्निधौ ॥ श्रीव्यंकटेश उवाच ॥ तथा भविष्यति प्रीत्या गच्छ कार्यं स्वकं कुरु ॥ ५२ ॥ इत्युक्त्वा देवदेवश्च लक्ष्म्यांतर्धानमागतः ॥ देवशर्मापि संतुष्टो नमस्कृत्य रमाधवम् ॥ ५३ ॥ निर्गतः कुत्रचिद्गंतुं देवं सुहृदि संस्मरन् ॥ व्यंकटेशं रमायुक्तं भक्तरक्षणतत्परम् ॥ ५४ ॥ सूत उवाच ॥ पठति हरिचरित्रैर्युक्तमध्यायमेतत् सकलदुरितराशिध्वंसिभिः सर्वभक्त्या ॥ इह जगति स भुक्त्वा सर्वभोगांस्ततोंऽ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते व्रजति भगवतः श्रीवासुदेवस्य धाम ॥ ५५ ॥ स्तोत्रं यत्कथितं पूर्वं तस्य पाठफलं महत् ॥ श्रवणाच्च परं सौख्यं लभते नात्र संशयः ॥ ५६ ॥ इति श्रीदेवालयग्राममाहात्म्ये पंचमोऽध्यायः ॥ ५ ॥ सूत उवाच ॥ निर्गत्य पर्वतात्तूर्णं कृष्णवेणामतीत्य हि ॥ गोदावरीं विलंघ्याथ तीर्थं तीर्थं स्मरन् हरिम् ॥ ॥ १ ॥ अथ विष्णुगयाप्राप्तं कुंडं लोणारसंज्ञितम् ॥ यत्र स्नात्वा च पीत्वा च मुच्यते बंधनान्नरः ॥२॥ अथ मेघंकरे ग्रामे सुशुभे पर्यटंस्ततः ॥ यत्र शार्ङ्गधरः साक्षादास्ते लक्ष्मीपतिः स्वयम् ॥ ३ ॥ त्रिविक्रमवपुः श्रीमान् श्यामलः कोमलद्युतिः ॥ तस्यास्ते मुकुटे साक्षात् शार्ङ्गपाणिः परः पुमान् ॥ ४ ॥ प्रणीतायास्तटे रम्ये मेखलासंज्ञकं शिवम् ॥ तीर्थं तस्मिन्गणेशस्तु वर्तते विघ्नहारकः ॥ ५ ॥ तत्क्षेत्रे नरसिंहस्य दर्शनान्मुच्यते नरः ॥ तत्र पूजादिकं कृत्वा रात्रौ निद्रामवाप ह ॥ ६ ॥ स्वप्ने गणेशेनाज्ञप्तस्त्वमेहि मम दर्शने ॥ अहं तिष्ठामि सततं सदने राजपूर्वके ॥ ७ ॥ जागृतः प्रातरुत्थाय नमस्कृत्य परेश्वरम् ॥ जजाप परमं मंत्रं जयपूर्वं गजाननम् ॥ ८ ॥ प्राप्तो दिनद्वयेनैव तीर्थं गाणेशसंज्ञके ॥ स्नात्वा

विष्णुगयासकाशात् गंगाधारा आगता सा यत्र पतति तत्कुंडं पानयोग्यं ततोऽधः दैत्यसंयोगात् क्षारोदकं जातं पानानर्हम् ॥ २ ॥ अश्वमेधकरे ग्रामे इति पाद्म उत्तरखंडे । प्राकृतभाषया ह्यैकरं पासिद्धम ॥ ३ ॥ + राजूरग्रामे ।

मंदारदूर्वाभिः शमीपत्रैरपूजयत् ॥ ९ ॥ स तत्र त्रिदिनं स्थित्वा परिपूज्य गणाधिपम् ॥ पूर्वां दिशं जगामैव गणराजस्य शासनात् ॥ १० ॥ ऊर्जशुक्लप्रतिपदि ग्रामं देवालयाभिधम् ॥ वृक्षैर्नानाविधैर्व्याप्तं परिखाभिश्च मंडितम् ॥ ११ ॥ दीर्घिकाभिः परिवृतं बहुकूपैः सुशोभितम् ॥ तत्र वर्णाधर्मपराः सौजन्यगुणशालिनः ॥ १२ ॥ वैदिका न्यायमीमांसाशब्दशास्त्रविचक्षणाः ॥ वेदांतनिरताः केचित् केचित्पौराणिका मुने ॥ १३ ॥ केचिद्धरेः कीर्तने च गानशास्त्रे सुपंडिताः ॥ एवं तन्नगरं ख्यातं पृथ्व्यां सर्वगुणालयम् ॥ १४ ॥ आम्नायाख्यानदीतीरे परितश्च सुशोभितम् ॥ व्यंकटेशागमोऽत्रैव ज्ञात्वा संतः समास्थिताः ॥ १५ ॥ देवशर्मा तत्र गत्वा मध्याह्ने तृषितोऽनघः ॥ ग्रामात्पश्चिमदिग्भागे कूपो यः संस्थितः किल ॥ १६ ॥ तस्मिन् कुंभं समुत्सृज्य गुणेन सह वै द्विजः ॥ यावदुद्धर्तुकामस्तं तावद्भरुरजायत ॥ १७ ॥ किमर्थं मे गुरुः कुंभः सहसा विचकर्ष ह ॥ कुंभेन सहिता साध्वी दृष्टा भाग्यवती पुनः ॥ १८ ॥ किमिदं किमिदं जातमिति हर्षान्ननर्त ह ॥ सा पत्युः पादयोर्लग्ना सानंदाश्रुमुखी बभौ ॥ १९ ॥ तेनाश्लिष्टा सुखं पृष्टा मृतायाः कथमागमः ॥ भाग्यवत्युवाच ॥ भवदन्वेषणे युक्ता कूपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमसि तद्वने ॥ २० ॥ पतिता जलदेव्याहं तारिता कमलाज्ञया ॥ भवदागमने वाणीस्तंभोऽभून्मम वल्लभ ॥ २१ ॥ अद्य लक्ष्मीपतेर्वाण्या जलदेव्या सहागता ॥ जलार्थं पात्रमुत्सृष्टं त्वया तन्मम सन्निधौ ॥ २२ ॥ हस्ते दत्तं धारयेति गच्छोर्ध्वं क्षिप्तवत्यसौ ॥ तेनागता बहिः प्राणनाथ मे भाग्यमुद्गतम ॥ ॥ २३ ॥ व्यंकटेशो दयासिंधुः भक्तकार्यं करोत्यसौ ॥ देवशर्मोवाच ॥ अत्र प्राप्ता मया यस्मान्मृता त्वं कुंडमध्यतः ॥ २४ ॥ अमृतं तीर्थमिति वै लोके ख्यातिं गमिष्यति ॥ अत्र स्नानेन दानेन पानेन च शुचिस्मिते ॥ २५ ॥ रोगाः सर्वे विनश्यंति दुःखकंड्वादयः परे ॥ इति दत्त्वा वरं तत्र जगाम ग्राममध्यतः ॥ २६ ॥ भक्तरक्षाकरो यत्र गणपः पार्वतीशिवौ ॥ तत्र प्राप्तौ दंपती च बहुलोकाः समागताः ॥ २७ ॥ कुत्रत्यौ कुत आयातौ किन्नामवर्णजाविति ॥ पृष्टौ सर्वैः प्रेमयुतैः परमेशकृपावरात् ॥ २८ ॥ कथां कथयति प्रेम्णा देवशर्मणि भो मुने ॥ चत्वारो राक्षसाः प्राप्ताः कूपात्पुत्रस्नुषायुताः ॥ २९ ॥ देवशर्माणमूचुस्ते गृह्यतां गृह्यतामिमे ॥ सभार्यौ पुत्रवर्यौ ते पश्य मातर्नमोस्तु ते ॥ ३० ॥ यमुनां रुक्मिणीं दृष्ट्वा माधवं कृष्णमेव च ॥ आनंदाश्रुयुतौ जातौ स्वांके गृह्य मुदान्वितौ ॥ ३१ ॥ ते नमस्कृत्य पितरावपराधक्षमापनम् ॥ याचतू राक्षसा ऊचुर्दुष्टप्रज्ञकृतं मलम् ॥ ३२ ॥ वृद्धायाः कपटं सर्वं तेन दुःखमनंतरम् ॥ भवद्भिरुपेयंबुलीर्निंदा कृता लक्ष्म्यास्तिरस्कृतिः ॥ ३३ ॥ अतो बहुतरं कष्टं श्रीदेवी भक्तवत्सला ॥ तयाज्ञप्ता वयं विप्र चतुर्णां हरणे किल ॥ ३४ ॥ वयं न मारकाः स्वामिन् स्वभावभक्षका वयम् ॥ एतेषां हरणं कृत्वा हृदये वायुरूपिणः ॥ ३५ ॥ प्रविश्य दुःस्वभावो वै भक्षितो मातुराज्ञया ॥ सुभावाः पूर्वमेते हि दुष्टानां संगतेन यत ॥ ३६ ॥ जातं दुर्वृत्तमखिलं नाशितं बहुयत्नतः ॥ सर्वेषां सुखमग्रे वै भविष्यति न संशयः ॥ ३७ ॥ अकस्मात् शुश्रुवुर्वाणीं गगनाज्जातविस्मयाः ॥ यस्माद्बाला निर्गताश्च तत्तीर्थं बालसंज्ञकम् ॥ ३८ ॥ अयं बालेश्वरो देवो ढुंढिराजो गणेश्वरः ॥ गतानर्थान् ढुंढयति पुत्रदानाद्धि नाम तत् ॥ ३९ ॥ अत्र पूजनमाहात्म्यात्पुत्रप्राप्तिर्भविष्यति ॥ ढुंढिराजगणेशस्य बालेश्वरशिवस्य च ॥ ४० ॥ एकविंशल्लक्षदूर्वा बिल्वैकादशलक्षकम् ॥ ४१ ॥ यः समर्पयति प्रेम्णा तन्मंत्रजपतत्परः ॥ एकमंडलमध्ये च कर्म कार्यं प्रयत्नतः ॥ ४२ ॥ पंचाशद्दिनमानं तु न्यूनमेकेन मंडलम् ॥ बालानां दानभावाद्धि शिवं बालेश्वरं विदुः ॥ ४३ ॥ बाला सा पार्वती ख्याता रुक्मिणी यमुना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा ॥ आसां कल्याणकर्तृत्वात्तन्नाम्ना विष्णुरेव स ॥ ४४ ॥ देवशर्मन् पुरो गच्छ दिशं त्वमुत्तरां त्वर ॥ वाणीं तां गगनाच्छ्रुत्वा लोका विस्मयमागताः ॥ ४५ ॥ तान् सर्वान् प्रार्थयामासुर्भोजनार्थं द्विजोत्तमाः ॥ तथास्त्विति समुच्चार्य जग्मुस्ते दिशमुत्तराम् ॥ ४६ ॥ सिद्ध्या बुद्ध्या युतो राजसदनस्थो विनायकः ॥ समीपं तस्य ते गत्वा साष्टांगं प्रणतिं मुदा ॥ ४७ ॥ चक्रुः प्रेम्णैकभावेन देवशर्माब्रवीदिदम् ॥ भो गणेश नमस्तुभ्यं त्वदाज्ञा पालिता मया ॥ ४८ ॥ एकं न्यूनं मम स्वामिन् त्वं पूरय मनोरथम् ॥ भार्यापुत्रस्नुषाणां यो योगोऽयं येन कारितः ॥ ४९ ॥ तस्य दर्शनमत्रैव जातं चेत्सुखदं भवेत् ॥ व्यंकटेशेन देवेन सर्वेषां दर्शनं यदि ॥ ५० ॥ दत्तं भवति हेरंब किमानंदः परस्ततः ॥ भार्यापुत्रादय ऊचुः ॥ सत्यं वदसि भो नाथ भोजनं दर्शनं विना ॥ ५१ ॥ करिष्यामो नच वयमित्युक्त्वा प्रणताः स्थिताः ॥ साष्टांगं प्रणिपत्याथ वह्निदिङ्मुखशोभितां ॥ ५२ ॥ सर्वे ते स्वांजलिं बद्ध्वा प्रेमभक्त्या प्रपूरिताः ॥ जय देव रमानाथ व्यंकटेश परात्पर ॥ ५३ ॥ भक्तकामप्रपूरस्त्वं पतितोद्धारकः सदा ॥ व्यंकटेश जगन्नाथ व्यंकटेश सुतप्रद ॥ ५४ ॥ व्यंकटेशाबलादानकारिणे ते नमो नमः ॥ व्यंकटेश सुषादत्त व्यंकटेश सुखप्रद ॥ ५५ ॥ लक्ष्मीपते देवदेव व्यंबुलीप्रियदर्शन ॥ गणेशरूप भगवन् दर्शनं देहि ते नमः ॥ ५६ ॥ सर्वं मम कृतं भद्रमनाथस्याजितात्मनः ॥ न्यूनं पूरय भक्तेश वचनं यत्त्वयेरितम् ॥ ५७ ॥ स्मृतिमात्रादागतोऽहं पूरयिष्ये मनोरथम् ॥ आगच्छ देवदेवेश लक्ष्म्या सह जगत्पते ॥ ५८ ॥ भूदेव्या गरुडेनैव भक्तैस्तीर्थैरिह प्रभो ॥ हनूमता पर्वतेन सुखं मे देहि वत्सल ॥ ५९ ॥ प्रत्यहं दर्शनं मे स्यात्तेनानंदो भविष्यति ॥ भार्यापुत्रादिकानां वै कुरु पूर्णं मनोरथम् ॥ ६० ॥ इत्युक्त्वा सर्व एवैते साष्टांगं प्रणतास्तदा ॥ जयजयेत्यूचुरुच्चैर्मुहुर्मुहुरनाविलम् ॥ ६१ ॥ इति स्तुतिं समाकर्ण्य देवदेवो रमाधवः ॥ व्यंकटेशः प्रादुरासीन्मध्ये तेषां महात्मनाम् ॥ ६२ ॥ श्रीलक्ष्मीरपि भूदेवी हनुमान् गरुडस्तथा ॥ यस्य सूर्यसमं तेजश्चंद्रादपि सुशीतलम् ॥ ६३ ॥ देवदुंदुभयो नेदुः पुष्पवर्षं पपात च ॥ गगनं देवताव्याप्तं यक्षगंधर्वकिन्नराः ॥ ६४ ॥ रुद्राः साध्याश्च विश्वे च मरुद्गणयुता जगुः ॥ गंधर्वैर्गानमारब्धं रंभाद्या ननृतुर्वतु ॥ ६५ ॥ आनंदेन समायुक्तं सर्वं ब्रह्माण्डमानसम् ॥ देवालयग्राममध्ये स्वानंदस्य निधिर्बभौ ॥ ६६ ॥ सर्वैर्नमस्कृतो देवो वरं ब्रूहीत्युवाच तम् ॥ देवशर्मोवाच ॥ अत्रैव तिष्ठ देवेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तकामप्रपूरकः ॥ ६७ ॥ सर्वे देवाः सेवकास्ते तिष्ठंतु तव सन्निधौ ॥ व्यंकटेश उवाच ॥ तवेच्छापूरणं कार्यं मया सत्यं न संशयः ॥ ६८ ॥ अत्र तिष्ठामि भद्रं ते लक्ष्म्यादिसंयुतः खलु ॥ ये भजिष्यंति मामत्र तेषां कार्यं भविष्यति ॥ ६९ ॥ अद्यप्रभृति मत्पूजा त्वया कार्या सुभक्तितः ॥ मम स्थाने यानि यानि तीर्थानि दैवतानि च ॥ ७० ॥ तानि सर्वाण्यागतानि पापहारीणि सर्वशः ॥ कालेन तानि गुप्तानि भविष्यंति द्विजोत्तम ॥ ७१ ॥ एतत्कलियुगं यस्मात् पापवृद्धिर्हि कारणम् ॥ तदा गुप्तान्यपि मुने पुनर्वृद्धिं गतानि हि ॥ ७२ ॥ मम वासात्तव प्रीत्या रूपेणान्येन वृद्धिता ॥ यत्र गुप्तं तीर्थवरं लोकार्थे वरदोऽस्म्यहम् ॥ ७३ ॥ तत्रैवान्येन खनितः कूपः ख्यातिं गमिष्यति ॥ तत्तीर्थं पण्डितो ज्ञात्वा स्नानदानादिकार्यकृत् ॥ ७४ ॥ अपण्डितो महामूर्खः कूपमित्येव भावनाम् ॥ करिष्यति न विश्वासो पापवृद्ध्या भवेदिदम् ॥ ७५ ॥ अद्यैव मे त्वया यस्मात् स्मरणं कृतमंजसा ॥ दर्शनं ते मया दत्तमद्यैव स्थापनं कुरु ॥ ७६ ॥ अज्ञानां नैव प्रत्यक्षस्तव दृश्यः क्षणे क्षणे ॥ मया दत्ता इमा मूर्तीः गृह्य त्वं स्थापनां कुरु ॥ ७७ ॥ सर्वैर्जनैः सह ब्रह्मन् स्थापनं सुखदं भवेत् ॥ कामादिग्रस्तोऽन्वयजोऽर्चनकृन्ना-

शमेष्यति ॥ ७८ ॥ इत्युक्त्वा प्रतिमां दत्त्वा भार्याद्वययुतस्य च ॥ अंतर्धानं गतः श्रीमान् मूर्त्यामेव दयानिधिः ॥ ७९ ॥ देवशर्मा देवगृहे सर्वैः सुस्थापयच्च ताः ॥ पूजां बहुविधां कृत्वा सर्वानभोजयत्सुधीः ॥ ८० ॥ सर्वे द्विजास्तत्र गत्वा साहाय्यं सकलत्रकाः ॥ कृत्वा भोज्यं बहुविधं भोजनं मिष्टमेव च ॥ ८१ ॥ चक्रुः संध्यां ततः कृत्वा देवारार्तिक्यमेव च ॥ तीर्थप्रसादयोर्दानं सर्वेषां माधवो ददौ ॥ ॥ ८२ ॥ रुक्मिणी यमुना भाग्यवती स्त्री कुंकुमादिकम् ॥ स्त्रीणां दत्त्वानंदयुता बभूवुः सर्व एव हि ॥ ८३ ॥ वेदपाठं पवित्रं च चक्रुस्ते सर्वशाखिनः ॥ भजनं देवतानिद्राविधिं कृत्वा गृहं गताः ॥ ८४ ॥ देवशर्मा तु तत्रैव कल्पयित्वा गृहं स्वयम् ॥ निद्रां चकार मेधावी चिन्तयन् हृदये हरिम् ॥ ८५ ॥ मुहूर्ते ब्राह्म उत्थाय स्नानं कृत्वा हरिं गतः ॥ घंटादिवाद्यसंघेन स्तुत्या नामग्रहेण च ॥ ८६ ॥ देवमुत्थाप्य यत्नेन स्वारार्तिक्यं ददौ मुदा ॥ पुत्रावाज्ञापयामास भवद्भ्यां प्रेमभावतः ॥ ८७ ॥ कार्यं प्रतिदिनं भक्त्या तंद्रया रहितौ सुतौ ॥ वस्त्रं धनं वा धान्यं वा देवस्याग्रे समर्पितम् ॥ ८८ ॥ ग्रहणे नैव दोषो वामीश्वराज्ञाप्रभावतः ॥ माधवेनैकदिवसे कृष्णेनान्यदिने तथा ॥ ८९ ॥ कार्यः पूजाविधिः सम्यक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वं यो मुद्गलाच्छ्रुतः ॥ सूत उवाच ॥ एवं प्रतिदिनं तत्र महदुत्सवभाजनम् ॥ ९० ॥ स्थितं जातम-
चिन्त्यं च सर्वकामप्रपूरकम् ॥ तदादिः सा तिथिः ख्याता कार्तिके शुक्लपक्षता ॥ ९१ ॥ प्रतिसंवत्सरं
तत्र द्विजभोजनमुत्तमम् ॥ उत्सवारंभणे श्रेष्ठा पूज्या सर्वमनीषिभिः ॥ ९२ ॥ पृथिव्यामतिविख्यातं
सर्वतीर्थयुतं स्थलम् ॥ तत्र लीलां प्रभुः कुर्वन् मानवीं सुखदः स्थितः ॥ ९३ ॥ दानं ददाति गृह्णाति
संकल्पं पूरयत्यपि ॥ किं वर्णयामि भवतां माहात्म्यं व्यंकटेशजम् ॥ इदं संश्रुत्य चरितं कार्यसिद्धौ
न संशयः ॥ ९४ ॥ अध्यायपठनादेव व्यंकटेशप्रसन्नता ॥ भाजनं सर्वसिद्धीनां जायते नात्र संशयः ॥ ९५ ॥
प्रातरुत्थाय शौचादिकृत्यं संपाद्य यत्नतः ॥ स्नानं संध्यां जपं पूजां ब्रह्मयज्ञं च तर्पणम् ॥ ९६ ॥ कृत्वा
तिष्ठन् प्रभोरग्रे निरीक्षन् प्रणतः प्रभुम् ॥ इमां कथां पठन् भक्त्या व्यंकटेशप्रियो भवेत् ॥ ९७ ॥
यद्यदिच्छति चित्ते स तत्तदाने प्रभुर्हि सः ॥ एवं यो वेत्ति देवेशं सर्वे देवास्तु किंकराः ॥ ९८ ॥ इति
श्रीब्रह्मांडपुराणे मानसोत्तरभागे व्यंकटेशाविर्भावो नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ ऋषय
ऊचुः ॥ संशयं सूत नो छिंधि देवशर्मा सुतौ वचः ॥ प्राह यत्प्रेमभरितं देवस्वग्रहणेऽनिशम् ॥ १ ॥

धनधान्यादिकं ग्राह्यं तत्र संशय एव नः ॥ देवलत्वं प्राप्तमेव दोषदं पापकारणम् ॥ २ ॥ तत्कथ
तेन पुत्राभ्यां कृतं कर्म वदस्व नः ॥ सूत उवाच ॥ सर्वपापहरा प्रोक्ता विष्णोराज्ञा गरीयसी ॥ ३ ॥
स्वतंत्रो भगवानेष अयुक्तं नहि भाषते ॥ अतो दैवलको दोषः नतु स्यादेवशर्मणः ॥ ४ ॥ त्वं तु मत्पू-
जनं कृत्वा धनादिग्रहणेऽपि च ॥ देवलत्वं न भवतरितीश्वरवचोऽनघम् ॥ ५ ॥ देवलत्वमिदं वत्स न

ईश्वरः यां आज्ञां ददाति यद्भक्ति करोति तत्सर्वं प्रमाणजन्यमेव इति सिद्धांतः ॥ ३ ॥ अनघं निष्पापं देवशर्माणं भगवदाज्ञा
सिद्धा ॥ ४ ॥ ५ ॥ सर्वशास्त्रग्रंथेषु देवलकलक्षणं उक्तं तद्विवेकेन ईश्वरवाक्यं सत्यमेव भाति । स्मृतिरत्नाकरे आश्वमेधिके । देवार्चनपरो
विप्रो वित्तार्थी वत्सरत्रयम् ॥ स वै देवलको नाम सर्वधर्मबहिष्कृतः ॥ इति । संकर्षणसंहितायां । कर्मदेवलकाः केचित्कल्पदेवलकाः
परे ॥ शुद्धदेवलकाः केचित्त्रिधा देवलकाः स्मृताः ॥ १ ॥ आगमोक्तविधानज्ञो रुद्रकाल्युपजीवकाः ॥ शुद्धदेवलको नाम सर्वकर्म
विगर्हितः ॥ २ ॥ पंचरात्रविधानज्ञो दीक्षाविरहितोऽर्चकः । चतुर्वेदाधिकारोऽपि कल्पदेवलकः स्मृतः ॥ ३ ॥ अर्थार्थी कालनिर्दे-
शी यो देवं पूजयेत्सदा ॥ कर्मदेवलको नाम सर्वकर्मबहिष्कृतः ॥ ४ ॥ इमे देवलका निन्द्या एव । विष्णुधर्मोत्तरे । चंडिकायाश्च
दुर्गाया ज्येष्ठाया भैरवस्य च ॥ रुद्रस्य पूजका ये तु ते वै देवलकाः स्मृताः ॥ १ ॥ पुराणे तु । देवार्चनपरो ह्यासीत्परार्थं वित्त-
कांक्षया ॥ चतुर्वेदधरो विप्रः स चांडलसमो भवेत् ॥ १ ॥ इत्यनेन वाक्यजालेन नियमितवेतनं गृह्य पूजको देवलकः । ये ब्राह्म-
णाः प्रतिदिनं श्रीमतां आलासिनां पूजाविरहितानां अन्यक्षुद्रव्यापारसक्तानां गृहेषु नियामतद्रव्यसंकेतेन पूजाकर्तारो देवलकाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषाय भविष्यति ॥ ममाज्ञापालनं धर्मः सर्वाधर्माधिकः स्मृतः ॥ ६ ॥ ऋषय ऊचुः ॥ तव वाक्यामृते-
नैव भवामो गतसंशयाः ॥ यदि नासीद्देवलकः प्रसिद्धः केन शर्मणा ॥ ७ ॥ लोके जातो वदस्वाद्य सूत

तथा देवालये पूजकाश्च ज्ञेयाः ॥ शिवसूर्यगणेशदुर्गाणां निर्माल्याद्यग्राह्यमित्यादिवचनानि संति परं तदेवापि प्रसादबुद्ध्या ग्रहणे शास्त्राज्ञा वर्तते । शिवप्रसादग्रहणे धर्मसिंधौ तृतीयपरिछेदपूर्वार्धे स्कांदादिषु च द्रष्टव्यं श्रीगणेशप्रसादस्वीकारः स्कांदे हेरंबदुर्गे स्पष्टः ॥ देव्या नैवेद्यभक्षणाज्ञा देवीभागवते स्कंधे दत्ता । सूर्यनिर्माल्यस्वीकरणं भविष्ये ब्राह्मपर्वाणि बुद्धिगोचरं कर्त्तव्यम् । विष्णोर्विषये तु । शालग्रामशिलासंगात्सर्वं याति पवित्रताम ॥ इति विष्णुपूजायां दोषाभावः । देवलकत्वमपि न । लोभादिनापि विष्णोः देवालये पूजाकर्तुरदोषः । संकर्षणसंहितायां स्मृतिरत्नाकरे । आर्षोक्तेन विधानेन देवलत्वं न विद्यते ॥ तस्मात्सर्वप्रय-त्नेन वैदिकेनैव पूजयेत् ॥ अत्रिः । वैदिकेनैव विधिना दंभलोभविवर्जितः ॥ पूजयेद्भक्तितो विष्णुं स हि देवलको नहि ॥ १ ॥ इति विष्णुधर्मोत्तरे । येन केन प्रकारेण विष्णोराराधनं परम् ॥ तस्य देवलकत्वं तु न विष्णुविषये क्वचित् ॥ १ ॥ भविष्ये ब्राह्म-पर्वणि । स्वपूजार्थं भोजकः सृष्टः तेन सर्वं ग्राह्यं पूजा कर्तव्या शुद्धः इत्यादि वरो दत्तः । तस्मात्पूजाकाले दंभलोभविवर्जितो भू-त्वा पूजा कार्या । भक्तदत्तं देवस्याग्रे धनादि अलोभेन ग्राह्यं सक्तिर्न कार्येत्यर्थः । लोभात् गृह्णतोऽपि दोषाभावः । येन केन प्रकारेणेत्युक्तत्वात् धर्मसिंधौ तृतीयपरिछेदोत्तरार्धे देवलकलक्षणमुक्त्वा इदं मनुष्यस्थापितदेवताविषयमिति भाति । इति उक्तम् । अतः देवलत्वं न अन्यच्च सततं वर्षत्रयपर्यंतं यः पूर्वोक्तविधिना अवैदिकेन पूजकः स देवलः । अस्मिन्नर्थे प्रमाणं लोकाचार एव अत एव देवतास्थलेषु अष्टदिने मासे वर्षे पूजायां अन्यः अन्यः भवति ॥ ६ ॥

सूत महामते ॥ सूत उवाच ॥ व्यंकटेशः प्रभुरयं सर्वजीवनियामकः ॥ ८ ॥ नामरूपात्मकं सर्वं स्थावरं जंगमं यतः ॥ स्वमुखेनैव यन्नाम कृतं तस्य महात्मनः ॥ ९ ॥ तत्प्रवक्ष्यामि शृणुत मुनयो वीतक-ल्मषाः ॥ भगवानाह तं प्रीत्या न च देवलको भवान् ॥ १० ॥ गोसावीति मया दत्तं तव नाम सदा वरम् ॥ ददामि ते वरं चान्यं प्रीत्यर्थं तव सत्तम ॥ ११ ॥ भोजनं भूषणं वस्त्रं भक्तदत्तं करात्तव ॥ गृह्णामि सततं प्रीत्या यदहं प्रेमवत्सलः ॥ १२ ॥ इति श्रुत्वा वचस्तस्य सर्वे लोकाः सुविस्मितः ॥ गोसावीति पदेनासौ प्रसिद्धः समजायत ॥ १३ ॥ ऋषय ऊचुः ॥ गोसावीति पदस्यार्थो वर्तते यदि शंसय ॥ अद्भुतं नाम संश्रुत्य श्रवणेच्छा प्रवर्तते ॥ १४ ॥ सूत उवाच ॥ वक्ष्यामि भवतामर्थं नाम्नः प्रभुकृतस्य हि ॥ धरणी गा समाख्यातो रक्षणं संप्रकीर्तितः ॥ १५ ॥ सा च लक्ष्मीर्बुधैः प्रोक्ता गोसे हि कथिते मया ॥ ताभ्यां युक्तः प्रभुरयं भार्याभ्यां सर्वदा स्थितः ॥ १६ ॥ वी विष्णुरिति विख्यातः

गा च ऊश्चासौ सा च गोसा गा पृथ्वी ऊः रक्षणकर्त्री सा लक्ष्मीः गोसा ताभ्यां युतः वी विष्णुः इति गोसावी । गा क्ष्मा गा च रमा । वी विष्णु वुः पदातिः स्यात् इति मातृकाविलासे सौभरिः । सा च लक्ष्मीर्बुधैः प्रोक्ता इत्येकाक्षरः । रक्षार्थवाच-कावेतौ व्याख्यातौ लघुदीर्घकौ । इत्येकाक्षरीनाममाला । ख्यातो ऊ इति पदच्छेदः कार्यः । पृथ्वीलक्ष्मीभ्यां युतः विष्णुरित्यर्थः ॥ १६ ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वनाम प्रभुणार्पितम् ॥ ऋषय ऊचुः ॥ धन्यो धन्यो देवशर्मा भाग्यं तस्य महत्खलु ॥ १७ ॥ किं वर्ण्यं
देवदेवेन स्वस्वरूपः कृतः स्वयम् ॥ अन्यद्वद महाभाग देवपूजाकरान् जनाः ॥ १८ ॥ पूजारिरिति
वक्ष्यंति तदर्थश्रवणोत्सुकाः ॥ पूजायाः शत्रुरित्युक्तावर्चनस्य फलं गतम् ॥ १९ ॥ अतः संशयमापन्नं
चित्तं निर्विषयं कुरु ॥ सूत उवाच ॥ पूर्वं या तु कृता पूजा गता निर्माल्यतां यदा ॥ २० ॥ तस्या अरिः
समाख्यातो निर्माल्यापनयाद्धरेः ॥ पुण्यं भवत्यतः सूर्योदयात्प्राक् कार्य एव सः ॥ २१ ॥ पूजायां
भृंगवद्गुन्धो रलाभेदेन कीर्तितः ॥ पूजायां पंक्तयो यस्मिन् पूजालिस्तेन कीर्त्यते ॥ २२ ॥ पूजालिरिति
वक्तव्ये पूजारिः कथितो जनैः ॥ अभिप्रायोऽस्य पूजायां विशदोऽस्य सदा स्थितः ॥ २३ ॥ तेन पूजा-
लिरित्युक्तिः सर्वदा सम्मता सताम् ॥ इत्युक्तवचनं सूतमृषयः कंठचालनैः ॥ २४ ॥ मानं कृत्वा ब्रुवन्
सर्वे धन्याः स्म इति वादिनः ॥ यत्र श्रीव्यंकटेशस्य वासः श्रीभूयुतस्य च ॥२५॥ तत्र सर्वाणि तीर्थानि
देवता ऋषयः परे ॥ कानि तीर्थानि के देवास्तत्र तिष्ठंति नो वद ॥ २६ ॥ सूत उवाच ॥ तत्र तीर्थानि
रम्याणि संख्याहीनानि संति हि ॥ सर्वेषां वर्णने शक्तिः सहस्रवदनस्य न ॥ २७ ॥ मुख्यमुख्येषु

मुख्यानि देवप्रीतिकराणि च ॥ श्रवणादेव नश्यंति पापानि सुमहांत्यपि ॥ २८ ॥ शृण्वंतु कथयिष्यामि
गुरोर्व्यासाच्छुतानि भो ॥ इति श्रीदेवालयग्राममाहात्म्ये सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥
सूत उवाच ॥ तीर्थानां शृणुत प्राज्ञाः माहात्म्यं पापनाशनम् ॥ श्रवणात्पठनाच्चापि व्यंकटेशप्रस-
न्नता ॥ १ ॥ धन्योऽसि त्वं मुनिश्रेष्ठ त्वमेव वैष्णवाग्रणीः ॥ यतः समस्तलोकानां हितं वाञ्छसि सर्वदा॥
॥ २ ॥ शृणु शौनक वक्ष्यामि यत्त्वया श्रोतुमिच्छितम् ॥ सर्वलोकहितार्थाय वैष्णवानां विशेषतः ॥३ ॥
पृष्टो जैमिनिना व्यासो यदुवाच शृणुष्व तत् ॥ महर्षिर्जैमिनिर्नाम योगाभ्यासरतः सदा ॥ ४ ॥ प्रणम्य
शिरसा व्यासं पप्रच्छ मुनिसत्तमः ॥ जैमिनिरुवाच ॥ भगवन् सर्वधर्मज्ञ व्यास सत्यवतीसुत ॥ ५ ॥
कलौ कस्मान्भवेन्मोक्षस्तन्ममाचक्ष्व मूलतः ॥ महर्षे व्यास सर्वज्ञ कलिकाले समागते ॥ ६ ॥ केनो-
पायेन भगवन् भूरिभक्तिर्भवेन्नृणाम् ॥ कलौ सर्वे भविष्यन्ति पापकर्मरता जनाः ॥ ७ ॥ वेदविद्याविहो-
नाश्च तेषां श्रेयः कथं भवेत् ॥ कलावन्नगताः प्राणाः लोकाः स्वल्पायुषस्तथा ॥ ८ ॥ निर्धनाश्च भवि-
ष्यन्ति नानाकपटकारिणः ॥ प्रयाससाध्यं सुकृतं शास्त्रेषु कथितं गुरो ॥ ९ ॥ तस्मात्केऽपि करिष्यन्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलौ न सुकृतं जनाः ॥ सुकृत्येषु विनष्टेषु प्रवृत्ते पापकर्मणि ॥ १० ॥ सवंशाः प्रलयं सर्वे गमिष्यन्ति दुराशयाः ॥ स्वल्पश्रमैरल्पवित्तैरल्पकालैश्च सत्तम ॥ ११ ॥ यथा भवेन्महत्पुण्यं तद्वै कथय भो गुरो ॥ यस्योपदेशतः पुण्यं पापं वा कुर्वते जनाः ॥ १२ ॥ स तद्भागी भवेन्मर्त्य इति शास्त्रेषु निश्चितम् ॥ पुण्योपदेशः सदयः कैतवैश्च विवर्जितः ॥ १३ ॥ पापमार्गविरोधी च चत्वारः केशवोपमाः ॥ ज्ञानं संप्राप्य संसारे यः परेभ्यो न यच्छति ॥ १४ ॥ ज्ञानरूपी हरिस्तस्मै प्रसन्न इव नेक्षते ॥ ज्ञानरत्नैश्च रत्नैश्च परसंतोषकृन्नरः ॥ १५ ॥ स ज्ञेयः सुमतिर्नूनं नररूपधरो हरिः ॥ त्वमेव मुनिशार्दूल वेदवेदांग-पारगः ॥ १६ ॥ त्वदृते न हि वक्तान्यस्त्वं हि नारायणांशजः ॥ इहामुत्र फलं येन लभ्यते स्वल्पकर्मणा ॥ ॥ १७ ॥ तीर्थं दानं व्रतं वापि व्यंकटेशस्य यत्प्रियम् ॥ प्रचक्ष्व मे महाभाग सर्वलोकहिताय च ॥ १८ ॥ सूत उवाच ॥ जैमिनेर्वचनं श्रुत्वा व्यासः संतुष्टमानसः ॥ प्रारेभे मुनिशार्दूल कथां मंगलसंयुताम् ॥ १९ ॥ व्यास उवाच ॥ जैमिने मुनिशार्दूल धन्योऽसि त्वं महामते ॥ व्यंकटेशकथां श्रोतुं यतो वाञ्छसि सर्वदा ॥ २० ॥ सत्कथाश्रवणे बुद्धिर्यस्य यस्य प्रवर्तते ॥ तस्य तस्य भवेज्ज्ञानं ज्ञानं मोक्षप्रदं विदुः ॥ २१ ॥

व्यंकटेशकथायां यो रेकते पापभागिह ॥ वृथैव सृष्टिर्विधिना भूमिर्भारवती यतः ॥ २२ ॥ यस्मिन्दिने मुनिश्रेष्ठ न श्रुता वैष्णवी कथा ॥ तद्दिनं दुर्दिनं मन्ये घनच्छन्नं न दुर्दिनम् ॥ २३ ॥ व्यंकटेशकथारंभे विघ्न-कृन्मानवो यदि ॥ तमेव शपते देवः तस्माच्छृणु मुनेऽनघ ॥ २४ ॥ इति श्रीदेवालयग्राममाहात्म्ये अष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ व्यास उवाच ॥ सृष्टेरादौ महाविष्णुः सिसृक्षुः सकलं जगत् ॥ स्रष्टा पाता च संहर्ता त्रिमूर्तिरभवत्स्वयम् ॥ १ ॥ अत्र भेदो न कर्तव्यः भेदकृन्नारकी भवेत् ॥ ब्रह्मा ससर्ज जगन्ति भूतग्रामाण्यनेकशः ॥ २ ॥ तेषां शिवार्थमसृजत् क्षेत्राणि वि-विधानि च ॥ काशीप्रभृति शैवाणि सौराणि कानिचिन्मुने ॥ ३ ॥ देवीगणेशविष्णूनां प्रीति-दान्यवनौ सदा ॥ यत्र स्नानेन दानेन गमनेन स्मृतेरपि ॥ ४ ॥ सुखं भवति सर्वत्र देवदेवप्रसादतः ॥ विष्णुर्भूत्वा व्यंकटेशः परार्थं स्वार्थमेव च ॥ ५ ॥ ससर्ज भारते खण्डे क्षेत्राणि वल्लभानि च ॥ तेषु सर्वेषु श्रेष्ठत्वं नारायणगिरेर्महत् ॥ ६ ॥ तत्रासता भगवता मनसीत्थं विचिन्तितम् ॥ पर्वते दर्शनं दूराद्गरुडारोहणे श्रमः ॥ ७ ॥ भक्तानां सुखदानार्थमन्यत्क्षेत्रं करोमि च ॥ इति संचिंत्य भगवान् व्यंक-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टेशो दयानिधिः ॥ ८॥ दंडकारण्यदेशे वै गोदावर्युत्तरे तथा ॥ पश्चिमे वामनस्याथ गणेशस्य च पूर्वतः ॥ ९ ॥ पूर्णाया दक्षिणे भागे गव्यूतित्रितये कृतम् ॥ देवालयपुरं सिद्धं सर्वक्षेत्रोत्तमोत्तमम् ॥ १० ॥ निर्मितं तत्र वसतिः कलौ जाता महात्मनः ॥ जैमिनिरुवाच ॥ तत्रत्यानि च तीर्थानि कुत्र कुत्र समीरय ॥ ११ ॥ किं फलं कस्य तीर्थस्य को देवस्तीर्थसन्निधौ ॥ व्यंकटेशेन किं तत्र कृतमाश्चर्यदं वद ॥ १२ ॥ श्रवणेच्छा तीव्रतरा वर्तते मम सत्तम ॥ गुरो त्वदन्यो वक्ता न भवान्नारायणः स्वयम् ॥ १३ ॥ श्रीव्यास उवाच ॥ जैमिने शृणु वृत्तांतं श्रवणादेव सिद्धिदम् ॥ इंद्रादिलोकपालानां तीर्थानां दशकं शिवम् ॥ १४ ॥ श्रीतीर्थं शिवतीर्थं च हनुमत्तीर्थमीरितम् ॥ पद्मतीर्थं गदातीर्थं तीर्थं गारुडसंज्ञकम् ॥ ॥ १५ ॥ शंखतीर्थं भूमितीर्थं तीर्थं देव्याः सुसिद्धिदम् ॥ चक्रतीर्थं बाणतीर्थं धनुर्मौसलमेव च ॥ १६ ॥ हलतीर्थं शेषतीर्थं हैरंबं कालभैरवम् ॥ ढुंढिराजगणेशस्य तीर्थं त्रैलोक्यविश्रुतम् ॥ १७ ॥ तीर्थं तु नृहरेः ख्यातं नद्यास्तीरे सुशोभनम् ॥ स्वामिपुष्करिणीतीर्थं सर्वेषामुत्तमोत्तमम् ॥ १८ ॥ अन्यानि तीर्थवर्याणि गंगादीनि वसंति हि ॥ यत्र स्नानेन दानेन पितॄणां श्राद्धकर्मणा ॥ १९ ॥ द्विजानां भोजने-

नैव कल्याणं जायते नृणाम् ॥ एकस्मिन् भोजिते विप्रे फलं कोटिगुणं भवेत् ॥ २० ॥ क्रमेण सर्वतीर्थानां वर्णनं शृणु मानद ॥ हनुमान्देवताज्ञप्तः कर्तुं नगररक्षणम् ॥ २१ ॥ पूर्वादिदिक्क्रमेणैव बाह्याभ्यंतरभेदतः ॥ अष्टधा स्थित एवासावूर्ध्वाधोरक्षणे द्विधा ॥ २२ ॥ दशानां पालकत्वेन देवस्याग्रे स्थितः स्वयम् ॥ हनूमानंजनीसूनुर्वायुपुत्रो महाबलः ॥ २३ ॥ रामेष्टदो जनंकजाशोकहार्यक्षहा मुने ॥ सुग्रीवप्राणदाता च कालनेमिनिकृंतनः ॥ २४ ॥ लक्ष्मणाथ्यौषधीहरो व्यंकटेशार्चनप्रियः ॥ पूर्वाद्याशास्थितस्येह नामान्येतानि मारुतेः ॥ २५ ॥ अस्य पूजाप्रभावेण परकृत्याविनाशनम् ॥ मंदे प्रातः पूजनीयो नरैरात्महितेप्सुभिः ॥ २६ ॥ देवी हनूमता पूर्वं विज्ञप्तः किं करोम्यहम् ॥ रक्षणं कुरु क्षेत्रस्य मम देवालयस्य च ॥ २७ ॥ पूजाकर्तुः सर्वसिद्धिं देहि त्वमविलंबतः ॥ तमाज्ञां शिरसा धृत्वा विघ्ननाशं करोत्ययम् ॥ २८ ॥ ये दुष्टा नगरे पापा देवद्वेषकरा अपि ॥ देवस्वहारिणो ये च द्विजानामपमानिनः ॥ २९ ॥ मात्सर्यगर्वसंयुक्तास्तेषां बुद्धिविनाशकः ॥ अनर्थे जातनिर्बंधाः स एवार्थ इति स्थिताः ॥ ३० ॥ अतो नाशं प्राप्नुवंति तस्माद्दुष्टत्वमुत्सृजेत् ॥ अस्याध्यायस्य श्रवणादभीष्टं फलमा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुयात् ॥ ३१ ॥ इति श्रीदेवालयग्राममाहात्म्ये नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ इंद्रपालितदिग्भागे शक्रतीर्थमितिस्मृतम् ॥ तत्र स्नानेन दानेन वादे जयति विद्विषः ॥ १ ॥ रूपमिंद्रस्य ददतश्चतुष्कर्षसुवर्णजम् ॥ स्नानं वेदविधानेन तंत्रमार्गेण वा कृतम् ॥ २ ॥ फलं ददाति पूर्वोक्तमन्यथा किं भविष्यति ॥ वित्ताशक्तौ ताम्रमूर्तिं यथावत्परिकल्प्य च ॥३ ॥ दद्याद्दानं द्विजातिभ्यो शक्रमंत्रजपं चरन् ॥ तस्योत्पत्तेः कारणं त्वं पूर्ववृत्तं मुने शृणु ॥ ४ ॥ त्रैलोक्यराज्यकर्तासौ सदामत्तः शचीपतिः ॥ अत्युत्तमा सदा स्त्रीणां पातिव्रत्यगुणान्विता ॥५॥ पुलोम्नः कन्यका सा तु जयंतजननी प्रिया ॥ तथापि वृत्रहा विप्रपरस्त्रीकामुकः खलु ॥ ६ ॥ ब्राह्मणक्षत्रियविशां शूद्रादीनां परंतप ॥ उत्तमा या दृष्टिपथं गता शक्रस्य भूसुर ॥ ७ ॥ तत्प्राप्त्यर्थं सदा यत्नं नाना रूपैः करोति हि ॥ अहल्या धर्षिता येन मुकुंदा च ऋषेः प्रिया ॥ ८ ॥ देवशर्मप्रिया साध्वी रुचिरिंद्राद्धि रक्षिता ॥ विपुलेन सुशिष्येण कायगेन यथा जलम् ॥ ९ ॥ पद्मपत्रे निविष्टं हि गुरोराज्ञा न लंघिता ॥ देववेश्याः समालोक्य मोहितोऽभूत्सदैव सः ॥ १० ॥ एकदा मघवा विप्र पूर्वदृष्टामृषिस्त्रियम् ॥ सुंदरां

१ गणेशपुराणे । २ इयं कथा अनुशासनपर्वणि ।

काममत्तोऽसौ धर्षयामास साहसात् ॥ ११ ॥ जमदग्निकुलोत्पन्नां वसिष्ठकुलगां रतिम् ॥ इंद्रो यावत्स्पर्शयति तावद्भर्ता समागतः ॥ १२ ॥ जारं दृष्ट्वा क्रोधपरः कविशर्मा शशाप ह ॥ यस्मात्त्वया कृतं पापमनायुष्यकरं खल ॥ १३ ॥ तस्मात् स्त्रीषु मदो योऽस्ति च्यवनस्थापितः खलु ॥ स त्वां धर्षयिता नित्यं गच्छ दुष्ट शठाधम ॥ १४ ॥ जारकर्मप्रवीणस्त्वं गौतमाच्छापमाप्तवान् ॥ वाचक्र-विऋषेर्भार्यां मुकुंदा धर्षिता त्वया ॥ १५ ॥ देवशर्ममुनेर्जायां रुचिं त्वं गतवानसि ॥ अपमानं परं प्राप्य गतस्त्वं नंदनं वनम् ॥ १६ ॥ तपोविघ्नकरस्त्वं हि स्त्रीमारबलतः सदा ॥ अतस्त्वां स्त्रीमदो दुष्टो ग्रहीष्यति सुराधम ॥ १७ ॥ उक्तमात्रे मदः पृष्ठलग्न इन्द्रः पलायितः ॥ तस्य रूपं शृणुष्व त्वं च्यवनेन यथा कृतम् ॥ १८ ॥ अश्विनोरुपकारार्थं सफलं तौ पुरा मुनिः ॥ सोमं जग्राह सुत्राम्णा निषिद्धः स्तंभयच्च तम् ॥ १९ ॥ ततः कृत्याथ संजज्ञे मुनेस्तस्य तपोबलात् ॥ मदो नाम महावीर्यो बृहत्कायो महासुरः ॥ २० ॥ स भक्षयिष्यन्संक्रुद्धः शतक्रतुमुपाद्रवत् ॥ भयात्संस्तंभितभुजः च्यवनं वाक्यमब्रवीत् ॥ २१ ॥ सोमार्हावश्विनावेतावद्यप्रभृति भार्गव ॥ भविष्यतः सत्यमेतत् तव कीर्तिकरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्विदम् ॥ २२ ॥ एवमुक्तस्य शक्रेण भार्गवस्य महात्मनः ॥ स मन्युर्व्यगमच्छीघ्रं मुमोच च पुरं हरम् ॥
॥ २३ ॥ मदं च व्यभजद्राजन् पाने स्त्रीषु च वीर्यवान् ॥ अक्षेषु मृगयायां च पूर्वसृष्टं पुनः पुनः ॥२४॥
कविशापेन स मदरिंद्रं बाधितुमुद्यतः ॥ तस्य रूपं शृणु मुने दृष्ट्वेंद्रो भयकंपितः ॥ २५ ॥ शरीरं यस्य
निर्देष्टुमशक्यं तु सुरासुरैः ॥ तस्यास्यमभवद्घोरं तीक्ष्णाग्रदशनं महत् ॥ २६ ॥ हनुरेका स्थिता तस्य
भूमावेका दिवं गता ॥ चतस्रश्चायता दंष्ट्रा योजनानां शतं शतम् ॥ २७ ॥ इतरे तस्य दशना बभूवुर्दश
योजनाः ॥ प्रासादशिखराकाराः शूलाग्रसमदर्शनाः ॥ २८ ॥ बाहू पर्वतसंकाशावायतावयुतं समौ ॥
नेत्रे रविशशिप्रख्ये वक्त्रं कालाग्निसन्निभम् ॥ २९ ॥ लेलिह्यजिह्वया वक्त्रं विद्युच्चपललोलया ॥ इन्द्रो
भीतः सत्यलोकं रुद्रलोकं गतस्तदा ॥ ३० ॥ सर्वे भीताः पलायंते विष्णुलोकं गतो जवात् ॥ वैकुंठे-
शस्तत्र नास्ति किं कर्तव्यं मयाधुना ॥३१॥ मदो गच्छति तत्रैव स इंद्रो यत्र गछति ॥ पलायनपरो विप्र
श्वासोच्छ्वासपरायणः ॥ ३२ ॥ प्रस्खलन् प्रस्खलन् गच्छत् मध्ये पतति भीतितः ॥ सर्वलोकान् भूमि
गतान् भ्रमित्वा भूमिमागतः ॥ ३३ ॥ अकस्मान्नारदः प्राप्य किमिदं दैवतोऽनघ ॥ इंद्रेण कथितं श्रुत्वा

नारदः प्राह सस्मितः ॥३४॥ आगच्छ देवालयपुरं व्यंकटेशः सदास्ति च ॥ प्रणम्य नारदं सोऽपि पूर्वद्वार-
गतोऽभवत् ॥ ३५ ॥ हनूमता निषिद्धेन रोदनं कृतमंजसा ॥ हे देव हे रमानाथ त्राहि मां करुणाकर ॥
॥ ३६ ॥ इत्युक्त्वा प्ररुरोदोच्चैः हाहेति प्रवदन् मुहुः ॥ भूमौ पतितनेत्रांबु क्षारं समभवत्किल ॥ ३७ ॥
तीर्थं तद्भुवि विख्यातं क्षारं कंड्वामयापहम् ॥ विष्णुस्तद्रुदनं श्रुत्वा दर्शनं दत्तवान् प्रभुः ॥ ३८ ॥ तव
पापं गतं स्नाहि तीर्थे कृत्वा ममाज्ञया ॥ इंद्रः श्रुत्वा स्ववज्रेण खनित्वा जलमानयत् ॥ ३९ ॥ स्नानं
कृत्वा शुद्धदेहो मदस्तत्र तिरोहितः ॥ व्यंकटेशवराज्जातं तीर्थमिंद्रस्य भद्रदम् ॥ ४० ॥ इंद्रोऽप्यंशेन
सेवार्थं स्थितस्तत्र द्विजोत्तम ॥ इदमाख्यानकं श्रुत्वा सर्वपापलयो भवेत् ॥ ४१ ॥ वादे जपमवाप्नोति
व्यंकटेशप्रसादतः ॥ व्यंकटेशसमो देवो न भूतो न भविष्यति ॥ ४२ ॥ इति श्रीदेवालयग्राममाहात्म्ये
दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ व्यास उवाच ॥ ग्रामाद्बहिर्वह्निकोणे वह्नितीर्थं प्रचक्षते ॥
तत्र स्नानं यदा कुर्यात् तदैवमघनाशनम् ॥ १ ॥ उत्तिष्ठ कृष्णपुरुषेत्यग्निमंत्रं जपन्नरः ॥ विद्युद्दग्धां
मृदं गृह्य लेपयेद्गृहभित्तिकाम् ॥ २ ॥ तस्मिन् गृहे वह्निभयं कदाचिन्नैव जायते ॥ शुक्लप्रतिपदि स्नानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महत्पुण्यप्रदं विदुः ॥ ३ ॥ फाल्गुनस्य चतुर्दश्यां मंत्रं गृह्य नरोत्तमः ॥ द्वितीयदिवसे कार्यो होमोपयुक्तसंग्रहः ॥ ४ ॥ चैत्रशुद्धप्रतिपदमारभ्य दशमीदिनम् ॥ यावद्धोमः कृतो येन तस्य लक्ष्मीः स्थिरा गृहे ॥ ५ ॥ वरार्थिन्या कन्यकया वरेण तनयेच्छुना ॥ अत्र कार्यं दानमग्नेः प्रतिमायास्तु तद्दिने ॥ ६ ॥ तत्फलं लभते शीघ्रं श्रवणाच्च सुखप्रदम् ॥ पूर्वदक्षिणयोर्मध्ये प्रख्याता भुवनत्रये ॥७॥ मुनेर्गुहा पुरा यत्र मुनिसिद्धस्तपोवनात् ॥ दर्शनादेव तस्यास्तु मंत्रसिद्धिः प्रजायते ॥ ८ ॥ ततः पुरः प्रगंतव्यं गुग्गुलायाः सुदर्शने ॥ नारायणपुरे पूर्वं सुवर्णमुखरीतटे ॥ ९ ॥ द्विजजातिभवः कश्चिद्विद्याधर इति स्मृतः ॥ यजुर्वेदवरो गोत्रं प्रसिद्धं यस्य काश्यपम् ॥ १० ॥ विद्याहीनः शठो मूर्खः लोकनिंदाबहिष्कृतः ॥ मातृपितृविहीनश्च भ्रातृभिस्ताड्यते भृशम् ॥ ११ ॥ निर्विण्णमनसा गच्छन् व्यंकटाद्रिं मनोहरम् ॥ तपश्चकार सुभृशं पंचवर्षं परं तपः ॥ १२ ॥ स स्वप्ने व्यंकटेशेन गच्छ देवालयं पुरम् ॥ तत्रस्थ एव कार्यं ते करिष्यामीति बोधितः ॥ १३ ॥ गत्वा देवालयपुरं देवस्याग्रे स्वपन्निशि ॥ आज्ञप्तः स्वप्न एवासौ विद्यार्थं गुग्गुलार्चनम् ॥ १४ ॥ कुरु गच्छ त्वरायुक्तः ग्रामदक्षिणपूर्वगाम् ॥ आनंदेन गतो देव्या मंदिरं स्वर्गसुंदरम् ॥ १५ ॥ विद्यातीर्थं कृतं स्नानं देवीपूजनमाचरत् ॥ तां देवीं पूजयामास विद्याख्यां जगदंबिकाम् ॥ १६ ॥ देवीप्रियाणि वस्तूनि पुष्पादीनि ददावथ ॥ धूपे तु गुग्गुलुर्दत्तो विद्याया अतिवल्लभः ॥ १७ ॥ एवं प्रतिदिनं भक्त्या नवरात्रमपूजयत् ॥ स्वप्नदत्तं मंत्रजपं कुर्वन्देवीमतोषयत् ॥ १८ ॥ अहोरात्रं गुग्गुलं सः घृतमिश्रमदाहयत् ॥ धूपं होमं गुग्गुलेन कृत्वा संप्रार्थयत्तदा ॥ १९ ॥ मम विद्यां देहि मातस्तवाहं शरणं गतः ॥ तस्य भक्त्या प्रसन्ना सा प्रत्यक्षं दर्शनं ददौ ॥ २० ॥ आह विद्या तव श्रेष्ठा भविष्यति न संशयः ॥ पूर्वं विद्येति मन्नाम गुग्गुलाख्यं भविष्यति ॥ २१ ॥ यतस्त्वया गुग्गुलेन पूजितानंदमागता ॥ अहं ते जननी वत्स पिता ते भक्तवत्सलः ॥ २२ ॥ विद्यातीर्थं कृतं कर्म मत्पूजासंयुतेन यत् ॥ मूर्खस्यापि भवेत्सर्वज्ञत्वं वामप्रसादतः ॥ २३ ॥ गत्वा त्वं व्यंकटेशस्य पुरः कथय तत्कथाम् ॥ तयाज्ञप्तो गतस्तत्र कथयामास सत्कथाम् ॥ २४ ॥ देवशर्मा तदा तुष्टः विद्याधरमुवाच ह ॥ इतिहासपुराणानां श्रवणे प्रभुरुत्सुकः ॥ २५ ॥ वक्तातीव प्रियस्तस्य योगक्षेमप्रदो विभुः ॥ त्वया त्वदंशजातेन कथनीया सदा कथा ॥ २६ ॥ भार्यालाभो द्रव्यलाभो यशः संततिरेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च ॥ व्यंकटेशप्रसादेन सर्वं तव भविष्यति ॥ २७ ॥ व्यास उवाच ॥ तथेत्युक्त्वा यथारंभमकरो-
त्सुप्रसन्नधीः ॥ नियमेन प्रत्यहं सः श्रोतारः श्रवणोत्सुकाः ॥ २८ ॥ विवाहस्तस्य संजातः संतति-
र्वृद्धिमागता ॥ एका चमत्कृतिस्तासां कथायामभवद्धरेः ॥ २९ ॥ रामायणं यदारब्धं श्रवणे जनसंह-
तिः ॥ बालकाण्डकथा जाता द्वितीयकाण्डजा तथा ॥ ३० ॥ आरण्यके लक्ष्मणाय जानक्या
दुर्वचांसि हि ॥ रे रे लक्ष्मण दुष्टात्मन् राममृत्युं त्वमिच्छसि ॥ ३१ ॥ मामिच्छसि स्वभार्यां वै पाप
नष्ट भृशं शठ ॥ एतद्वाक्यश्रवादेव व्यंकटेशः प्रकंपितः ॥ ३२ ॥ मुहुर्मुहुः प्रचलनं सासनस्य विभो-
स्तदा ॥ भूकंपो मनसो ग्लानिः सर्वेषां दुःखमुल्बणम् ॥ ३३ ॥ ते देवं प्रार्थयामासुः क्षमां कुरु महाम-
ते ॥ सर्वैः किमपराद्धं ते न जानीमो वयं गुरो ॥ ३४ ॥ साष्टांगं प्रणिपत्योचुर्ज्ञानं देहि जगद्गुरो ॥ ततो
गगनगा वाणी श्रुता सर्वैर्द्विजोत्तम ॥ ३५ ॥ नापराद्धं भवद्भिस्तु नारायणकथाश्रवात् ॥ देवस्य चलनं
जातं कारणं शृणुतानघाः ॥ ३६ ॥ शेषावतारो भगवान् लक्ष्मणः ख्यातिमागतः ॥ स एव व्यंकटेशस्य
शेषाद्रिरिति चासनम् ॥ ३७ ॥ जानक्युद्भूतवाक्यानां दुर्वाच्यानां श्रवाच्चलम् ॥ वृथा तुदति मां देवी

जानकी रामवल्लभा ॥ ३८ ॥ किं करोमि कथं दुःखमिति कम्पितमासनम् ॥ अद्यप्रभृति कोऽप्यन्यो
रामायणकथां विभोः ॥ ३९ ॥ न कदाचित्कथयतु कल्याणार्थं ब्रवीम्यहम् ॥ विद्याधरो ममाग्रे तु रामा-
यणकथां विना ॥ ४० ॥ अन्यानि कथयँल्लक्ष्मीलाभस्तस्य महात्मनः ॥ विद्याधरमुखाद्ये ये शब्दास्तेऽ-
मृतवत्प्रियाः ॥ ४१ ॥ अतः कथां कथयतु कल्याणं वो भविष्यति ॥ इत्युक्त्वांतर्हितं भूतं गगनेचर-
मव्ययम् ॥ ४२ ॥ सोऽपि विद्याधरः ख्यातो यजुर्वेदपरायणः ॥ धनं धान्यं सुताँल्लब्ध्वा देवसेवापरो-
ऽभवत् ॥ ४३ ॥ इदमाख्यानकं श्रुत्वा विद्याधनसुतः सुखी ॥ बहुकाले व्यतीते च कथालोपो भवि-
ष्यति ॥ ४४ ॥ विद्याधरस्यान्ववाये कलहाच्च प्रमादतः ॥ रेणुकानंदनस्तं वै गुग्गुलाप्रेरितो महान्
॥ ४५ ॥ वाचनार्थं स्थापयिता देवप्रीत्यर्थमादरात् ॥ दक्षिणे तीर्थवर्याणां माहात्म्यं शृणु श्रद्धया ॥४६॥
इति श्रीदेवालयग्राममाहात्म्ये एकदशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥ व्यास उवाच ॥ दक्षिणे
यमतीर्थं च स्नानान्मंत्राच्च मृत्युहम् ॥ आम्नायायाः परे तीरे कालिका दैत्यनाशिनी ॥ १ ॥ तस्या
दर्शनतो विप्र शत्रुभीतिर्न जायते ॥ दक्षिणस्यां दिशि श्रेष्ठं तीर्थं त्रैलोक्यविश्रुतम् ॥ २ ॥ एक-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मिन्नेव कूपे तु तीर्थराजचतुष्टयम् ॥ तत्र देवो विट्ठलाख्यः रुक्मिण्या सहितो विभुः ॥ ३ ॥
व्यंकटेशाज्ञया प्राप्तः कल्याणार्थं जनस्य वै ॥ तस्याग्रे दक्षदिग्भागे बुद्धतीर्थमुदाहृतम् ॥ ४ ॥
तद्दक्षे रुक्मिणीतीर्थं संध्यातीर्थं बुधाग्रगम् ॥ रुक्मिण्यग्रे चंद्रभागातीर्थं प्रवरमुच्यते ॥ ५ ॥
बुद्धतीर्थे नरः स्नात्वा वेदाभ्यासं करोति यः ॥ नास्तिक्येन कृतं पापं नश्यति क्षणमात्रतः ॥ ६ ॥
बुद्धावतारो भगवान् बिट्ठलः परिकीर्तितः ॥ जिनैस्तत्र कृतं स्नानं कल्याणाय भविष्यति ॥ ७ ॥
रुक्मिणीतीर्थपानेन सुबुद्धिर्जायते क्षणात् ॥ आश्विनस्य दशम्यां तु शुक्लायां यो नरः सुधीः ॥ ८ ॥
संध्यातीर्थे सकृत्संध्यां करोति श्रद्धया युतः ॥ संध्यालोपभवं पापं यावद्वर्षं च नश्यति ॥ ९ ॥ चंद्र-
भागातीर्थवरस्नानाद्गात्रस्य शीतता ॥ नैर्ऋत्यां पापहरं राक्षसं तीर्थमीरितम् ॥ १० ॥ संगमस्य समीपे
तत् नद्यामेव प्रतिष्ठितम् ॥ भूतप्रेतपिशाचानां पीडां हरति चारिजम् ॥ ११ ॥ पश्चिमे वारुणं तीर्थं
विट्ठलस्य समीपतः ॥ देवाज्ञया हि वरुणो जलपूर्तौ प्रतिष्ठितः ॥ १२ ॥ जलाभावो नैव कदा स्नाना-
त्पानाच्च शर्मदम् ॥ सप्तशृंग्याः परं स्थानं न भूतं न भविष्यति ॥ १३ ॥ तस्यास्तीर्थे स्नानमात्राच्छा-

पमोक्षमवाप्नुयात् ॥ आर्यावर्ते द्विजः कश्चित्सुदेव इति विश्रुतः ॥ १४ ॥ धनी मानी शुभाचारो देवता-
तिथिपूजकः ॥ गानविद्यासु कुशलो तानमानविशारदः ॥ १५ ॥ धनंजयं यस्य गोत्रं शास्त्रतत्वविच-
क्षणः ॥ एकदा तद्गृहं प्राप्तो मध्याह्नेऽतिथिरुत्तमः ॥ १६ ॥ वृद्धो वस्त्रविहीनश्च विष्ठामूत्रासृगाप्लुतः ॥
शरीरं यस्य दुर्गंधं बहुधाकृमिसंकुलम् ॥ १७ ॥ तमभ्यागतमालोक्य सुदेवः पूर्वकर्मणा ॥ गच्छ
गच्छेति दुर्गंधे नावलोक्यं मुखं तव ॥ १८ ॥ महापापेन युक्तस्त्वं किमर्थमिह तिष्ठसि ॥ एवमुक्तः कोप-
युतो ब्राह्मणस्त्वब्रवीदिदम् ॥ १९ ॥ भोजनार्थमहं प्राप्तस्त्वद्गृहे त्वं गृही यतः ॥ अदत्त्वा भोजनं मह्यं
करोषि शयनं यतः ॥ २० ॥ तस्मात्त्वमेवं भविता मम शापान्न संशयः ॥ तेनेत्युक्ते तथैवाभूत्सुदेवो
विस्मयं गतः ॥ २१ ॥ तमेवशरणं गत्वा प्रार्थयामास खिन्नधीः ॥ अपराधं क्षमस्वाद्य प्रारब्धादागतं
वचः ॥ २२ ॥ सुमेधसो दयाशीलाः दीने कुर्वंति वै दयाम् ॥ जलं स्वभावतः शीतं वह्निना तापितं
पुनः ॥ २३ ॥ शीतं भवति भो विप्र तत्स्वभावो हि साधुषु ॥ इत्युक्त्वा साश्रुनयनः साष्टांगं प्रणनाम
सः ॥ २४ ॥ व्यास उवाच ॥ तमब्रवीन्महातेजाः शृणु विप्र महामते ॥ त्वं सदा शुद्ध एवासीः वैष्णवानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिरोमणिः ॥ २५ ॥ तव भाग्यवशादेव जातं दुःखं त्यजस्व तत् ॥ गच्छ देवालयपुरं यात्रां कुरु ममाज्ञया ॥ २६ ॥ तत्र दुःखं हरिष्यामि दर्शनं मे भविष्यति ॥ इत्युक्त्वा सुंदरोऽभूत्स यावत्पश्यति ब्राह्मणः ॥ २७ ॥ तावदंतर्दधे तत्र सर्वे विस्मयमागताः ॥ कुष्ठरोगातुरः सोऽथ सुदेवो निर्गतः क्षणात् ॥ २८ ॥ भार्यापुत्रादयः सर्वे तेनैव सह निर्ययुः ॥ ग्रामाद्ग्रामांतरं याता बहुदुःखसमाकुलाः ॥ २९ ॥ किमस्माकं पुरा वृत्तं कुत्र देवो व्यवस्थितः ॥ स ब्राह्मणो नैव जातु यः शापं दत्तवान्मम ॥ ३० ॥ गमनावसरे तस्य सूर्यतुल्यसमप्रभम् ॥ रूपं दृष्टं क्षणाद्भुतं तेनोक्तं गच्छ यत्र वै ॥ ३१ ॥ गच्छाम्यहं पुत्रभार्यायुतो देवालयं पुरम् ॥ एवं विचिंतयन् धीमानुत्तीर्य तपतीं नदीम् ॥ ३२ ॥ प्रणीतां प्रवरां चैव गंगां सर्वमलापहाम् ॥ पूर्णापगां समुत्तीर्य क्षेत्रसीम्नि स्थितां शुभाम् ॥ ३३ ॥ उत्तरद्वारगं नाथं गणेशमवलोक्य सः ॥ देवालयक्षेत्रगतं तीर्थं तीर्थं गतो लघु ॥ ३४ ॥ सर्वैर्हि धिःकृतो लोकैर्नात्र स्थेयं त्वया खलु ॥ महापापी यतस्त्वं वै गच्छ गच्छ पुराद्बहिः ॥ ३५ ॥ पापसंगो जन्ममृत्युजरादुःखाधिकं विदुः ॥ एवमुक्तः पुराद्ब्रह्मन् बहिर्निष्कासितो बलात् ॥ ३६ ॥ रुरोदोर्ध्वमुखो हाहा भगवन् किमघं मम ॥

किं मयापकृतं देव व्यंकटेश जगत्प्रभो ॥ ३७ ॥ लोकधिःकारसंयुक्तो न जाने केन कर्मणा ॥ श्रीविद्यामदगर्वेण यदा शप्तोऽतिथिर्मया ॥ ३८ ॥ तदाप्रभृति तच्छापात् दशां कष्टतरां गतः ॥ क्षमस्व भो दयासिंधो त्वन्मुखं ब्राह्मणो यतः ॥ ३९ ॥ महाराज महाराज महाराजेति विब्रुवन् ॥ पुरस्य पश्चिमे भागे सप्तशृंगीं समागतः ॥ ४० ॥ साष्टांगं प्रणिपत्याह रक्ष मातर्नमोस्तु ते ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ ४१ ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ व्योमवाण्या प्रेरितोहमागच्छं तव सन्निधौ ॥ ४२ ॥ तव तीर्थे करिष्यामि स्नानं नश्यतु मे रुजा ॥ इत्युक्त्वा तीर्थवर्ये सोऽकरोत्स्नानं विधानतः ॥ ४३ ॥ बहिर्गतो रोगमुक्त आश्चर्यमभवज्जने ॥ शरीरं सूर्यसंकाशं दृष्ट्वा लोका विसिस्मिरे ॥ ४४ ॥ सुदेवो सप्तशृंगीं तां नुनाव परया मुदा ॥ जय देवि जगन्मातः सप्तशृंगि नमोऽस्तु ते ॥ ४५ ॥ सप्तानां महदादीनां प्रकृतीनां यतः शिरः ॥ श्रेष्ठा प्रकृतिरूपेण सप्तशृंगीति चोच्यसे ॥ ॥४६॥ त्वत्कृपालेशमात्रेण राघवा निहतारयः ॥ कृष्णः श्रेष्ठो यदुकुले गणेशः पुत्रतां गतः ॥४७ ॥सूर्यः सुतेजसा युक्तः शिवः शक्तिसमन्वितः ॥ ब्रह्माभिन्ना त्वमेवैका ज्योत्स्नाऽभिन्नो यथा शशी ॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मम रोगहरा त्वं वायितो न प्रव्रजाम्यहम् ॥ कृपां कुरु महाभागे देवि चंडि नमोऽस्तु ते ॥ ४९ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रिताह्याश्रयतां प्रयांति ॥ ५० ॥ इत्युक्त्वा पादयुगुले शिरः स्याप्य ननाम सः ॥ देवी प्रसन्ना वरदा प्रत्यक्षाभूज्जगन्मयी ॥ ५१ ॥ प्रेम्णोवाच वरं दाझि वस देवालये पुरे ॥ व्यंकटेशो दयासिंधुस्तव रक्षां करिष्यति ॥ ५२ ॥ तेनैव द्विजरूपेण तवागमनमीरितम् ॥ तव भक्तिः प्रिया तस्य प्रत्यहं कीर्तनं कुरु ॥ ५३ ॥ देवदेवस्य विष्णोश्च गुणानां वर्णनं सदा ॥ तानमानसमायुक्तं तालध्वनिविराजितम् ॥ ५४ ॥ व्यंकटेशाग्रतस्तिष्ठन् कथयन् सुखमाप्स्यासि ॥ सुदेव उवाच ॥ जगदंब तवादेशात् करोमि कीर्तनं सदा ॥ ५५ ॥ कृपा मे देवदेवेन कृता बहुतराद्य वै ॥ मम भक्तिः सदा तस्य वर्धतु त्वत्प्रसादतः ॥ ५६ ॥ स्वांतिके येन मे दत्तं वसतौ स्थानमुत्तमम् ॥ सप्तशृंग्युवाच ॥ गच्छाद्यैव पुरस्तस्य कल्याणं ते भविष्यति ॥ ५७ ॥ इदं तीर्थं भुवि ख्यातं शापमोचनसंज्ञकम् ॥ येऽत्र स्नानं प्रकुर्वंति मुक्ताः शपथदोषतः ॥ ५८ ॥ परदोषकृतः शापः शीघ्रं लयमुपैष्यति ॥ सुदेव त्वं द्विजश्रेष्ठो भविष्यति महामते ॥ ५९ ॥

पट्टाभिषिक्तो द्युतिमान् व्यासार्चनसहायकृत् ॥ अधिकारानुसारेण वर्तितव्यं त्वयानघ ॥ ६० ॥ गुह्यमेकं प्रवक्ष्यामि शुद्धचित्तश्च यः सदा ॥ मत्सरेण विहीनश्च यदा भवति कर्मकृत् ॥ ६१ ॥ तदैव सफलं कार्यमन्यथा घातकृद्भवेत् ॥ ६२ ॥ यदा स्वकर्मणा विप्र नाशो भवति चेत्तदा ॥ ईश्वरं शरणं गच्छेत् पुनः प्राप्तं सुसंभवेत् ॥ ६३ ॥ अतिथिः पूजनीयस्ते सोऽश एव शिवस्य हि ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ ६४ ॥ तस्मै स्वदुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ वैश्वदेवेऽकृते दोषो भिक्षुस्तन्नाशने परः ॥ ६५ ॥ नच भिक्षुकृतं दोषं वैश्वदेवः समर्हति ॥ तस्मात्त्वया सदा पूज्यो ह्यतिथिः स्वर्गसंक्रमः ॥ ६६ ॥ अन्यथा विघ्नबाहुल्यं विचारं कुरु सुव्रत ॥ इत्युक्त्वांतर्हिता देवी मूर्तावेव प्रतिष्ठिता ॥ ६७ ॥ सुदेवो मंदिरं गत्वा कीर्तनं प्रकरोत्तदा ॥ श्रवणार्थं समायाताः सर्वे ते ग्रामवासिनः ॥ ६८ ॥

पट्टः पेषणपाषाणे व्रणादीनां च बंधने च ॥ चतुष्पथे च राजादिशासनांतरपीठयोः ॥ इति मेदिनी । कोटरेऽप्यथ पट्टः स्यात्फलके नृपशासने । इति त्रिकांडनानार्थः । अनेन इत्थं सूचितं त्वं पट्टे आसने ईशाज्ञया व्यासपूजारिकर्मणि योग्यो भविष्यसीत्यर्थः । संन्यासिभिः व्यासपूजा चातुर्मास्यारंभपूर्णायां कर्तव्या तत्सहायकृत् त्वम् । गृहस्थैश्च यतयः पूज्याः । अनेन त्वद्वंशे बहवः संन्यासधर्मिणो भविष्यंतीति ज्ञेयम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनंदः परमो जातः सत्कारः सुभृशं कृतः ॥ देवशर्मा प्राह देवाज्ञया ते कथयाम्यहम् ॥ ६९ ॥
अद्यप्रभृति ते स्थानं कीर्तनार्थं ददाम्यहम् ॥ एवमेव त्वया कार्यं प्रत्यहं कीर्तनं मुदा ॥ ७० ॥
परे यदा गमिष्यंति महा कीर्तनकारिणः ॥ तदा त्वदाश्रयेनैव कुर्वंतु कीर्तनं हरेः ॥ ७१ ॥ पुत्रपौत्रादि-
सहितः सुखी त्वं च भविष्यसि ॥ तदाज्ञां शिरसा गृह्य तदत्तमंदिरं ययौ ॥ ७२ ॥ भार्या पुत्राः स्नुषाः
कन्याः सर्वे तोषयुताः स्थिताः ॥ इदमाख्यानकं श्रुत्वा भक्तितः सिद्धिदायकम् ॥ ७३ ॥ पुत्रपौत्रादि-
सुखदं भक्तिरुत्पद्यते नृणाम् ॥ ७४ ॥ इति श्रीदेवालयग्रामाहात्म्ये द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥
श्रीव्यास उवाच ॥ पश्चिमे पूर्वमेवोक्तं तीर्थममृतकुंडकम् ॥ तत्र स्नानादिकृत्येन गतं नष्टं लभेन्नरः ॥ १ ॥
वायोर्दिशि महाप्राज्ञ सर्वतीर्थोत्तमोत्तमम् ॥ देवाज्ञया रोगहरं वायुतीर्थमिति स्मृतम् ॥ २ ॥ अशीति
वातरोगाश्च नश्यन्ति स्नानपानतः ॥ तत्र स्नात्वा वायुमंत्रं जप्त्वा रोगाकृतीर्ददन् ॥ ३ ॥ मुच्यते रोग-
जातेभ्यः किमाश्चर्यमतः परम् ॥ उत्तरे धनदं तीर्थं दरिद्रनाशकं परम् ॥ ४ ॥ ईशाने म्हालसानाथो
भक्तकार्यार्थमागतः ॥ मार्गशीर्षे शुद्धषष्ठ्यां दर्शनाद्बहुसौख्यदः ॥ ५ ॥ शिवतीर्थं पर्वताधः समीपे

वर्तते शिवम् ॥ पूर्वेशानगतं ब्रह्मतीर्थं संततिदायकम् ॥ ६ ॥ पृथ्वीतीर्थं मध्यभागे निर्ऋतेर्वरुणस्य च ॥
तत्र पृथ्वीमनुं जप्त्वा वराहस्य मनुं जपेत् ॥ ७ ॥ तत्रत्यां मृत्तिकां गृह्य मंत्राभ्यां सोदकेन च ॥ स्वक्षेत्रे
प्रक्षिपेद्धान्यवृद्धिः सत्यं भविष्यति ॥ ८ ॥ एवं ते लोकपालानां तीर्थानि कथितानि यः ॥ शृणोति
श्रद्धया युक्तः पठेद्वा भक्तितत्परः ॥ ९ ॥ कल्याणभाक् स भवति व्यंकटेशकृपां लभेत् ॥ अन्यत्किं कथ-
याम्यद्य किं ते चित्ते व्यवस्थितम् ॥ १० ॥ जैमिने शृणु तत्सर्वं पापहा भगवान् यतः ॥ ११ ॥
इति श्रीदेवालयग्राममाहात्म्ये त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ जैमिनिरुवाच ॥ गुरो व्यास महाप्राज्ञ
यच्छ्रुतं त्वन्मुखान्मया ॥ तेन तृप्तिः परा तुष्टिः संजाता क्षणमात्रतः ॥ १ ॥ अन्यानि तीर्थवर्याणि ग्राम-
मध्यस्थितानि हि ॥ वद मे त्वं दयां कृत्वा यैः सुखं जगतो भवेत् ॥ २ ॥ व्यास उवाच ॥ जैमिने शृणु
देवस्य प्रीतिदानि रमापतेः ॥ ग्रामस्य रुद्रकाष्ठायां तीर्थं गरुडसंज्ञकम् ॥ ३ ॥ यत्रामृतजलं नित्यमस्ति
सर्पविषापहम् ॥ मृत्युंजयः शिवः सत्या सार्धं हि निकषाभवत् ॥ ४ ॥ यदा हि गरुडो विष्णुं वाहयन्

---

१ समीपे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वरयागमत् ॥ देवमुत्तीर्य तृषितो ग्रामेशान्यां समागतः ॥ ५ ॥ पुरमध्ये क्षारजलं ज्ञात्वा शिवमुवाच सः ॥ किं करोमि तृषाक्रांतः सुदूरं यदि याम्यहम् ॥ ६ ॥ व्यंकटेशस्य मन्मूर्ध्नि कोपखड्गः पतिष्यति ॥ देवशर्मप्रसादार्थमागतः सहवासिभिः ॥ ७ ॥ सर्वैरन्यत्र गमने कृते दण्डचा मयैवहि ॥ इति श्रीव्यंकटेशस्य प्रभोराज्ञा गरीयसी ॥ ८ ॥ किं करोमि शिव ब्रूहि प्राणा गच्छन्ति मे लघु ॥ शिव उवाच ॥ मोहं त्यज महाबुद्धे मत्समीपे परं स्थलम् ॥ ९ ॥ ग्रामस्येशानदिग्भागे पातालाज्जलमानय ॥ पिब त्वत्प्रीतये वासं करोमि भार्यया सह ॥ १० ॥ मृत्युंजयेति मे नाम त्वन्नाम्ना तीर्थमुत्तमम् ॥ भविष्यति सखे ख्यातं लोककल्याणकारकम् ॥ ११ ॥ यदा यदा ह्यनावृष्टिर्भविष्यति सुदुःखदा ॥ तदा तच्छांतये कार्यं तीर्थेदैर्मम पूजनम् ॥१२॥ अतिरुद्राभिषेकेण सुवृष्टिस्त्वरया भवेत् ॥ शान्तिसूक्तं पठेन्नित्यं मत्तीर्थैर्ग्रामसिंचने ॥ १३ ॥ महामार्यादयो रोगाः पलायन्ते न संशयः ॥ मूषकाः शलभाः सर्पा ईतयो विविधा अपि ॥ १४ ॥ गमिष्यन्ति पुरात्सद्यः सुखं सर्वं भविष्यति ॥ व्यास उवाच ॥ मृत्युंजयवचः श्रुत्वा गरुत्मान् हर्षसंयुतः ॥ १५ ॥ भूमौ प्रहारं कृत्वा सः स्वयं चञ्चुपुटेन हि ॥ गर्तो जातो महांस्तत्रानयत्पातालगं जलम् ॥ १६ ॥ भोगावत्याः पवित्रं तत्सर्पमत्स्यादिसंयुतम् ॥ पीत्वा जलं शान्ततृषोऽपश्यत्सर्पगणं ततः ॥ १७ ॥ इमे सर्पाः क्रोधयुता जननाशकराः खलु ॥ एवं वदति यावत्ते जनान्दशितुमारभन् ॥ १८ ॥ हाहाकारो महांस्तत्र किमिदं विघ्नकारकम् ॥ पलायनपरा लोका देवशर्माणमागताः ॥ १९ ॥ व्यंकटेशं नमस्कृत्य सर्वे प्राञ्जलयोऽब्रुवन् ॥ देवदेव रमानाथ रक्षास्मान्सर्पतो जनान् ॥ २० ॥ दंदशूकगणो देव सहसा समुपागतः ॥ केनानीतो न जानीमः सर्वान्दशितुमुद्यतः ॥ २१ ॥ इति श्रुत्वा वचस्तेषां मनसीत्थं व्यचिन्तयत् ॥ ममागमनकाले किं लोकनिंदाकरं त्विदम् ॥ २२ ॥ एवं चिन्तयते देवस्तावद्भयसमाकुलः ॥ कंपमानांगयष्टिः सः तार्क्ष्यस्तत्र समागतः ॥ २३ ॥ सांष्टागं प्रणिपत्याह सर्वं वृत्तं रमाधवम् ॥ क्षमस्व चापराधं मे तव भक्तस्य केशव ॥ २४ ॥ मया न भक्षिताः सर्पास्तव क्षेत्रे गताभयात् ॥ इदानीं जनसंहारो न भविष्यति तत्कुरु ॥ २५ ॥ श्रीव्यंकटेश उवाच ॥ शिवमानय शीघ्रं त्वं पार्वत्या वृषभेण च ॥ शेषेण मस्तकस्थेन कार्यं मे महदुद्गतम् ॥ २६ ॥ व्यास उवाच ॥ जैमिने शृणु देवस्य मुखाद्वाणी यदागता ॥ मृत्युंजयः शिवस्तत्र पार्वत्या सहितो ययौ ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदिना भुजगाः सर्वे नकुलास्त्रेण पीडिताः ॥ शिवाज्ञया गता देवं ताक्ष्यं दृष्ट्वाधिकं भयम् ॥ २८ ॥ व्यंकटेश उवाचाथ शिवं त्वन्मूर्धगः कुतः ॥ शेषो न दृश्यते दंश्यः कथं सर्पा मम स्थले ॥ २९ ॥ शिव उवाच ॥ अनाथनाथ मा कोपं शेषस्योपरि त्वं कुरु ॥ मदाज्ञया हि ताक्ष्येंण ह्यानीतं जलमुत्तमम् ॥ ३० ॥ तज्जले क्रीडितुं सर्पा धृतराष्ट्रस्य वंशजाः ॥ गुप्तास्तृट्परितापेन गरुडेन न चेक्षिताः ॥ ३१ ॥ तथैव जलमध्ये ते धृतराष्ट्रकुलोद्भवाः ॥ आगता भोगिनश्चात्र मा कोपं कुरु भक्तप ॥ ३२ ॥ शेषस्तु मद्वंशजः किंत्विति भीत्या पलायितः ॥ त्वदासनं तु शेषाद्रिः किमर्थं कोपभाग्भवान् ॥ ३३ ॥ इत्युक्ते शंकरेणाथ शेषमाहूय शेषगम्॥ प्रोवाच न भयं तेऽस्तु त्वं पूर्वं शिवमाश्रय ॥ ३४ ॥ त्वं मे भक्तः सखा चेति तवोपरि ममासनम् ॥ इदं कार्यं त्वया शीघ्रं मद्भक्तरिपवः किल ॥ ३५ ॥ निष्कास्याः सर्व एवैते धृतराष्ट्रस्य वंशजाः ॥ मणिपूरे यदा वीरो बभ्रुवाहेन पातितः ॥ ३६ ॥ अर्जुनस्तस्य पुत्राभ्यां शिरो नीतं हतौ मया ॥ अतस्तेषामिहास्थानं निष्कासय बहिः पुरात् ॥ ३७॥ शेषः श्रुत्वा नमस्कृत्य

१ स्वासनगम् ।

ताक्ष्यमाह सविस्मयः ॥ देवाज्ञप्तः कुरुष्व त्वं स तान् सर्वान् क्रुधाब्रवीत् ॥ ३८ ॥ गच्छतेति मयाज्ञप्ता अन्यथा भक्षयाम्यहम् ॥ न गच्छंति यदा सर्पा गरुडो दीर्घचञ्चुकः ॥ ३९ ॥ नाकुलं च मयूरं च मध्वस्त्रं च पिपीलिकम् ॥ अस्त्रं संयोजयामास गतास्ते तत्क्षणाद्बहिः ॥४०॥ शिवोपिशेषसंयुक्तः प्रीत्यर्थं गरुडस्य हि ॥ स्थितस्तत्तीर्थसामीप्ये गरुडो देवसन्मुखे ॥ ४१ ॥ व्यंकटेशो रमानाथः गरुडं प्राह माधवः ॥ त्वत्कृतं तु परं तीर्थं मम प्रीतिकरं सदा ॥ त्वच्चरित्रं श्रवेणैव पठनेन च सिद्धिदम् ॥ ४२ ॥ इति श्रीदेवालयग्राममाहात्म्ये चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ जैमिनिरुवाच ॥ सर्पाः कतिविधा व्यास का जातिः किं च लक्षणम् ॥ वद मे कृपया देव लक्ष्म किं धृतराष्ट्रजे ॥ १ ॥ व्यास उवाच ॥ एवमेव पुरा पृष्टः सुमंतुर्नाम वै द्विजः ॥ जन्मेजयस्य पुत्रेण शतानीकेन भो मुने ॥ २ ॥ शतानीक उवाच ॥ सर्पाणां कति रूपाणि के वर्णाः किं च लक्षणम् ॥ का जातिस्तु भवेत्तेषां केषु योनिकुलेषु वा ॥ ३ ॥ सुमंतुरुवाच ॥ पुरा मेरौ नगवरे कश्यपं तपसां निधिम् ॥ प्रणम्य शिरसा भक्त्या गौतमो वाक्यमब्रवीत् ॥ ४ ॥ सर्पाणां कति रूपाणि किं चिह्नं किं च लक्षणम् ॥ जातिं कुलं तथा वर्णान् ब्रूहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं प्रजापते ॥ ५ ॥ कथं वा जायते सर्पः कथं मुंचेद्विषं प्रभो ॥ विषवेगाः कति प्रोक्ताः कत्येव विषनाडिकाः ॥ ६ ॥ दंष्ट्राः कतिविधाः प्रोक्ताः किं प्रमाणं विषागमे ॥ कदा तु गृह्णते गर्भं कथं चेह प्रसूयते ॥ ७ ॥ कीदृशी स्त्री पुमांश्चैव कीदृशं च नपुंसकम् ॥ किं नागदशनं चैव एतत्कथय सुव्रत ॥ ८ ॥ तस्य तद्वचनं श्रुत्वा गौतमं प्राह कश्यपः ॥ कश्यप उवाच ॥ शृणु गौतम तत्वेन सर्पजन्मादिकं क्रमात् ॥ ९ ॥ मास्याषाढे तथा ज्येष्ठे प्रमाद्यंति भुजंगमाः ॥ ततो नागो नागिनी च मैथुने संप्रपद्यते ॥ १० ॥ चत्वारो वार्षिकान् मासान् नागी गर्भस्य धारका ॥ ततः कार्तिकमासे तु अण्डकानि प्रसूयते ॥ ११ ॥ अण्डकानां तु विज्ञेये द्वे शते द्वे च विंशती ॥ तान्येव भक्षयेत्सा तु भागैकं[1] घृणया त्यजेत् ॥ १२ ॥ स्वर्णार्कवर्णाद्वै तस्मात्पुमान् संजायतेऽण्डकात् ॥ तान्येव खादते सर्पः अहोरात्राणि विंशतिम् ॥ १३ ॥ क्रमादण्डानि सा स्थाप्य भक्षितुं गच्छतो यदा ॥ माता स जनकश्चोभौ भक्षणार्थं समुद्यतौ ॥ १४ ॥ यदण्डं स्खलनं पंक्तेः बहिस्तज्जीवनं स्मृतम् ॥ पुरुषाण्डं नपुंसाण्डं पिता भुंक्ते क्षुधातुरः ॥ १५ ॥

१ एकं भागं चतुर्थांशम् ।

सर्पिणी कुरुते तत्र स्त्रीसंज्ञाण्डस्य भक्षणम् ॥ स्वर्णकेतकवर्णाभा दीर्घराजीवसन्निभात् ॥ १६ ॥ तस्मादुत्पद्यते स्त्री वै अण्डात् ब्राह्मणसत्तम ॥ शिरीषपुष्पवर्णाभादण्डकात्स्यान्नपुंसकम् ॥ १७ ॥ ततो भिन्नत्ति चाण्डानि षण्मासेन तु गौतम ॥ ततस्ते प्रीतिसंबंधात्स्नेहं बध्नन्ति बालकाः ॥ १८ ॥ ततोऽसौ सप्तरात्रेण कृष्णो भवति पन्नगः ॥ आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम् ॥ १९ ॥ मृत्युश्चाष्टविधो ज्ञेयः शृणुष्वात्र यथाक्रमम् ॥ मयूरान्मानुषाद्वापि चकोराद्गोखुरात्तथा ॥ २० ॥ बिडालान्नकुलाच्चैव वराहाद्वृश्चिकात्तथा ॥ एतेभ्यो यदि मुच्येत जीवेद्विंशोत्तरं शतम् ॥ २१ ॥ सप्ताहे तु ततः पूर्णे दंष्ट्राणां चाधिरोहणम् ॥ एकविंशतिरात्रेण विषं दंष्ट्रासु जायते ॥ २२ ॥ नागीपार्श्वसमावर्ती बालसर्पः स उच्यते ॥ पंचविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् ॥ २३ ॥ षण्मासाज्जातमात्रस्तु कंचुकं वै प्रमुच्यति ॥ पादाश्च संधयश्चैव द्वे शते द्वे च विंशती ॥ २४ ॥ तथैवांगुलयः प्रोक्ताः गोलोमसदृशाः पदः ॥ अकालजाता ये सर्पा निर्विषास्ते प्रकीर्तिताः ॥ २५ ॥ पञ्चसप्तति वर्षाणि आयुस्तेषां प्रकीर्तितम् ॥ रक्तपीतशुक्लदंता आनीला मंदवेगिनः ॥ २६ ॥ एते अल्पायुषो ज्ञेया अन्ये च भीरवः स्मृताः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकं चास्य भवेद्वक्त्रं द्वे जिह्वे परिकीर्तिते ॥ २७ ॥ द्वात्रिंशद्दशनाः प्रोक्ता पन्नगानां न संशयः ॥ तेषां मध्ये चतस्रश्च दंष्ट्रायाः सुविषावहाः ॥ २८ ॥ तासां नामानि वक्ष्यामि भिषजां च सुकर्मणि ॥ मकरी काली कालरात्री च यमदूतिका ॥ २९ ॥ प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदेवता ॥ तृतीया रुद्रदैवत्या चतुर्थी यमदेवता ॥ ३० ॥ हीना प्रमाणतः सा[2] तु वामनेत्रे समाश्रिता ॥ नास्यां मंत्राः प्रयोक्तव्या नौषधं नैव भेषजम् ॥ ३१ ॥ वैद्यः पराङ्मुखो याति मृत्युस्तस्यां विलेखनात् ॥ चिकित्सा न बुधैः कार्या तदंतं तस्य जीवितम् ॥ ३२ ॥ मकरी शस्त्रकं विद्यात् काली काकपादिका ॥ कराकृतिः कालरात्रिः याम्या कृष्णाकृतिर्भवेत् ॥ ३३ ॥ मकरी वातुला ज्ञेया काली पैत्तिकी स्मृता ॥ कफात्मिका कालरात्री दूती तु सन्निपातिकी ॥ ३४ ॥ शुक्ला रक्ता पीतवर्णा कृष्णा च क्रमशः स्मृताः ॥ वामभागे शुक्लकृष्णे रक्तपीते च दक्षिणे ॥ ३५ ॥ ब्राह्मणी क्षत्रिया वैश्या वृषली क्रमशस्त्विमाः ॥ दंष्ट्राणां तु विषं नास्ति नित्यमेव भुजंगमे ॥ ३६ ॥ दक्षिणं नेत्रमासाद्य विषं सर्पस्य तिष्ठति ॥ संक्रुद्धस्येह सर्पस्य विषं

१ दंता एव । २ सा तु यमदूती । ३ दशनात् ।

गच्छति मस्तके ॥ ३७ ॥ मस्तकाद्धमनीं याति ततो नाडीषु गच्छति ॥ नाडीभ्यो गच्छते दंष्ट्रां विषं तत्र प्रवर्तते ॥ ३८ ॥ अष्टभिः कारणैः सर्पो दशते नात्र संशयः ॥ आक्रान्तः पूर्ववैरी च सुभीतो मददर्पितः ॥ ३९ ॥ विषोल्बणः क्षुधाविष्टः सप्तमः पुत्ररक्षणे ॥ अष्टमो दशते नूनं जनं कालेन चोदितः ॥ ४० ॥ अष्टानां दष्टचिह्नानि भविष्ये कथितानि मे ॥ कालदष्टस्य चिह्नानि कथयामि त्वयाद्य वै ॥ ४१ ॥ जिह्वाभंगोऽथ हृच्छूलं चक्षुभ्यां च न पश्यति ॥ दंशं च दग्धसंकाशं पक्वजंबूफलोपमम् ॥ ४२ ॥ वैवर्ण्यं चैव दंतानां श्यावो भवति वर्णतः ॥ सर्वेष्वंगेषु शैथिल्यं पुरीषस्य च भेदनम् ॥४३॥ भग्नस्कंधकटिग्रीव ऊर्ध्वदृष्टिरधोमुखः ॥ दह्यते वेपते चैव स्वपते च मुहुर्मुहुः ॥ ४४ ॥ शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्तते ॥ दंडेन ताड्यमानस्य दंडराजिर्न जायते ॥ ४५ ॥ रक्तदृष्टिश्चला नाभिः कालदंष्ट्रं विनिर्दिशेत् ॥ दर्पणे सलिले वापि स छायां नैव पश्यति ॥ ४६ ॥ स याति निधनं जंतुः कालदष्टो न संशयः ॥ अष्टम्यां च नवम्यां च कृष्णपक्षे चतुर्दशीम् ॥ ४७ ॥ पंचम्यां नागसंज्ञायां दष्टस्य जीवितं कुतः ॥ आर्द्राश्लेषा मघा पूर्वात्रयं स्वाती च मूलभम् ॥ ४८ ॥ शततारा कृत्तिका च विशाखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भरणी तथा ॥ एषु दष्टा न जीवंति विषं पीतं च यैर्न ते ॥ ४९ ॥ शून्यागारे श्मशाने च शुष्कवृक्षे भु-
जंगमैः ॥ पूर्वोक्तातिथितारासु दष्टानां जीवनं कुतः ॥ ५० ॥ अष्टोत्तरमर्मशतं प्राणिनां समुदाहृतम् ॥
तेषां मध्ये तु मर्माणि दश द्वे च प्रकीर्तिते ॥ ५१ ॥ शंखे नेत्रे भ्रुवोर्मध्ये बस्तिभ्यां वृषणोत्तरे ॥ कक्षे
स्कंधे हृदि मध्ये तालुके ।चिबुके गुदे ॥ ५२ ॥ एषु मर्मसु दशने शस्त्रघाते न जीवनम् ॥ यन्मात्रं प-
तते बिंदुः कलाग्रं सलिलोद्भवम् ॥ ५३ ॥ तन्मात्रं स्रवते दंष्ट्रा विषं सर्पस्य दारुणम् ॥ तैलबिंदुर्जलं
प्राप्य यथा वेगेन वर्धते ॥ ५४ ॥ शिखंडीवाश्रयं प्राप्य मारुतेन समीरितः ॥ त्वचं रक्तं ततः पित्तं कफं
वायुं प्रगच्छति ॥ ५५ ॥ मज्जां मर्म विषं गत्वा प्राणहानिं करोति वै ॥ मूर्खवैद्या न पश्यंति पश्यंति च
विचक्षणाः ॥ ५६ ॥ विषार्तं नैवोपेक्षेत त्वरितं तु चिकित्सयेत् ॥ तस्यागदं प्रवक्ष्यामि स्वयं रुद्रेण
भाषितम् ॥ ५७ ॥ मयूरपित्तं मार्जारगंधनालिमूलकम् ॥ कुंकुमं तगरं कुष्ठं कासमर्दत्वचं तथा
॥ ५८ ॥ उत्पलस्य च किंजल्कं पद्मनः कुमुदस्य च ॥ एतानि समभागानि गोमूत्रेण तु पेषयेत् ॥५९॥
एषो गदो यस्य हस्ते दष्टो न म्रियते स वै ॥ कालाहिनापि दष्टेन क्षिप्रं भवति निर्विषः ॥ ६० ॥ अंज-

नं चैव नस्यं च मृतसंजीवनपरम् ॥ अस्याध्यायश्रवादेव सर्पभीतिर्निवर्तते ॥ ६१ ॥ इति श्रीदेवालयम-
माहात्म्ये पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥ ॐ कश्यप उवाच ॥ सर्पा नानाविधाः प्रोक्ता-
स्तेषां दंशः पृथग्विधः ॥ तद्दष्टचिह्नकथनं करोमि मुनिसत्तम ॥ १ ॥ पुंरूपसर्पदष्टस्य ऊर्ध्वदृष्टिः
प्रजायते ॥ २ ॥ सर्पीदष्टस्य च तथा ह्यधोदृष्टिः प्रजायते ॥ कन्यादष्टस्य वामा स्याद्दृष्टिर्द्विजवरोत्तम
॥ ३ ॥ कुमारेणापि दष्टस्य दक्षिणा एव जायते ॥ गर्भिण्या चापि दष्टस्य शरीरे धर्मसंभवः ॥ ४ ॥
रोमांचः सूतिकादष्टे वेपथुः खलु जायते ॥ नपुंसकेन दष्टस्य मुखशोषः प्रजायते ॥ ५ ॥ पन्नगीप्रभवो
रात्रौ दिवा सर्पो विषाधिकः ॥ नपुंसकस्य संध्यायां जायते विषमुल्बणम् ॥ ६ ॥ अंधकारे जले सुप्ते प्र-
मत्ते गहने वने ॥ दष्टे सर्पस्य न ज्ञानं कथं कार्यं चिकित्सनम् ॥ ७ ॥ चतुर्विधा इमे प्रोक्ताः पन्नगास्तु
विरंचिना ॥ दर्वीकरा मंडलिनो राजिला व्यंतरास्तथा ॥ ८ ॥ वातपित्तकफश्रेष्ठाः क्रमात्ते सान्निपाति-
काः ॥ रक्तं परीक्षयेदेषां सर्पाणां तु पृथक् पृथक् ॥ ९ ॥ कृष्णं दर्वीकराणां तु जायते नाल्पमुल्बणम् ॥
रक्तं घनं च बहुशः शोणितं मंडलीकृतम् ॥ १० ॥ पिच्छिलं राजिले स्वल्पं तद्व्यंतरके तथा ॥ सर्पा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तु ज्ञेयाश्चत्वारः पंचमो नोपलभ्यते ॥ ११ ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः ॥ ब्राह्मणो मधुरं दद्यात्तिक्तं दद्यात्तथोत्तरे ॥ १२ ॥ वैश्ये कर्षफलं दद्यात् शूद्रे त्रिस्थूणमेव च ॥ विषहान्या भवेत्सौख्यमपमृत्युर्विनश्यति ॥ १३ ॥ इति श्रीदेवालयग्राममाहात्म्ये षोडशोऽध्यायः ॥ १६ ॥ ॥ ॥ श्रीव्यासः कश्यप उवाच ॥ ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते ॥ मूर्छा च प्रबला स्याद्वै नात्मानमभिजानते ॥ १॥ श्यामवर्णं मुखं च स्यान्मन्यास्तंभश्च जायते ॥ तस्य कुर्यात्प्रतीकारं येन संपद्यते सुखम् ॥ २ ॥ अश्वगंधाप्यपामार्गं सिंदुवारं सुरामयम् ॥ एतत्सर्पिः समायुक्तं पाने नस्ये च दापयेत् ॥ ३ ॥ एतेनैवोपचारेण सुखी भवति मानवः ॥ क्षत्रियेण तु दष्टस्य कंपो गात्रेषु जायते ॥ ४ ॥ मूर्च्छा मोहस्तथा स्याद्वै नात्मानमाभिजानते ॥ जायते वेदना तस्य ऊर्ध्वं चैव निरीक्षते ॥ ५ ॥ तस्य कुर्यात् प्रतीकारं येन संपद्यते सुखम् ॥ अर्कमूलमपामार्गं प्रियंगुमिंद्रवारुणी ॥ ६ ॥ एतत्सर्पिः समायुक्तं पाने नस्ये च दापयेत् ॥ एतेनैवोपचारेण सुखी भवति मानवः ॥ ७ ॥

१ क्षत्रिये ।

वश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु ॥ श्लेष्मप्रकोपी लाला च न चोद्वहति चेतनाम् ॥ ८ ॥ मूर्छा च प्रबला यस्य आत्मानं नाभिनंदति ॥ तस्य कुर्यात्प्रतीकारं येन संपद्यते सुखम् ॥ ९ ॥ अश्वगंधा सगोमूत्रा गृहधूमं सगुग्गुलम् ॥ शिरीषार्कपलाशेन श्वेता च गिरिकर्णिका ॥ १० ॥ गोमूत्रेण समायुक्तं पानं नस्यं च दापयेत् ॥ एष वैश्येन दष्टानामगदः परिकीर्तितः ॥ ११ ॥ शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम ॥ कुप्यते वेपते चैव ज्वरः शीतं च जायते ॥ १२ ॥ अंगानि चुलुचुलायंते शूद्रदष्टस्य लक्षणम् ॥ तत्रागदं प्रवक्ष्यामि येन संपद्यते सुखम् ॥ १३ ॥ पद्मं च लोध्रकं चैव क्षौद्रं पद्मस्य केसरम् ॥ मधु मधूकसारं च श्वेतां च गिरिकर्णिकाम् ॥ १४ ॥ एतानि समभागानि पेषयेच्छीतवारिणा ॥ पानं लेपोऽजनं नस्यं सुखी भवति मानवः ॥ १५ ॥ पूर्वाह्णे चरते विप्रो मध्याह्ने क्षत्रियश्चरेत् ॥ अपराह्णे चरेद्वैश्यः शूद्रः संध्याचरो भवेत् ॥ १६ ॥ आहारो वायुः पुष्पाणि ब्राह्मणानां विदुर्बुधाः॥ मूषिकाः क्षत्रियाणां च आहारो द्विजसत्तम ॥ १७ ॥ वैश्या मंडूकभक्षाश्च शूद्राः सर्वाशिनस्तथा ॥ अग्रतो दशते विप्रः क्षत्रियो दक्षिणेन तु ॥ १८ ॥ वामपार्श्वं सदा वैश्यः पश्चाद्वै शूद्रमादिशेत् ॥ मद-

१ पश्चाद्दशंतं शूद्रं जानीयात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काले तु संप्राप्ते पीड्यमाना महाविषाः ॥ १९ ॥ अवेलायां दशंते वै मैथुनार्ता भुजंगमाः ॥ पुष्पगंधाः स्मृता विप्राः क्षत्रियाश्चंदनावहाः ॥ २० ॥ वैश्याश्च घृतगंधा वै शूद्रा स्युर्मत्स्यगंधिनः ॥ वासं तेषां प्रवक्ष्यामि यथावदनुपूर्वशः ॥ २१ ॥ वापीकूपतडागेषु गिरिप्रस्रवणेषु च ॥ वसंति ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे ॥ २२ ॥ आरामेषु पवित्रेषु शुचिष्वायतनेषु च ॥ क्षत्रियो वसति नित्यं तोरणेषु सरःसु च ॥ २३ ॥ श्मशाने भस्मशालासु पलालेषु तटेषु च ॥ गोष्ठेषु पथि वृक्षेषु विप्र वैश्या वसंति च ॥२४॥ श्वेताश्च कपिलाश्चैव ये सर्पास्त्वनलप्रभाः ॥ मनस्विनः सात्विकाश्च ब्राह्मणास्ते बुधैः स्मृताः ॥ २५ ॥ रक्तवर्णाः सुवर्णाभाः प्रवालमणिसन्निभाः ॥ सूर्यप्रभास्तथा विप्र क्षत्रियास्ते भुजंगमाः ॥ २६ ॥ नानाविचित्रराजीभिरतसीवर्णसन्निभाः ॥ बाणपुष्पसवर्णाभा वैश्यास्ते वै भुजंगमाः ॥ २७ ॥ काकोदरनिभाः केचिद्ये च ह्यंजनसन्निभाः ॥ काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्तिताः ॥ २८ ॥ यस्य सर्पेण दष्टस्य दंशमंगुष्ठमंतरम् ॥ बालदष्टं विजानीयात् कश्यपस्य वचो यथा ॥ २९ ॥ यस्य सर्पेण दष्टस्य दंशं द्व्यंगुलमंतरम् ॥ यौवनस्थेन दष्टस्य एतद्भवति लक्षणम् ॥ ३० ॥ यस्य सर्पेण दष्टस्य सार्धं द्व्यंगुलमं-

तरम् ॥ वृद्धदष्टं विजानीयान्नागानां लक्षणं शृणु ॥ ३१ ॥ अनंतः प्रेक्षते पूर्वं वामे पार्श्वे तु वासुकिः ॥ तक्षको दक्षिणेनेह कर्कोटः पृष्ठतस्तथा ॥ ३२ ॥ चलते भ्रमते पद्मो महापद्मो निमज्जति ॥ विसंज्ञस्तिष्ठते चैव शंखपालो मुहुर्मुहुः ॥ ३३ ॥ सर्वेषां कुरुते रूपं कुलिकः पन्नगोत्तमः ॥ यो यं दशति सर्पो वै तस्य तल्लक्षणं भवेत् ॥ ३४ ॥ अनंतस्य दिशा पूर्वा वासुकेस्तु हुताशनी ॥ दक्षिणा तक्षकस्योक्ता कर्कोटस्य तु नैर्ऋती ॥ ३५ ॥ पश्चिमा पद्मनाभस्य महापद्मस्य वायुजा ॥ उत्तरा शंखपालस्य शांकरी कंबलस्य तु ॥ ३६ ॥ तत्तद्दिशाधिपान्नत्वा सर्पतो न भयं भवेत् ॥ कस्य नागस्य किं चिह्नं मस्तके परिवर्तते ॥ ३७ ॥ शृणु वक्ष्यामि भूदेव कश्यपस्य वचो यथा ॥ अनंतस्य भवेत्पद्मं वासुकेः स्यात्तथोत्पलम् ॥ ३८ ॥ स्वस्तिकं तक्षकस्योक्तं कर्कोटस्य त्रिरेखगम् ॥ पद्मस्य तु भवेत्पद्मं महापद्मस्य शूलकम् ॥ ३९ ॥ शंखपाले भवेच्छत्रं कुलिकस्यार्धचंद्रकम् ॥ अनंतकुलिकौ विप्रौ क्षत्रियौ शंखवासुकी ॥ ४० ॥ महापद्मस्तक्षकश्च वैश्यौ विप्र प्रकीर्तितौ ॥ पद्मकर्कोटकौ शूद्रौ विप्राः शुक्लाः प्रकीर्तिताः ॥ ४१ ॥ क्षत्रिया रक्तवर्णा वै पीता वैश्यास्तु वर्णतः ॥ शूद्राः कृष्णाः समाख्याताः सर्पाणां जातय-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्विमाः ॥४२॥ पद्मवंशसमुत्पन्नो धृतराष्ट्रः सुदुर्मतिः ॥ तस्मात्स्थानं न वै दत्तं नगरे शेषवासिना ॥ ४३॥ सर्पपीडाहरं वक्ष्ये श्रावणीपंचमीदिने ॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥ ४४ ॥ नवगंधादिभिः पूज्या गोधूमपायसेन च ॥ तथा भाद्रे चित्रमयानाश्विने कुशजांस्तथा ॥ ४५ ॥ नागाः प्रीता भवंतीह मार्गशीर्षेऽपि पूजिताः ॥ ॐ कुरु कुल्ले फट् स्वाहा ॥ ४६ ॥ अनेन मंत्रराजेन विषहानिर्भवेत्क्षणात् ॥ नर्मदास्मरणेनापि तमस्यपि न दंशकृत् ॥ ४७ ॥ सर्पो भवति विप्रेंद्र गरुडस्यापि चिंतनात् ॥ आस्तीकवचनाच्चापि तस्मात्पूजय चोरगान् ॥ ४८ ॥ इदं श्रुत्वा सर्पभयं न गृहे जायते खलु ॥ सुखमाप्नोति सर्पेण मृतो गच्छति वै दिवम् ॥ ४९ ॥ इति श्रीदेवालयग्राममाहात्म्ये सप्तदशोऽध्यायः ॥ १७ ॥ व्यास उवाच ॥ हेरंबतीर्थमाहात्म्यं जैमिने शृणु तत्वतः ॥ उत्तरस्यां दिशि ख्यातं व्यंकटेशस्य संमुखे ॥ १ ॥ धनुःसप्ततिमानेन देवस्य दृष्टिगोचरे ॥ तत्तीर्थं विघ्नहरणं भक्तानां कामपूरकम् ॥ २ ॥ पांडुरंगस्वरूपेण गणेशस्तत्र तिष्ठति ॥ स्वस्वरूपं च धृत्वा वै गृहे भक्तस्य वर्तते ॥ ३ ॥ जैमिनिरुवाच ॥ गजाननः किमर्थं वै रुक्मिणीवल्लभोऽभवत् ॥ भक्तस्य किं कृतं तेन को भक्तः कथयस्व मे ॥ ४ ॥

व्यास उवाच ॥ अद्भुतं शृणु मत्तस्त्वं सर्वदुःखहरं यतः ॥ मयूरेशपुरं ब्रह्म कलशप्रभवानहि ॥ ५ ॥ वर्तते सर्वतीर्थैश्च देवैः सह मयूरराट् ॥ तस्य भक्तवरो विप्रो निस्पृहः सर्वदा शुचिः ॥ ६ ॥ नित्यं ऋग्वेदपठने रतः संध्यापरायणः ॥ पदं क्रमं जटां मालां शिखां च ब्राह्मणं घनम् ॥ ७ ॥ निरुक्तं ज्योतिषं छंदं शिक्षां व्याकरणं तथा ॥ सर्वं वेत्ति महाविद्वान् भास्करो नामः नामतः ॥ ८ ॥ अयाचितं यदा याति तद्भुंक्ते नान्यथा क्वचित् ॥ महागणपतेर्मंत्रं जपते सर्वदैव हि ॥ ९ ॥ कावेरी तस्य भार्यासीत् गणेशभजने रता ॥ अयाचितवृत्तिरियं कलौ कष्टप्रदा खलु ॥ १० ॥ तस्मात्तुष्टो मयूरेशः स्वभक्तिं परमां ददौ ॥ शिवविष्णुगणेशानां भेदो नैव च वस्तुतः ॥ ११ ॥ व्यवहारेऽपि सान्निध्यं वर्तते हि परस्परम् ॥ शिवपूज्यो गणेशानः विष्णुकन्यापतिस्त्वयम् ॥ १२ ॥ अतः प्राह मयूरेशः स्वप्ने तं भास्करं द्विजम् ॥ मम श्वश्रूश्च श्वशुरो लक्ष्मीनारायणाभिधौ ॥ १३ ॥ देवालयाख्यनगरं भक्तकार्यार्थमागतौ ॥ तत्पुरं गच्छ भद्रं ते सकुटुंबो निराकुलः ॥ १४ ॥ तत्रैव वसतिस्थानं श्रीयुतं संभविष्यति ॥ श्रीलक्ष्मीव्यंकटेशस्य सर्वदा सेवनं कुरु ॥ १५ ॥ वेदोच्चारात्पुराणस्य कथनात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शं भवेत्तव ॥ राजसदनगश्चाहं तत्पुरे समवस्थितः ॥ १६ ॥ न च विघ्नभयं ग्रामे मद्भक्तो यत्र तिष्ठति ॥ श्व एव गमनं कार्यं ततो जागृतिमाप स ॥ १७ ॥ मयूरेशं नमस्कृत्य सकुटुंबो गतः पुरम् ॥ देवालयाख्यमागत्य व्यंकटेशं ननाम सः ॥ १८ ॥ ईशेच्छया सत्कृतश्च गणेशं प्रणनाम सः ॥ देवशर्मा द्विजं प्राह सत्कृतो वस भो पुरे ॥ १९ ॥ तेन दत्तगृहे गत्वा सानंदोऽवसदात्मवान् ॥ गणेशाज्ञा यथा जाता तथा तेषां करोत्यसौ ॥२०॥ वेदपारायणं चैव पुराणपठनं तथा ॥ तेन संपत्तिरुत्कृष्टा पुत्रपौत्रादिसंयुता ॥ २१ ॥ एकस्मिन्दिवसे विप्रो गृहद्वाराद्बहिः स्थितः ॥ मयूरेशं द्विजः प्राह प्रांजलिः परनम्रधीः ॥२२॥ भो गजानन देवेश त्वदाज्ञा पालिता मया ॥ सर्वं सौख्यं ममाप्यस्ति न्यूनं त्वं पूरय प्रभो ॥ २३ ॥ ब्रह्मकमंडलुजलं तीर्थं त्वत्तोषदं न हि ॥ अत्रागतं चेद्भवति तेन स्नानं करोम्यहम् ॥ २४ ॥ तवापि पूजने योग्यं देहि मे करुणानिधे ॥ इत्युक्तवति विप्रे तु वागुवाचाशरीरिणी ॥ २५ ॥ भास्कर त्वमिदं पश्य त्वत्पुरो निर्गतं जलम् ॥ इयं गंगा गणेशस्य पुरे तिष्ठति या शुभा ॥ २६ ॥ सैवागता कुरु स्नानं देहि देवाय भूसुर ॥ इत्युक्त्वा विरता वाणी तदैव जलमागतम् ॥ २७ ॥ दृष्ट्वानंदयुतः स्नात्वा देवेभ्यः

प्रददौ मुदा ॥ तज्जलं मधुरं चासीत् सर्वानंदप्रदायकम् ॥ २८ ॥ एतस्मिन्नंतरे काले विष्णुभक्तः समागतः ॥ गोपीचंदनलिप्तांग ऊर्ध्वपुण्ड्रविभूषितः ॥ २९ ॥ मुद्राधरो विष्णुनाम जपन् परमपावनः ॥ भास्करेण कृतातिथ्यः भोजनाय निमंत्रितः ॥ ३० ॥ आपोशानकरो विप्रो दुःखयुक्तो बभूव ह ॥ भास्कर उवाच ॥ किमर्थं सजले नेत्रे किं दुःखं किमपेक्षितम् ॥ ३१ ॥ वैष्णव उवाच ॥ पर्वकाले सदा विप्र स्नपनं मे सरित्पतौ ॥ तदर्थं तज्जलं गृह्य कलशे सर्वदाप्यहम् ॥ ३२ ॥ चरामि सर्वतीर्थानि नित्यं विट्ठलपूजनम् ॥ अद्य सर्वस्मृतिर्नष्टा कलशो रुक्मिणीपतिः ॥ ३३ ॥ ह्यः काले राजसदने दोषायां वसतिर्वने ॥ जनैर्मे कथितं तत्र गणेशमन्दिरे वस ॥ ३४ ॥ मया ते धिक्कृताः सर्वे को गणेशो ममामतः ॥ पार्वत्या मलजातस्तु दर्शनं न करोम्यहम् ॥ ३५ ॥ इत्युक्त्वा गर्वभारेण बहुनिन्दा मया कृता ॥ रात्रौ निद्रा यदा जाता तदा व्याधिः समागतः ॥ ३६ ॥ तद्भीत्योत्सृज्य सर्वं तत्पलायनपरोऽभवम् ॥ गणेशनिन्दया सर्वा स्मृतिर्नष्टाभवत्खलु ॥ ३७ ॥ इदानीं हि स्मृतिः प्राप्ता गणेश तव दर्शनात् ॥ मम सर्वः स्मयो नष्टः शरणं त्वामुपागतः ॥ ३८ ॥ ममाज्ञां देहि गच्छामि सदने राजपूर्वके ॥ आनयिष्यामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलशं रुक्मिणीसहितं प्रभुम् ॥३९॥ भोजनं न करिष्यामि गमिष्यामि यथेप्सितम् ॥ भास्कर उवाच ॥ पात्रं त्यक्त्वा कुत्र गंता नैष धर्मः सतां मतः ॥ ४० ॥ परिवेषितमन्नं हि भक्षणीयं ततः परम् ॥ गंतव्यं तेन दुःखं हि ममापि लयमेष्यति ॥ ४१ ॥ विप्र उवाच ॥ समुद्रोदकजं स्नानं विठ्ठलस्य च दर्शनम् ॥ विना मे भोजनं कुत्र गमिष्यामि यथागतः ॥ ४२ ॥ भास्कर उवाच ॥ गणेशनिन्दया दुःखं प्राप्तं तस्माद्भजस्व तम् ॥ विप्र उवाच ॥ प्रोक्तं त्वया सत्यमिदं गणराजं त्वमर्थय ॥ ४३ ॥ भास्कर उवाच ॥ भो विप्र गणराजस्य विष्णोर्वै शंकरस्य च ॥ न भेदं कुरुते प्राज्ञः पश्य त्वं गणपं प्रभो ॥ ४४ ॥ तद्दर्शनेन वैकुंठदर्शनस्य फलं लभेत् ॥ विप्र उवाच ॥ यदि भेदो नास्ति तेषां तर्हीदानीं कृपाकरः ॥ ४५ ॥ विठ्ठलस्य स्वरूपेण दर्शनं मे ददात्विह ॥ भास्कर उवाच ॥ बद्धाञ्जलिस्तिष्ठ मुने दर्शनं सत्वरं भवेत् ॥ ४६ ॥ इत्युक्त्वा श्रीमयूरेशं प्रणम्याप्रार्थयच्च सः ॥ देहि त्वत्पादकमलदर्शनं ब्राह्मणेच्छया ॥ ४७ ॥ अनाथनाथ सर्वज्ञ हेरंब करुणाकर ॥ सूत उवाच ॥ इत्यर्थितो गणेशस्तु ब्राह्मणस्य पुरःसरः ॥ ४८ ॥ विठ्ठलस्य स्वरूपेण पश्य भक्तेति चाब्रवीत् ॥ विप्रो विठ्ठलमूर्तिं तां दृष्ट्वा भक्त्या ननाम वै ॥ ४९ ॥

भो गणेश महाविष्णो हेरंब रुक्मिणीपते ॥ आशापूरक देवेश पुण्डलीकवरप्रद ॥ ५० ॥ षड्भुजस्त्वं मयूरेश दशहस्तो विनायकः ॥ गजाननश्चतुर्हस्तः द्विभुजो विठ्ठलाभिधः ॥ ५१ ॥ त्रेताकृते द्वापरे च कलौ चेति चतुर्युगे ॥ क्षान्त्वापराधान् देवेश दत्तं दर्शनमद्य मे ॥ ५२ ॥ विठ्ठल उवाच ॥ अहमेव गणेशानो विठ्ठलश्चाहमेव हि ॥ नावयोरंतरं भक्त भोजनं कुरु सांप्रतम् ॥ ५३ ॥ ब्रह्मकमण्डलुजले समुद्रोदकमागतम् ॥ पूर्वं जलं तु मधुरमिदानीं क्षारतां गतम् ॥ ५४ ॥ तवांगे तज्जलं विप्र भास्करः प्रोक्षयिष्यति ॥ तव नित्यविधौ पूर्णे भोजनं कुरु सादरम् ॥ ५५ ॥ विप्र उवाच ॥ इह विठ्ठलरूपेण तिष्ठ देव गजानन ॥ अत्र तीर्थे सदैवास्तु सामुद्रजलगो महः॥५६॥ सूत उवाच ॥ तथास्त्विति प्रभुश्चोक्त्वा गणेशो विठ्ठलस्तथा ॥ रूपद्वयेन संतस्थौ दर्शनान्मुक्तिदायकौ ॥ ५७ ॥ तत्तीर्थस्नानकृन्मर्त्यो महागणपतेर्मनुम् ॥ मालामंत्रमिति ख्यातं सुंदरीमंत्रसंयुतम् ॥ ५८ ॥ अष्टादशभुजं ध्यायेज्जपेत्सिद्धिर्भविष्यति ॥ शाकिनीग्रहवेतालनानाव्याधिविनाशनम् ॥ ५९ ॥ भास्करोऽयाचितो वृत्त्या स च विप्र स्थितो मुदा ॥ एतच्चरित्रपठनाच्छ्रवणाच्च द्विजोत्तम ॥ ६० ॥ सर्वार्थसिद्धिं लभते मनुजो नात्र संशयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंकटेशकृपाभागी जायते प्रेमभावतः ॥ ६१॥ इति श्रीदेवालयग्राममाहात्म्ये अष्टादशोऽध्यायः ॥१८॥
व्यास उवाच ॥ जैमिने शृणु तत्वेन शेषतीर्थचरित्रकम् ॥ यत्र स्नात्वाथवा प्रोक्ष्य जलेन स्वशरीरकम् ॥ १ ॥ रोगान्मुक्तो भवेन्मर्त्यो विषबाधा न जायते ॥ शेषतीर्थोदकं क्षारं यत्र पापं पुराक्षरात् ॥ २ ॥ तदभिज्ञानसिद्धचर्थं व्यंकटेशाज्ञया स्थितम् ॥ व्यंकटेशाद्रामभागे पंचसप्ततिहस्ततः ॥ ३ ॥ वर्तते शृणु वृत्तान्तं तत्रस्थं पापहारकम् ॥ लाडजात्यां समुत्पन्नो रामनाम्ना पुराभवत् ॥ ४ ॥ दरिद्रो दुःखसंयुक्तो विचारमकरोद्धदि ॥ केन देवः प्रसन्नः स्यात् कथं देवी प्रसीदति ॥ ५ ॥ किं कार्यं कुत्र गंतव्यं ज्ञानदाता गुरुश्च कः ॥ इत्थं चिन्तातुरं रामं मुनिः कश्यप आययौ ॥ ६ ॥ कृतसत्कृतिराहेदं किमर्थं म्लानता तव ॥ राम उवाच ॥ न मे गृहे धान्यवृद्धिर्न धनं नापि भूषणम् ॥ ७ ॥ न कौशेयं न पात्राणि किं करोमि कथं सुखम् ॥ ममाभाग्यस्य संकल्पः कथं पूर्णो भवेद्वद ॥ ८ ॥ कश्यप उवाच ॥ कः संकल्पः कथयतु भवान् पूर्णो भविष्यति ॥ राम उवाच ॥ मम चित्ते सदा याति व्यंकटेशस्य सेवनम् ॥९॥ कार्यं तथोत्सवस्तस्य सुवर्णालंकृतिः परा ॥ सुवर्णरौप्यपात्राणि वज्रमौक्तिकहारकाः ॥ १०॥ छत्रचामर-

शोभा वै देवस्य मम वै तथा ॥ देवप्रतिनिधिश्चाहं भवेयं सर्वकार्यकृत् ॥ ११ ॥ मंदिरे मे रमायुक्तो देवदेवः कथं वसेत् ॥ इत्याशा महती विप्र कथं पूर्णा भवेन्मम ॥ १२ ॥ कथयस्व महाभाग वैराग्यं च यथा भवेत् ॥ कश्यप उवाच ॥ यस्य भार्या रमा राम रामा पृथ्वी तथापरा ॥ १३ ॥ पुत्रो विरंचिर्वहनं गरुडो वसतिर्नंगे ॥ हनुमान् सेवको यस्य सर्वाधारस्तु नागराट् ॥ १४ ॥ स एव पर्वतो भूत्वा शेषो धारयति प्रभुः ॥ क्षीरोदे शेषपर्यंके वासो लक्ष्म्या सह प्रभोः ॥ १५ ॥ रामकृष्णावतारे च शेषो बंधुत्वमागमत् ॥ यस्मात्तदासनं नागो यत्र तत्र स्थितः प्रभुः ॥ १६ ॥ तस्मात्त्वं शेषयुक्तस्य पूजां कर्तुमिहार्हसि ॥ राजासनं यत्र यत्र योग्यस्थाने निवेशितम् ॥ १७ ॥ तत्र तत्रैष भूयोऽपि गच्छति प्रेमभावतः॥ अतस्त्वं शेषशयनमनुं जप महामते ॥१८॥ राम उवाच ॥ कथं सेवा मया कार्या कं मंत्रं प्रजपाम्यहम्॥ कश्यप उवाच ॥ शिवणं नगरं गच्छ साधुं तत्र समाश्रय ॥ १९ ॥ तस्योपदेशग्रहणं भज तस्याज्ञया विभुम् ॥ इत्युक्त्वान्तर्दधे विप्रः स च साधुं समागतः ॥ २० ॥ प्रणनाम स साष्टांगं सर्ववृत्तमवर्णयत् ॥ साधुरुवाच ॥ ममोच्छिष्टं मासत्रयं सेवस्व शिवदं भवेत् ॥ २१ ॥ ततो मंत्रं प्रवक्ष्यामि तवाभीष्टप्रदा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यकम् ॥ रामः श्रुत्वा तथा चक्रे सेवां तस्य महात्मनः ॥ २२ ॥ गृहे सम्मार्जनं नित्यं शिवयोर्मन्दिरे तथा ॥ उच्छिष्टभोजनं प्रेम्णा पादान्तमर्दनं शनैः ॥ २३ ॥ संतुष्टोऽभूत्तदा साधुः प्राह रामं मनुं परम् ॥ चतुर्दशं चतुर्थं च स्वरं बिंदुयुतं ततः ॥ २४ ॥ कामबीजं भूमिबीजं लज्जाबीजमतः परम् ॥ व्यंकटेशादिमं वर्णं मंत्रसंजीवनं विदुः ॥ २५ ॥ ततो ङेन्तो व्यंकटेशः शेषासनस्तथैव च ॥ हृदंतोऽयं महामंत्रः शेषयुक् परमेशितुः ॥ २६ ॥ ऋषिछंदादिन्यासांश्च पुरश्चर्याविधिं ततः ॥ प्रयोगं कथयामास गच्छ देवालये पुरे ॥ २७ ॥ तत्र श्रीव्यंकटेशस्य पुरतो पूर्वदिङ्मुखः ॥ अनुष्ठानं कुरु प्रेम्णा श्रद्धाभक्तिपुरःसरम् ॥ २८ ॥ सदा तन्नामग्रहणं श्रीनिवासेति शंकरम् ॥ कामादिषड्रिपून् जित्वा दयाशान्तियुतो भव ॥ २९ ॥ कल्याणं ते रमानाथः करिष्यति न संशयः ॥ इत्युक्तस्तं नमस्कृत्य व्यंकटेशस्थलं ययौ ॥ ३० ॥ आज्ञा यथा गुरोरासीत्तथैव कृतवान् विधिम् ॥ जातिलक्षं जपं कृत्वा होमं तर्पणमार्जने ॥ ॥ ३१ ॥ अशीत्युत्तरसंख्याकं शतं ब्राह्मणभोजनम् ॥ कृत्वा समर्पयामास देवाय सर्वकर्म तत् ॥ ३२ ॥ तदा प्रसन्नो भगवान् प्रत्यक्षं दर्शनं ददौ ॥ वरं ब्रूहीत्युवाचाथ यमिच्छसि ददामि तम् ॥ ३३ ॥ राम

ऊचे स साष्टांगं प्रणिपत्य कृताञ्जलिः ॥ धन्योऽहमद्य जननी पिता बंधुर्गुरुर्मम ॥ ३४ ॥ यस्मात्ते दर्शनं जातं देवादीनामगोचरम् ॥ नमस्ते वासुदेवाय श्रीकृष्णाय नमो नमः ॥ ३५ ॥ तव भक्तिं दृढां देहि ज्ञानं संसारमोचकम् ॥ पूर्वं मे वासना याऽभूत्साद्य न प्रभुदर्शनात् ॥ ३६ ॥ त्वदीयचरणद्वंद्वं हृदये मम तिष्ठतु ॥ श्रीलक्ष्मीव्यंकटेश उवाच ॥ तवाभीष्टं सर्वमेव भविष्यति न संशयः ॥ ३७ ॥ पूर्वं यदिच्छया तप्तं जप्तं दत्तं ममाधुना ॥ मम लक्ष्मीस्तव गृहे सदा वासं करिष्यति ॥ ३८ ॥ मम प्रतिनिधिस्त्वं च त्वया कार्यं मनस्थितम् ॥ राम उवाच ॥ देवदेव रमानाथ विज्ञप्तिं शृणु मे प्रभो ॥ ३९ ॥ भक्तिमेव दृढां देहि नान्यत्किंचिदपेक्षितम् ॥ देव उवाच ॥ मम सेवा त्वया कार्या पुरा ते मनसि स्थितम् ॥ ४० ॥ इदानीं नैव ते चित्ते तथापि शृणु मे वचः ॥ अस्मिञ्जन्मनि ते ज्ञानं दत्तं मोक्षप्रदायकम् ॥ ४१ ॥ लोकसंग्रहसिद्ध्यर्थं तव जन्म तवान्वये ॥ भविष्यति तदा सर्वं छत्रचामरधारणम् ॥ ४२ ॥ त्वमेव देव इति च ख्यातिं लोके गमिष्यसि ॥ भक्तदत्तं सर्वमेव त्वदधीनं भविष्यति ॥ ४३ ॥ यदा त्वद्वंशजे प्राप्तमैश्वर्यं मत्समागमात् ॥ तदा गर्वेण चोन्मत्तो भविष्यति यदा खलः ॥ ४४ ॥ मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्ये लोभकरस्तदा सर्वं गमिष्यति ॥ जाते संपत्तिनाशे तु दुःखयुक्तो त्वदन्वयः ॥ ४९ ॥ त्वं च प्रारब्धभोगांते मम लोकं गमिष्यसि ॥ इति श्रीदेवालयग्राममाहात्म्ये एकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ राम उवाच ॥ देवदेव दयासिंधो कृपां कृत्वा ममोपरि ॥ कथयस्व महाराज दीनोऽहं भक्तवत्सल ॥ १ ॥ तवावमानतो देव मद्वंशसुखदायिनी ॥ गमिष्यति यदा लक्ष्मीः कदा सौख्यं भविष्यति ॥ २ ॥ मद्वंशपुरुषैः किंच कार्यं त्वत्तोषदं परम् ॥ येन त्वत्पदभक्तिश्च लभ्यते श्रीश्च त्वत्परा ॥ ३ ॥ श्रीलक्ष्मीव्यंकटेश उवाच ॥ शृणु राम महाभाग येन सौख्यं तवान्वये ॥ भविष्यति भणे तत्ते कर्म मत्प्रीतिदायकम् ॥ ४ ॥ यदा तवान्वये कश्चित्पश्चात्तापयुतोऽसुखी ॥ शमादिगुणसंपन्नः सर्वभूतदयापरः ॥ ५ ॥ यत्र यत्र गता दृष्टिस्तत्र पश्यति मां सदा ॥ येन मंत्रेण संतुष्टो वरदोऽहं समागतः ॥ ६ ॥ चतुर्गुणं जपं तस्य पुरश्चरणमार्गतः ॥ धनाभावेऽपि यत्नेन प्रकुर्याद्द्विजभोजनम् ॥ ७ ॥ तथा लक्षनमस्काराः कृताश्चेन्मम तोषदाः ॥ देवस्वहरणात्पापं जातं नश्यति तैः कृतैः ॥ ८ ॥ सहस्रनाम जप्तव्यं प्रत्यहं सूर्यसंख्यया ॥ जपेन देवसंतोषस्तस्मात्कार्यं परं त्रयम् ॥ ९ ॥ पश्चाद्विघ्नप्रशमने गत-

राज्याप्तये तथा ॥ उच्छिष्टस्य गणेशस्य सविधानं मनुं जपेत् ॥ १० ॥ तस्य प्रयोगे संजप्ते गतप्राप्तिर्भवेत्सुखात् ॥ सर्वकर्माणि शांत्या च गतगर्वाणि यो चरेत् ॥ ११ ॥ तस्य सिद्धिं ददाम्येव नात्र कार्या विचारणा ॥ त्वं गच्छ शेषतीर्थं वै वासं कुरु मदाज्ञया ॥ १२ ॥ त्वया कृतो जपो यत्र तत्तीर्थं शेषसंज्ञकम् ॥ मया तस्य वरो दत्तस्त्वत्तीर्थं स्नानदानकृत् ॥ १३ ॥ सुखं प्राप्नोति सततं पापकृन्नरकं व्रजेत् ॥ त्वया तप्तं क्षारभूमौ जलं क्षारं ततोऽभवत् ॥ १४ ॥ अघासुरस्य क्षरणं यतो भवति निश्चयः ॥ राम तत्र गृहं कृत्वा वस मच्छेषसेवकः ॥ १५ ॥ अशेषशेषग्रहणे योग्यो वंशो भविष्यति ॥ इत्युक्त्वांतर्दधे देवो रामश्चक्रे प्रभोर्मतम् ॥ १६ ॥ इति ते शेषतीर्थस्य महिमानं निरूपितम् ॥ श्रवादस्य परेशस्य सौख्यभागी भवेदिह ॥ १७ ॥ इति श्रीदेवालयग्राममाहात्म्ये विंशतितमोऽध्यायः ॥ २० ॥ ॥ छ ॥ श्रीव्यास उवाच ॥ गदातीर्थस्य माहात्म्यं जैमिने शृणु मन्मुखात् ॥ विप्र एकः श्वेतकुष्ठी रोगनाशकमच्युतम् ॥ १ ॥ व्यंकटेशं नमस्कृत्य दशाधिकशतं मुदा ॥ प्रदक्षिणा नित्यमेव चक्रे सार्धत्रिवर्षकम् ॥ २ ॥

---

१ अनंतः । २ प्रसादरूपं निर्माल्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूत्वा प्रसन्नो देवेशः प्रत्यक्षं दर्शनं ददौ ॥ उवाचेयं गदा क्षिप्ता यस्यां भूमौ पतेद्धि सा ॥ ३ ॥ तीर्थं भवति तत्रैव स्नानं तु रोगमुक्तिदम् ॥ जपं हनुमतो मालामंत्रस्य पंचलक्षकम् ॥ ४ ॥ हनुमत्प्रतिमादानाद्विजानां भोजनादपि ॥ रोगो नश्यति वै क्षिप्रं कलावेतच्चतुर्गुणात् ॥ ५ ॥ इत्युक्त्वा प्रभुणा क्षिप्ता गदा द्वाराद्बहिर्गता ॥ वामे हनूमतो पश्चात्सशब्दा पतिता दृढा ॥ ६ ॥ अंतर्गतं जघानाथ राक्षसं दंडकं जले ॥ जलवासाद्राक्षसस्य जलं तत्क्षारतां गतम् ॥ ७ ॥ तत्र तीर्थं समुत्पन्नं श्वेतकुष्ठनिवारकम् ॥ महाद्वाराद्बहिर्वामे हनूमद्दक्षिणे स्थितम् ॥ ८ ॥ विप्र स्नात्वा रोगमुक्तः प्रणम्य स्वगृहं गतः ॥ रोगयुक्तैर्जनैस्तत्र विप्रेण यत्कृतं पुरा ॥ ९ ॥ तच्चतुर्गुणितं कार्यं श्वेतकुष्ठो गमिष्यति ॥ अस्य श्रवणतो नित्यं कुष्ठोत्पत्तिकरं त्वघम् ॥ १० ॥ नश्यत्येव न संदेहः सदा भद्रं भविष्यति ॥ ११ ॥ इति श्रीदेवालयग्राममाहात्म्ये एकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ ॐ ॥ श्रीव्यास उवाच ॥ बाणतीर्थस्य माहात्म्यं शृणु त्वं जैमिने मुने ॥ अतीव सुखदं विप्र पांडुरोगहरं परम् ॥ १ ॥ गदातीर्थस्य निकषा पंचसप्ततिहस्ततः ॥ हनुमत्पृष्ठभागे तु बाणतीर्थमुदाहृतम् ॥ २ ॥ अच्युतस्येषुणा यत्र तप्तं सान्निध्यहेतवे ॥

वियोगादेवहस्तस्य पांडुरंगेण धीमता ॥ ३ ॥ हनुमन्निकटे स्थानं दत्तं वासार्थमाहृतम् ॥ कार्यकाले गृह्णाष्यामि त्वं हि मे परमः प्रियः ॥ ४ ॥ त्वत्पांडुता गता यस्मात्तीर्थं तत्पांडुनाशकम् ॥ क्षारभूमेश्च संसर्गाज्जलं क्षारं सुरोगहम् ॥ ५ ॥ पांडुरोगस्य प्रतिमादानमत्र विधीयते ॥ नामत्रयस्य च जपः कोटिसंख्या प्रकीर्तितः ॥ ६ ॥ अच्युतानंतगोविंदं तारादिं हृदयांतकम् ॥ मंत्रं सर्वप्रदं रोगहरणं सिद्धिदं खलु ॥ ७ ॥ इति तीर्थं मया प्रोक्तं श्रवणात्पापनाशनम् ॥ धनधान्यवृद्धिकरं व्यंकटेशप्रसादतः ॥ ८ ॥ इति श्रीदेवालयग्राममाहात्म्ये द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ ॐ ॥ श्रीव्यास उवाच ॥ धनुस्तीर्थं तीर्थवरं भगवत्प्रीतिकारकम् ॥ शार्ङ्गधनुर्दैवहस्ते सर्वदैत्यविनाशनम् ॥ १ ॥ विद्याधरगृहे विप्र वर्तते भद्रकारणम् ॥ तस्य माहात्म्यमतुलं शृणु त्वां कथयामि वै ॥ २ ॥ एको द्विजातिप्रवरो भार्यापुत्रसमन्वितः ॥ आथर्वणोपनिषदं देवतानां पठन् सदा ॥ ३ ॥ विष्णुस्तुतिर्यत्र परा स्वयं कण्वसमुद्भवः ॥ विष्णुकांच्यां निवसति स्नानसंध्यापरायणः ॥ ४ ॥ अर्थज्ञानेन शून्यः स अशुद्धं सर्वकर्मसु ॥ करोति वितथं तेन जातं कर्मफलं खलु ॥ ५ ॥ अशुद्धवेदपठनात्स्वाध्याय-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यैव विस्मृतेः ॥ उपपापं भवति वै तेन सर्वस्य नाशनम् ॥ ६ ॥ वेदानधीत्य विप्रेण त्यागे तेषां महान् क्षयः ॥ शाखारंडस्य कर्मास्य पुण्यं सर्वं क्षयं गतम् ॥ ७ ॥ भार्यानाशो धनं नष्टं तनयापुत्रयोर्मृतिः ॥ शरीरं जर्जरीभूतं दंतभग्नो गतश्रुतिः ॥ ८ ॥ मंददृष्टिश्च विकलो वायुरोगेण चावृतः ॥ यथा धनुस्तथा देहः सपतानकवायुना ॥ ९ ॥ रुदनं कुरुते नित्यं हाहेति प्रवदन् मुहुः ॥ दृष्टं तन्नष्टमित्येव चेतसा सुविचारितम् ॥ १० ॥ भो देवेश जगन्नाथ व्यंकटेश दयानिधे ॥ विष्णुकांच्यां विष्णुरूपी त्वमेव शिवरूपकः ॥ ११ ॥ देवीहेरंबरूपस्त्वं सूर्यरूपेण शोभसे ॥ मया किमपराद्धं ते किमर्थं क्लेशदो भवान् ॥ १२ ॥

शाखारंडलक्षणं स्मृतिरत्नाकरे । लौगाक्षिः । यः स्वशाखां परित्यज्य पारक्यमनुगच्छति ॥ शाखारंडः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥ १ ॥ इति । वसिष्ठः । एकदेशेऽपि शाखानां मध्ये योऽन्यतमं व्रजेत् ॥ स्वशाखां संपरित्यज्य शाखारंडः स उच्यते ॥ १ ॥ यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ॥ तच्छाखाध्ययनं कुर्यात्त्यागेन पतितो भवेत् ॥ १ ॥ न जातु परशाखोक्तं बुधः कर्म समाचरेत् ॥ आचरन् परशाखोक्तं कर्मारंडः प्रकीर्तितः ॥ २ ॥ प्रायश्चित्तेंदुशेखरे । रजस्वलामुखचुम्बनं कूटसाक्ष्यं वेदत्यागो वेदनिंदा च सुरापानसमानि पापानि ॥ कुशास्त्राध्ययनेन वितंडावादेन चाधीतवेदानां नाशनं ब्रह्मवधसमम् ॥ धर्मसिंधौ तृतीयपरिछेदपूर्वार्धे स्ववेदं पाठित्वा अन्यवेदार्थं पुनरुपनयनमाहुः । इत्यादि विचारः ॥ ७ ॥

मया चतुर्थवेदोक्तं स्तवनं क्रियते तव ॥ त्वदाज्ञया विना देव सुखं दुःखं न जायते ॥ १३ ॥ अतस्त्वमेव मे दुःखकारणं नात्र संशयः ॥ दीनबंधुरिति प्रथां त्यक्त्वा सुखमवाप्स्यसि ॥ १४ ॥ इति स्तुत्वा रुरोदोच्चैः पतितो भूमिमंडले ॥ निद्रां गतस्तदा स्वप्ने बालेन प्रतिबोधितः ॥ १५ ॥ उत्तिष्ठोत्तिष्ठ रे मूढ स्वकर्मफलभुग्भवान् ॥ वेदोच्चारः कृतोऽशुद्धस्तेन दुःखं तवागतम् ॥ १६ ॥ स्वराशुद्धः शक्रशत्रुः वृत्रो वधमवाप ह ॥ निष्कामकर्मणि न्यूने प्रत्यवायो न विद्यते ॥ १७ ॥ परं न्यूनं न चैवेष्टं काम्यकर्मणि भूसुर ॥ सकामेन कृतं कर्म तथापि फलदस्तव ॥ १८ ॥ अकामो वा सकामो वा यजेत ब्रह्मणस्पतिम् ॥ अतस्त्वां कथयाम्यद्य ग्रामे देवालयाभिधे ॥ १९ ॥ गच्छ तत्र धनुस्तीर्थं विद्याधरगृहे स्थितम् ॥ विद्याधराच्छुद्धवेदः शुद्धदेहश्च स्नानतः ॥ २० ॥ मदर्चां कुरु तत्रं च कल्याणं ते भविष्यति ॥ देवशर्मपुरो गत्वा हितकर्ता भविष्यसि ॥ २१ ॥ पुरोहितेन नाम्नात्वं पत्नीपुत्रयुतः खलु ॥ तिष्ठ गच्छ लघु प्रातः जागृतः सोऽभवत्तदा ॥ २२ ॥ आज्ञा यथा तु देवस्य तथैव कृतवान् द्विजः ॥ भद्रं समभवत्तस्य कूर्मस्य सकलं तदा ॥ २३ ॥ गार्ग्यगोत्रोद्भवः कूर्मः काश्यपस्यान्वयस्य च ॥ पुरो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हितोऽभवत्तत्र गर्गः कृष्णहितो यथा ॥ २४ ॥ अस्याध्यायश्रवाल्लक्ष्मीं लभते न चिरादिव ॥ २५ ॥
इति श्रीदेवालयग्राममाहात्म्ये त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ श्रीव्यास उवाच ॥
पद्मतीर्थस्य वृत्तांतं शृणु सर्वसुखावहम् ॥ देवस्य दक्षिणे भागे षष्टिहस्तप्रमाणतः ॥ १ ॥ अश्वत्थाधः
स्थितं तच्च स्नानादानाच्च सौख्यदम् ॥ महालक्ष्म्या जनिर्यस्मात् तच्च पद्मं हरेः करे ॥ २ ॥ श्वशुरस्य
च तोषार्थं तीर्थं वै कमलापहम् ॥ धनुस्तीर्थसमीपे तु सूर्यचंद्रमसोर्वरे ॥ ३ ॥ ईशान्यां चैव तीर्थे द्वे
ग्रहपीडाहरे सदा ॥ धनुः समीपे भौमस्य तीर्थं मंगलदायकम् ॥ ४ ॥ क्रमेणान्यानि तीर्थानि ग्रहपीडा-
हराणि वै ॥ बुधो जीवः कविः सौरिः राहुः केतुर्ग्रहा इमे ॥ ५ ॥ एषां तीर्थानि प्रोक्तानि दक्षिणोपक्र-
माणि च ॥ यदा यो हि ग्रहो नेष्टः तदा तत्तीर्थवर्यके ॥ ६ ॥ स्नानं दानं जपो होमः पुष्पधूपादितत्प्रि-
यम् ॥ प्रकुर्वन् सिद्धिमाप्नोति ग्रहपीडाहरं खलु ॥ ७ ॥ अस्य श्रवणतो नेष्टा ग्रहा राजन् कदापि न ॥
एकादशस्थिताः सर्वे फलं यच्छंति जैमिने ॥ ८ ॥ इति श्रीदेवालयग्राममाहात्म्ये चतुर्विंशोऽ-

१ यममलयोः हरम् ।

ध्यायः ॥ २४ ॥ ॥ छ ॥ जैमिनिरुवाच ॥ वेदव्यास महाभाग व्यंकटेशकथानकम् ॥ नारायणस्त्वं
कथय शरणं त्वामुपागतः ॥ १ ॥ यथामृतान्न वै तृप्तिः पिबन्नपि कथामृतम् ॥ देवालयपुरे ये तु ब्राह्मणाः
कर्मसिद्धिदाः ॥ २ ॥ ते के कथं च तद्वासः पुरे देवस्य पुण्यतः ॥ तथा चान्यानि तीर्थानि के च देवाः
स्थिताः परे ॥ ३ ॥ त्वं च साक्षाच्च सह्याद्रिरश्वत्थो हि तवाननम् ॥ व्यंकटेशकथा कृष्णा स्वयं विष्णु-
र्जलात्मकः ॥ ४ ॥ पापं मे बहुजन्मोत्थं त्वं क्षालय प्रवाहतः ॥ कृष्णा ककुभ्मती वेणा सावित्री वेदसू-
स्तथा ॥ ५ ॥ चतसॄणां नदीनां च कृष्णया संगमो यदा ॥ तदा मुक्ताः स्तुता जाता ह्यतः कृष्णा महानदी
॥ ६ ॥ लक्ष्मीपतेः कथारूपा कृष्णा वहति त्वन्मुखात् ॥ स्नानं ये तु करिष्यंति ते मुक्ता भवबंधनात् ॥ ७ ॥
अतः कथय माहात्म्यं व्यंकटेशस्य मंगलम् ॥ सूत उवाच ॥ एवं विप्रवचः श्रुत्वा व्यासस्तुष्टोऽब्रवीदि-
दम् ॥ ८ ॥ श्रीव्यास उवाच ॥ जैमिने शृणु देवस्य कथां पापापनोदिनीम् ॥ धन्योऽसि कृतकार्योऽसि
यतस्ते भक्तिरीदृशी ॥ ९ ॥ त्वत्प्रश्नश्चंद्रमाः साक्षात् कल्को मन्मुखपंकजम् ॥ तस्मात्त्वत्सनिकर्षेण
द्रवीभवितुमर्हति ॥ १० ॥ इदानीं कथयिष्यामि शृणु सादरचेतसा ॥ व्यंकटेशस्य चरितं महापापस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाशकम् ॥ ११ ॥ कृष्णातीरे पुरा कश्चिद्यजुर्वेदपरायणः ॥ अमरापुरसंज्ञं यत्क्षेत्रं तस्य समीपगः ॥ १२ ॥ उपमन्योर्जनिगोत्रे व्रात्यरूपेण मंदधीः ॥ महापापरतो यस्मात् सर्वैस्त्यक्तो बहिष्कृतः ॥ १३ ॥ ग्रामस्थैर्वैदिकैः सर्वैः स्मृतिशास्त्रपरायणैः ॥ तक्रादीनां च विक्रेता धनसंग्रहतत्परः ॥ १४ ॥ परान्नभोक्ता स्वगृहे न तु भुंक्ते कदाचन ॥ सर्वान्नभक्षको दुष्टः शूद्रादीनां प्रतिग्रही ॥ १५ ॥ पवित्रकूर्चदर्भादीन् समिधो गृह्य गच्छति ॥ असौ श्राद्धक्रियावेदी पितृसूक्तं पठत्यसौ ॥ १६ ॥ ग्रामाद्ग्रामांतरं गच्छन् श्राद्धभोजनप्रीतिमान् ॥ सर्वे चावृण्वते श्राद्धे प्रार्थयंति तमन्वहम् ॥ १७ ॥ असौ सर्वत्र तिष्ठन्सन् जनानुपदिशत्सदा ॥ श्राद्धप्रियोऽहं पितृभिर्वरो दत्तो ममाधुना ॥ १८ ॥ त्वद्भोजनेन तृप्ताः स्म त्वमस्मत्प्रीतिदायकः ॥ यस्मिन्दिने न वै श्राद्धमुपवासस्तवाशुभम् ॥ १९ ॥ अतस्त्वां वरदाः सर्वे पितृणां गणपाः सदा ॥ अस्मच्छ्राद्धे पितृस्थाने तवैवामंत्रणं खलु ॥ २० ॥ पुत्रैर्दैयं तदास्माकं तृप्तिर्द्वादशवार्षिकी ॥ इति प्राप्तो वरो लोका मया सर्वहितार्थिना ॥ २१ ॥ अनाहूतः स्वयं गत्वा भुंक्ते स्वातंत्र्यमावहन् ॥ कृपणो बहुवाचालो मृतश्राद्धस्य भक्षकः ॥ २२ ॥ सूतकिनां भक्षपरः स्वपितुः श्राद्धदो नहि ॥

स्वपितृतिथिमाज्ञाय कार्याद्ग्रामांतरं गतः ॥ २३ ॥ तृतीयदिवसे प्राप्य ग्रामं भार्यां जनं च सः ॥ कृतं श्राद्धं कथयति ममेति प्रहसन् सदा ॥ २४ ॥ कुत्र श्राद्धं कुत्र वान्नं कुत्र वा दीयते धनम् ॥ तत्र गत्वा दरिद्रोऽहं किंचिन्मे दीयतां वसु ॥ २५ ॥ इति भ्रमति देशेषु न कदाचिद्गृहेऽवसत् ॥ गृहे वा भुंजतो बालान् मृष्टान्नं भर्त्सयत्यसौ ॥ २६ ॥ पतिव्रतां स्वजायां वै भीत्या स्वल्पाशनामपि ॥ ताडनं कुरुते नित्यं परस्त्रीगमनोत्सुकः ॥ २७ ॥ मद्यपानं विविक्ते स करोति मांसभक्षणम् ॥ द्यूतेषु वीरो वृजिनेषु शूरो हिंसाविहारो भयदो जनानाम् ॥ २८ ॥ एवंविधो दुष्टमना जनैर्निर्भर्त्सितस्तदा ॥ भार्यां पुत्रानुपादाय जगाम नगराद्बहिः ॥ २९ ॥ भ्रमन् भ्रमन् स दुःखेन निराहारास्तु बालकाः ॥ द्रव्यव्ययं न सहते लाभाभावाच्चुकोप च ॥ ३० ॥ मातरन्नं मातरन्नं देहि देहीति बालकाः ॥ दीना अयाचंत तदा शुष्ककंठोष्ठतालुकाः ॥ ३१ ॥ जलं यद्यधिकं पीतं स्वीयने भर्त्सनं तदा ॥ भार्या दुःखं सहित्वोच्चैः पातिव्रत्यात्प्रणम्य च ॥ ३२ ॥ प्राह सा प्रांजलिर्दीना बोधयामास तं पतिम् ॥ कायस्तु क्षणिकः स्वामिन् जलबुद्बुदसन्निभः ॥३३॥ अद्य श्वो वा परश्वो वा मृत्युर्वै प्राणिनां ध्रुवः ॥ धर्मकार्याद्दते देहो नरकानुगतो ध्रुवम्॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लेशितैः किं धनैरेभिः राजतस्करबंधुभिः ॥ नीयते धनमन्यत्र किमर्थं कृपणो भवान् ॥ ३५ ॥ इमे बाला अनाथाश्च सूपलालनवर्जिताः ॥ अहं जीवन्मृतप्राया त्वद्धीना विधवा यथा ॥ ३६ ॥ सर्वेषामाश्रमाणां च गार्हस्थ्यं श्रेष्ठमुच्यते ॥ यदानुकूला नारी स्यात्तावत्कर्मी वसेद्गृहे ॥ ३७ ॥ प्रतिकूला यदा नारी तावत्त्याज्यान्यथा पतेत् ॥ शूद्रप्राया इमे पुत्राः देवशास्त्रविवर्जिताः ॥ ३८ ॥ कुलाचारकृतघ्नाः स्युः शिक्षणीया हि मत्सुताः ॥ इदं गृहमियं भार्या ह्यीमे पुत्रा इदं धनम् ॥ ३९ ॥ त्वदंते विनिवर्त्या हि धर्म एकः सुहृत्तव ॥ वयं धनप्रभोक्तारो न ते दुष्कृतकर्मणः ॥ ४० ॥ तस्माद्धर्ममवेक्षस्व मा वृथा कोपसंयुतः ॥ कृपणत्वं त्यज स्वामिन् बालकान् परिपालय ॥ ४१ ॥ तीर्थयात्रां कुरु विभो तत्र देयं धनं बहु ॥ अन्नदानात्पापहानिर्मरणे कुत्र तद्धनम् ॥ ४२ ॥ परलोकैकपाथेयं कर्तव्यं पुण्यमन्वहम् ॥ एकदंत उवाच ॥ तव वाचमहं श्रुत्वा सुचित्तस्तत्करोम्यहम् ॥ ४३ ॥ त्वयाहं तारितो भद्रे तीर्थं गच्छामि सत्वरम् ॥ स्वग्रामे न गमिष्यामि यावत्पापस्य संक्षयः ॥ ४४ ॥ इत्युक्त्वा स्वजनैः सार्धं सुखेन मार्गमाक्रमत् ॥ शकटारूढ एवासौ सर्वैर्गच्छति सोऽन्वहम् ॥ ४५ ॥ एकदा वनमध्येते सर्वतो दारुणावृते ॥

निर्जले निर्मनुष्ये च हिंस्रजीवसमावृते ॥ ४६ ॥ गच्छंतो दुःखसंयुक्ताः क्षुत्तृड्भयनिपीडिताः ॥ पुरतो गच्छतां तेषां वटद्रुर्दृष्टिमागतः ॥ ४७ ॥ उष्णेन तप्ताः खलुशीतलेच्छा जग्मुर्वटं तं बहुतोषमारात् ॥ अकस्माद्वटवृक्षात्तु पिशाचो भक्षितुं गतः ॥ ४८ ॥ भयंकरं च तं दृष्ट्वा दीर्घजानुं महाहनुम् ॥ दीर्घदंष्ट्रं लंबजिह्वं मेघगंभीरनिःस्वनम् ॥ ४९ ॥ दृष्ट्वा पलायनपरा दक्षिणां दिशमाश्रिताः ॥ तत्रापि तिन्तिडीवृक्षाद्भूते द्वे समुपस्थिते ॥ ५० ॥ भक्षणार्थं समायाते प्रांचीं ते प्राद्रवन् भयात् ॥ तत्रैकोश्वत्थवृक्षश्च बहुपर्णफलान्वितः ॥ ५१ ॥ विदारितमुखं तस्माद्रक्षसां त्रयमागतम् ॥ निशम्य गर्भगलिता उत्तरां दिशमागमन् ॥ ५२ ॥ अक्षवृक्षात्तु चत्वारः पिशाचा आययुः पुरः ॥ किं कार्यं किं च कर्तव्यं प्राणहानिर्ध्रुवं भवेत् ॥ ५३ ॥ इति चिंतातुराः सर्वे पतिरूचे भयातुरः ॥ धर्मस्य फलमेतावदधर्माद्धि सुखं बहु ॥ ५४ ॥ स्त्र्युवाच ॥ मा मा वद प्राणनाथ धर्मो रक्षति रक्षितः ॥ अन्योन्यं ते ब्रुवंता वै भीताः प्राणपरिक्षयात् ॥ ५५ ॥ एतस्मिन्नेव काले तु द्विज एकः समागतः ॥ रुद्राक्षभस्मधारी च व्यंकटेशपदार्चकः ॥५६॥ तेन सर्वं दृष्टमेव दया तेषां समागता ॥ पात्रस्थेन जलेनैव प्रोक्षितास्ते पिशाचकाः ॥५७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदैव दिव्यरूपास्ते शांता नम्रत्वमागताः॥ एकदंतपरीवारो निर्भयः समजायत ॥ ५८ ॥ प्रणम्य यातुधानास्ते धन्यस्त्वं कुत आगतः ॥ उदकं कस्य तीर्थस्य वदास्माकं महामते ॥ ५९ ॥ देवालयपुराद्भूता आगतोऽहं सुतीर्थगः ॥ आम्नायाया जलमिदं देवतीर्थेन मिश्रितम् ॥ ६० ॥ तत्प्रोक्षणान्मुक्तिरभूत् पिशाचादुष्टयोनितः ॥ एकदंत उवाच ॥ व्यंकटेशस्य ग्रामे वै गच्छामि प्रभुदर्शने ॥ ६१ ॥ त्वन्मुखेऽन्यच्च किं नाम कथयस्व महामते ॥ व्यंकटेशस्य भक्तोऽसि नाम तेऽन्यच्च वर्तते ॥ ६२ ॥ द्विज उवाच ॥ व्यंकटेशोऽनेकरूपस्तत्रैव परिसंस्थतः ॥ भक्तरक्षणसिद्ध्यर्थं मयूरेशोऽभवत्स्वयम् ॥ ६३ ॥ भक्तोपदेशदानार्थं शिवरूपेण संस्थितः ॥ समत्वज्ञानदृष्ट्यर्थं विष्णुरूपेण भक्तपः ॥ ६४ ॥ सूर्यरूपः प्रकाशार्थं रक्षार्थं क्षेत्रपः प्रभुः ॥ भूतप्रेतादिपीडाया हननार्थं मरुत्सुतः ॥ ६५ ॥ भक्तेभ्यो ज्ञानदानार्थं दत्तात्रेयस्वरूपवान् ॥ अपमृत्युविनाशाय देवो नृहरिरूपधृक् ॥ ६६ ॥ मुरलीधरस्वरूपेण स्वीयकार्यसुतोषदः ॥ मुरलीधरनामाहं बालरूपधरस्त्वहम् ॥ ६७ ॥ गोकुले या बाललीला तेनाहं मुरलीधरः ॥ अहं कृष्णावतारो वै बकुला जननी मम ॥ ६८ ॥ अतो बालस्वरूपेण पूर्वस्मृत्यर्थमादरात् ॥

भविष्यामि पुरे ह्यस्मिन् स्थानं मे पृष्ठतः परम् ॥ ६९ ॥ सपादशतहस्ते च स्थाने गुप्तस्त्वहं स्थितः ॥ कालेन प्रगटो भूत्वा साधुना दत्तरूपधृक् ॥ ७० ॥ तत्र मत्पूजनं कार्यं भजनं दानमेव च ॥ इति देवस्य वचनान्मुरलीधरनाम वै ॥७१॥ गृह्णामि सततं नाम देवादेशात्तथार्थतः ॥ मु सुबंधनमाख्यातं च्छेदार्थे रेफ उच्यते ॥ ७२ ॥ लमानंदे विजानीयात् सदा तद्धारको विभुः ॥ मोहच्छेदेन चाह्लादो यस्मिन् तं धरति प्रभुः ॥ ७३ ॥ मुरलीधरनामा स भक्तरक्षाकरः शिवः ॥ भवंतस्तत्र गच्छंतु कृत्वा वै दर्शनं तयोः ॥ ७४ ॥ पिशाचमोचने तीर्थे मुरलीधरपृष्ठतः ॥ कृत्वा स्नानं नदीपानं त्वरया कुरुतानघाः ॥ ७५ ॥ एकदंतमथ प्राह त्वं चापि कुरु दर्शनम् ॥ दिनानि कतिचित् स्थित्वा परं ज्ञानमवाप्स्यसि ॥ ७६ ॥ इत्युक्त्वा स गतस्तीर्थयात्रां ध्यात्वा शिवं हृदि॥ राक्षसा एकदंतश्च व्यंकटेशं ययुर्मुदा ॥ ७७॥ चक्रुर्यथोक्तं कर्माणि पिशाचाः स्वर्गमागमन् ॥ मुरलीधरसेवायामेकदंतः स्थितस्तदा ॥७८॥ यत्र सर्वं तीर्थफलं दानयज्ञफलं तथा ॥ प्राप्यते भक्तिमार्गेण हीति प्रभ्वाज्ञया स्थितः ॥ ७९ ॥ पापान्मुक्तः स्वर्गलोकं जगाम भार्यापुत्रैः सहितो वेदविद्भिः ॥ इत्थं पुण्यं देवदेवस्य चास्ति काले तिष्ये देवदेवा भवंति ॥८०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्याध्यायस्य श्रवणं मुरलीधरतोषदम् ॥ लक्ष्मीपतेस्तु कृपया जायते सर्वसौख्यदम् ॥ ८१ ॥
इति श्रीदेवालयग्राममाहात्म्ये पंचविंशतितमोऽध्यायः ॥ २५ ॥ ॥ छ ॥ श्रीव्यास उवाच ॥ जैमिने
शृणु वृत्तांतमत्यद्भुतकरं परम् ॥ विष्णोः करे स्थितस्यैव पांचजन्यस्य पापहम् ॥ १ ॥ तीर्थं पुरो वर्तते
वै षष्टिहस्तप्रमाणतः ॥ यत्र शखस्यं धमनं कुरुते देवराट् स्वयम् ॥ २ ॥ यत्रकुत्रापि तन्नादः श्रवणान्मं-
गलप्रदः ॥ स्त्रीभिः शूद्रैः कृतो नादः सर्वामंगलदायकः ॥ ३ ॥ पुरा देवालये ग्रामे कंकणाख्यो द्विजः
स्मृतः ॥ महापापोपपापानि सदैव कुरुते खलः ॥ ४ ॥ सदा परस्त्रियं रंतुमिच्छा तस्य विवर्धते ॥
गृहीत्वा गृहगं द्रव्यं नाशयत्येव निश्चितम् ॥ ५ ॥ तस्य स्त्री सुभगा नारी रूपेण धिक्कृताप्सराः ॥ पति-
प्राणा विलोक्यासुं परस्त्रीरतमानसम् ॥ ६ ॥ कामपीडितचित्ता सा कुट्टिनीसंगयोगतः ॥ पुरुषाणां
समायोगे बहुचंचलमानसा ॥ ७ ॥ वंचयित्वा पतिं भार्या सानंदा क्रीडने क्षमा ॥ एकस्मिन्दिवसे जारं रंतुं
सा गंतुमुद्यता ॥ ८ ॥ तावद्भर्ता जागृतोऽभूद्धस्तं धृत्वाब्रवीदिदम् ॥ किं कर्म कुरुषे रंडे दुर्बुद्धे जारगा-
मिनि ॥ ९ ॥ ताडयामास तां रोषात् सापि तं ताडयत् क्रुधा ॥ सोचे त्वं जारकुशलः मां त्यक्त्वा सर्वदा
परम् ॥ १० ॥ गच्छसि त्वं महामोहात् किं कर्तव्यं मयाधुना ॥ यथा भर्ता तथा भार्या करोषि ताडनं
वृथा ॥ ११ ॥ अहं भार्या सर्वकाले ह्यन्यकाले परः पतिः ॥ तवाज्ञा शिरसा धार्या जारवंचनमंतरा ॥
॥ १२ ॥ स्त्रियेत्युक्तं वचः श्रुत्वा जहास परमादरात् ॥ धृत्वा करं सौम्यवाचा जारं सेवय सर्वदा ॥ १३ ॥
अहं परां संश्रयामि धनकार्यं परं हि मे ॥ संपाद्य त्वं धनं मह्यं देहि नित्यं सुतोषतः ॥ १४ ॥ अहं पर-
स्त्रियं दास्ये नित्यमेवं कृते महः ॥ उभयोरपि यन्मोदः संसारः सुखदायकः ॥ १५ ॥ इत्थं विनिमये
जाते सानंदौ च परस्परम् ॥ निर्भयौ जातसंह्लादौ चिक्रीडाते यथेच्छकम् ॥ १६ ॥ एकदा सुंदरीं गृह्य
सुरूपां ब्रह्मवंशजाम् ॥ एकांते शंखतीर्थे वै रंतुमागाद्भयातुरः ॥ १७ ॥ शंखध्वनिं स शुश्राव निशीथे
भयदायके ॥ नरः पापयुतः कोऽपि नारी वाऽन्यायकारिणी ॥ १८ ॥ यस्य नादस्य श्रवणाद्गत-
पापौ भविष्यतः ॥ एवं बहुदिनं वृत्तं तयोस्तु रममाणयोः ॥ १९ ॥ एकदा भर्तृमित्रेण निशम्य विनि-
वेदितम् ॥ श्रुत्वैव भर्ता परमः स क्रुद्धः कंपागयष्टिश्चलितो गृहाद्वै ॥ २० ॥ शस्त्रं गृहीत्वा हननाय
तस्यास्तयैव दुष्टस्य शरीरछेदे ॥ शंखतीर्थे तदा गत्वा प्रत्यक्षं दृष्टवान्नघम् ॥ २१ ॥ अधावद्धननार्थाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पलायितावुभावपि ॥ श्वश्रूसमीपे सा निद्रां चकार मनमोहिनी ॥ २२ ॥ रक्ताक्षः क्रोधदृष्टिः स भार्यामेत्य ततोड ह ॥ वेणीं धृत्वा लत्तया च मुष्टिभिर्दशनैर्नखैः ॥ २३ ॥ कूर्परेण च जानुभ्यां मस्तके स जघान ह ॥ इतो निर्गच्छ हा दुष्टे शठे रंडे मुखं तव ॥ २४ ॥ नावलोक्यं जारिणी त्वं महापापवती सदा ॥ स्त्र्युवाच ॥ कोपस्य कारणं किं ते किमर्थं ताडनं मम ॥ २५ ॥ अहं पापा कदाचिन्न किमर्थं शपथं ददः ॥ पतिरुवाच ॥ दुष्टे वल्गसि कि मोहात्प्रत्यक्षं दृष्टिगोचरम् ॥ २६ ॥ पापं निर्गच्छ निर्गच्छ वासस्तेनैव रोचते ॥ स्त्र्युवाच ॥ सर्पः सर्पः सर्प इति मत्वा भूमौ व्यताडनम् ॥ २७ ॥ कुरुषे नाथ कस्मात्त्वं नाहं पापमकारहम् ॥ शपथं ते करिष्यामि समक्षं ग्रामवासिनाम् ॥२८॥ तत्र ये मिलिता लोकास्तैः सर्वैर्दर्शितं मतम् ॥ पतिरुवाच ॥ रंडे कुरु त्वं शपथं समक्षं ग्रामवासिनाम् ॥ २९ ॥ जायोवाच कथं ब्रूहि करोमि शपथं खलु ॥ व्यास उवाच ॥ सर्वेषां मतमाज्ञाय प्राह भार्यां सुकोपतः ॥ ३० ॥ अग्निदिव्यं विधानेन कुरु सर्वस्य गोचरम् ॥ यदि शुद्धा न दाहस्ते त्वशुद्धा मृत्युमाप्स्यसि ॥ ३१ ॥

मिताक्षरायां अग्निदिव्यविधिः । दिव्यमातृकोक्तसाधारणधर्मेषु सत्सु तुलाविधानोक्तधर्मावाहनादिशिरःपत्रारोपणांते च वि-

करौ विमृदितव्रीहेः क्षालयित्वा ततो न्यसेत् ॥ सप्ताश्वत्थस्य पत्राणि तावत्सूत्राणि वेष्टयेत् ॥ ॥ ३२ ॥ त्वमग्ने सर्वभूतानामंतश्चरसि पावक ॥ साक्षिवत्पुण्य पापेभ्यो ब्रूहि सत्यं कवे मम ॥ ३३ ॥ तस्येत्युक्त्वतो लोहं पंचाशत्पलिकं समम् ॥ अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि ॥ ३४ ॥ स तमादाय सप्तैव मंडलानि शनैर्व्रजेत् ॥ षोडशांगुलकं ज्ञेयं मंडलं तावदंतरम् ॥ ३५ ॥ पति रुवाच ॥ एवं

ध्यंते सति अयं अग्निदिव्यविधौ विशेषः ॥ ३१ ॥ विमृदितव्रीहेः विमृदिताः विधर्षिताः व्रीहयः कराभ्यां येनासौ विमृदितव्रीहिः । तस्य करौ क्षालयित्वा तिलकालकालकव्रणकिणादिस्थानेषु अलक्तरसादिना अंकयित्वा अनंतरं सप्ताश्वत्थपर्णानि हस्तयोरंजलीकृतयोः न्यसेत् । तानि पर्णानि हस्तसहितानि शुक्लैः सप्ततंतुभिः वेष्टयेत् । अश्वत्थपत्राणामुपरि शमीपत्राणि दूर्वापर्णानि सप्त सप्त दध्यक्तान् अक्षतान् पुष्पाणि च स्थापयेत् ॥ ३२ ॥ कर्तुः अभ्यभिमंत्रणं त्वमग्ने इति । अस्य विधिः कर्तुः शिरसि प्रतिज्ञापूर्वकं समंत्रं पत्रं शिरसि बध्नीयात् ॥ लोहशुद्ध्यर्थं संतप्तलोहपिंडं उदके निक्षिप्य पुनः संताप्योदके निक्षिप्य तृतीये तापे संताप्य संदंशेन गृहीत्वा पुरत आनीय त्वमग्ने इति मंत्रं कर्ता ब्रूयात् । प्राड्विवाकस्तु (न्यायाधीश) मंडलभूभागादक्षिणे प्रदेशे लौकिकमग्निमुपधाय अग्नये पावकाय स्वाहेति आज्येनाष्टोत्तरशतं जुहुयात् । तस्मिन्नग्नौ अयःपिंडं निक्षिप्य तस्मिंस्ताप्यमाने धर्मावाहनादिपूर्वोक्तविधिं विधाय अयःपिंडमभिमंत्रयेत् । त्वमग्ने वेदाश्चत्वार इत्यादि ॥ ३३ ॥ पंचाशत्पलिकं द्विशतकर्षमानं समं अस्रि कोणरहितम् । सर्वतश्च समं वृत्तं श्लक्ष्णं अष्टांगुलायामम् । हस्तयोः दध्याद्यंतरितयोः उपरि न्यसेत ॥ ३४ ॥ स तमादाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्यं कुरुष्व त्वमपापा त्वहमेव च ॥ प्रतिज्ञापूर्वकं कर्म शुद्धिमाप्नोषि दिव्यजाम् ॥ ३६ ॥ ह्युवाच ॥ सर्वे शृणुत हे लोका अहं पापयुता यदि ॥ तर्ह्ययं लोहपिंडो मे हस्तौ दग्धौ करिष्यति ॥ ३७ ॥ सर्वैरुक्तं तथास्त्वेतद्भर्त्रा श्वश्र्वा तथैव च ॥ सर्वो विधिः पूर्णतया जातो वह्निर्ददाह न ॥ ३८ ॥ सर्वे धन्या इयं धन्या पतिव्रतगुणान्विता ॥ सत्यं वक्ति सत्यपरा नैव पापान्ब्रुवामहे ॥ ३९ ॥ गृहाण भार्यां विप्रेंद संशयं त्यज दूरतः ॥ मया दृष्टं मया दृष्टमयं ते दृष्टिविप्लवः ॥ ४० ॥ पतिरुवाच ॥ मया दृष्टं सत्यमेव नास्ति मे दृष्टिविभ्रमः ॥ अग्निं शपाम्यहं रोषादसत्यसाक्षिणं खलम् ॥ ४१ ॥ इत्यपोऽजलिनादाय भो वह्ने शृणु मे वचः ॥ कूटसाक्ष्यप्रदातारं शपामि त्वामसंशयम् ॥ ४२ ॥ व्यास उवाच ॥ प्रत्यक्षोऽभूत्तदा वह्निरूचे ब्राह्मणसत्तमम् ॥ भो भो विप्र महाबुद्धे जाजले शृणु मे वचः ॥ ४३ ॥ अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ॥ तत्रापि तु कृतं पापं मोक्षपुर्यां विनश्यति ॥ ४४ ॥

सप्तैव मंडलानि शनैर्व्रजेत् । अवस्थानमंडलं प्रथमं अंतररहितं आग्नेयमंडलं चाद्यमित्यादि अष्टममंडले गतः अंगुलानां षट्पंचाशदधिकशतद्वयं संपाद्यते । अष्टमे मंडले स्थित्वा नवमे मंडले अग्नितप्तं अयःपिंडं त्यक्त्वा कराभ्यां व्रीहीर्मर्दयित्वा अदग्धहते शुद्धचेत । दग्धहस्तश्चेदशुद्धः । इति याज्ञवल्क्यस्मृतिमिताक्षरायां च ॥ ३५ ॥

तत्र जातं महापापं वाराणस्यां लयं गतम् ॥ तत्रोद्भूतं त्वघं पंचक्रोश्यां तज्जं शिवालये ॥ ४५ ॥ तज्जं मुक्तेर्मंडपे तु तज्जं वै ज्ञानमंडपे ॥ तस्मिन्कृतमघं विप्र पुरे देवालयाभिधे ॥ ४६ ॥ गच्छत्येव न संदेहस्तज्जं देवस्य मंदिरे ॥ तज्जं तु नृहरेः स्थाने नद्यास्तीरे सुशोभने ॥ ४७ ॥ तत्रजातं तु यत्पापं दत्ततीर्थं गमिष्यति ॥ तत्रोद्भूतं शंखतीर्थं परं पापं गमिष्यति ॥ ४८ ॥ एनस्तज्जं निशीथे वै शंखशब्देन नश्यति ॥ निशीथे जायते शब्दः कृतो भगवता स्वयम् ॥ ४९ ॥ लक्ष्म्यास्तु मंदिरं तद्वै विष्णुना सह जैमिने ॥ क्रीडार्थं निर्मितं तत्र रक्षको बंधुरब्जजः ॥५०॥ तत्कालशब्दश्रवणान्न पापं देवशासनात् ॥ अतो भार्यां तव विभो निष्पापा सत्यमेवहि ॥ ५१ ॥ अनया किं प्रतिज्ञातं सपापा चेद्दहत्वयम् ॥ अतो मया न दग्धा वै गृहाण त्वं स्त्रियं वराम् ॥ ५२ ॥ इति श्रुत्वा शांतकोपो जाजलिर्ब्रह्मवित्तमः ॥ जाययानंदचित्तेन संसारमकरोत्सुखी ॥५३॥ श्रुता वार्ता जनैर्देशे पापकर्मकरा नराः ॥ तत्र पापं प्रकुर्वंति परस्त्रीसंगतो बहु ॥५४॥ पुरुषा क्रोधसंयुक्ताः भूमिमाहुः शुचान्विताः ॥ हे भूमे शृणु वाक्यं नो त्वत्स्थलं पापकारि च॥५५॥योग्यं न ते महाभागे वयं देवास्त्वदाश्रयाः ॥ भूदेवा इति च ख्याता अस्मां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तारय पापतः ॥५६॥ शंखतीर्थे नैव पापं तेन तापो महान् खलु ॥ मंदिरे कलहो नित्यं पतिं प्रार्थय धारिणि ॥५७॥ इति द्विजवचः श्रुत्वा रहसि प्रार्थितः पतिः ॥ अब्जतीर्थे त्वघं नास्ति ग्रामे कोलाहलः सदा ॥५८॥ अलक्ष्मीको भवेद्ग्रामस्तव शोक उदेष्यति ॥ जातं पापं यदि गतं कलौ सर्वेऽपि पापकाः ॥ ५९ ॥ दीर्घदर्शी त्वमेवासि विचारं कुरु सुव्रत ॥ सपत्नीभ्रातृतो नाशं पुरं यास्यति वै क्षणात् ॥६०॥ विचारय महाबुद्धे ग्रामसंरक्षणं कुरु ॥ इत्युक्तो भूमिदेव्या तु व्यंकटेशः कृपानिधिः ॥ ६१ ॥ तीर्थलोपं करिष्यामि कालेन कियता प्रिये ॥ अद्यप्रभृति शंखस्य रात्रौ नादस्य लोपनम् ॥ ६२ ॥ तीर्थोपरिष्ठाच्छ्रीशंभोः स्थापनं बहुकालतः ॥ भविष्यति सुखायैव कल्मषस्य निवारणात् ॥ ६३ ॥ इत्युक्ते वै भगवता लोपः शब्दस्य तत्क्षणात् ॥ जाता लक्ष्मीर्दुःखयुता मद्भंधोः किमघं प्रभो ॥ ६४ ॥ तीर्थलोपो यदि भवेद्भ्रातुः का मे गतिर्वद ॥ श्रीलक्ष्मीव्यंकटेश उवाच ॥ लुप्ते तीर्थे तत्र गत्वा शंखं गृह्य रमे ततः ॥ ६५ ॥ शंखपूजां पुरा कृत्वा तत्स्थोदेन च मार्जनात् ॥ पुण्यं तीर्थभवं तस्य जायते नात्र संशयः ॥६६॥ अतः परं पापजातं चरणे मम सन्निधौ॥ नश्यत्येव न संदेहो भव लक्ष्मीः सुखाय वै॥६७॥

इत्युक्त्वा तां रमां गृह्य भूमिं चापि महामनाः ॥ आनंदेन समायुक्तः प्रजाशं कृतवान् विभुः ॥ ६८ ॥ अस्याध्यायस्य श्रवणात्पाठाच्च चिंतनादपि ॥ व्याख्यानात् पुस्तकस्यापि संग्रहात् सौख्यमेव च ॥६९॥ इति श्रीदेवालयग्राममाहात्म्ये षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ छ ॥ श्रीजैमिनिरुवाच ॥ द्वैपायन मुनिश्रेष्ठ व्यंकटेशेन यत्कृतम् ॥ स्वलोकरक्षणार्थं वै रमया किं कृतं भुवा ॥ १ ॥ तवाननाच्छ्रुतवतो मम तुष्टिः प्रजायते ॥ श्रुतादभद्रनाशं च करोति हृदयस्थितः ॥ २ ॥ गोविंदो भक्तवात्सल्याद्वत्सं धेनुरिवागमत् ॥ अतः कथय मां सर्वं पावनं सद्गुरो प्रभो ॥ ३ ॥ व्यास उवाच ॥ वक्तुः प्रीतिर्भवेद्यत्र सादरे श्रोतरि प्रभो ॥ अतस्त्वां कथयिष्यामि जनार्दनकथानकम् ॥ ४ ॥ एकस्मिन् दिवसे देवो व्यंकटेशो दयानिधिः ॥ लक्ष्मीर्धारित्री गरुडः चक्रं शंखो गदा धनुः ॥ ५ ॥ वनमाला कौस्तुभश्च श्रीवत्सं नंदनंदकौ ॥ विष्वक्सेनः सैन्यपतिर्मंत्रय समुपाविशन् ॥ ६ ॥ श्रीलक्ष्मीव्यंकटेश उवाच ॥ मया मंत्राय चाहूता आगताः सुखमस्तु वः ॥ सर्वेषां मतमाज्ञाय कार्यं कर्म हिताय यत् ॥ ७ ॥ मम चिंता समुत्पन्ना कथं लोकस्य रक्षणम् ॥ मद्वासो यत्र भवति तत्र तत्र शिवं सदा ॥ ८ ॥ देवालयपुरे वासो भवद्भिश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मया सह ॥ अतस्तत्रत्यलोकानां कथं भद्रं भविष्यति ॥ ९ ॥ कलौ प्राप्ते दुष्टबुद्ध्या पापवृद्ध्या शिवा-
त्ययः ॥ अनावृष्टिर्मारिका च नानारोगसमुद्भवः ॥ १० ॥ तेन संपीडितो लोको जह्याज्जीवितमात्मनः ॥
मम दुःखं भवेत्तेन तद्यथा न भविष्यति ॥ ११ ॥ तदुपायं कथयत भवंतो ज्ञानसंयुताः ॥ व्यास
उवाच ॥ सर्वैस्तु चोदिता लक्ष्मीर्बभाषे गरुडध्वजम् ॥ १२ ॥ श्रीलक्ष्मीरुवाच ॥ भो नाथ तव या
चिंता सा सत्या लोकरक्षणे ॥ यथा माता पिता रक्षेत् पुत्रान् स्वान् धर्मतत्परः ॥ १३ ॥ तव पुत्राः
प्रजाः सर्वास्त्वं रक्ष वसुधाधिप ॥ त्वत्स्थले यन्निवासः पुण्यकर्मकरा विभो ॥ १४ ॥ तेषां प्रीतिर्भवे-
न्नित्यं पितुराज्ञाकरे यथा ॥ देव उवाच ॥ हे रमे प्रीतिदे मह्यं सत्यं वदसि मत्सखि ॥ १५ ॥ मद्ग्रामस्य
जनानंदो रक्षणं च कथं वद ॥ श्रीलक्ष्मीरुवाच ॥ तवाज्ञा शिरसा धार्या सर्वज्ञोऽसि तथाप्यहम् ॥ १६ ॥
वच्म्युपायं यया भद्रं गोकुले तव वै कृतम् ॥ तां मायां प्रदिश स्वामिन् त्वन्मनोभीष्टदायिनीम् ॥१७॥
लक्ष्म्यास्तु वचनं श्रुत्वा पार्वतीं प्रार्थयद्विभुः ॥ त्वया स्थेयं मम ग्रामे लोकरक्षणतत्परे ॥ १८ ॥
धृतिः पुष्टिः क्रिया तुष्टिर्मतिर्लज्जास्वरूपिणी ॥ स्वाहा स्वधास्वरूपा त्वं देवपितृसुतोषदा ॥ १९ ॥

गोकुले मथुरायां च त्वया मद्रक्षणं कृतम् ॥ अतस्त्वां प्रार्थयाम्यद्य महामार्यादिभीतितः ॥ २० ॥
मद्ग्रामवासिनां रक्षां कुर्वनावृष्टिनाशतः ॥ तव शाकंभरीत्येवमत्र नाम भविष्यति ॥ २१ ॥ शाकंभरीं
स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥ अक्षय्यमश्नुते शीघ्रमन्नपानादिकं फलम् ॥ २२ ॥ शन्नो भवतु
हे देवि तव वासः शुभंकरः ॥ ये पूजां ते करिष्यंति गंधपुष्पादिदानतः ॥ २३ ॥ अनावृष्टिभये घोरे
रोगभीतौ च संकटे ॥ रुद्राभिषेकं कुर्वंति तव मंत्रजपं तथा ॥ २४ ॥ सप्तशत्याः प्रपठनात् सर्वा भीतिर्ग-
मिष्यति ॥ त्वत्सहायार्थमतुलबलो भीमपराक्रमः ॥ २५ ॥ स्वर्णाकर्षणसंज्ञस्तु भैरवः स्थापितो मया ॥
तव दृष्टिपथे वास्ति समसूत्रे शिवंकरः ॥ २६ ॥ तवैव प्रेमभाग् जातः त्वं वंशीधरपृष्ठतः ॥ ये तु भैर-
वदेवस्य पूजां कुर्वंति तत्पराः ॥ २७ ॥ कल्याणं जायते तेषां स्वर्णप्राप्तिर्मनोर्जपात् ॥ मद्ग्रामे गमने वासे
तस्याज्ञा बलमुच्यते ॥ २८ ॥ काश्यां चैव मयूरे च करवीरे यथा तथा ॥ कालभीनग्नरंकाश्च स्वर्णा-
कर्षणभैरवः ॥ २९ ॥ श्रीपार्वत्युवाच ॥ एवमेव करिष्यामि भवदाज्ञा गरीयसी ॥ व्यास उवाच ॥
एवं शाकंभरी तत्र स्वर्णाकर्षणभैरवः ॥ ३० ॥ अष्टम्यां च चतुर्दश्यां यात्रा कार्या तयोः सदा ॥ भौमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्रे महामाया रविवारे च भैरवः ॥ ३१ ॥ पूज्यनीयौ प्रयत्नेन सदा कल्याणदावुभौ ॥ देवी पीडानाशकरी भक्तानां भक्तवत्सला ॥ ३२ ॥ देवाज्ञप्तो भैरवोऽथ स्वर्णाकर्षणकर्मणि ॥ सिद्धो देवस्य भक्तानां देवालयनिवासिनाम् ॥ ३३ ॥ एवं श्रीव्यंकटेशेन कृतं रक्षणकारणम् ॥ श्रुत्वा मुक्तो दरिद्रात्तु सुख्याधिव्याधिवर्जितः ॥ ३४ ॥ इति श्रीदेवालयग्राममाहात्म्ये सप्तावशींतितमोऽध्यायः ॥ २७ ॥ ॥ छ ॥

॥ श्रीव्यास उवाच ॥ जैमिने शृणु वृत्तांतमत्याश्चर्यकरं परम् ॥ अज्ञानेनान्वितो लोकः कामक्रोधादिपीडितः ॥ १ ॥ स पापं कुरुते नित्यं लोभेन च वशीकृतः ॥ व्यंकटेशेन तज्ज्ञातं तेषां भद्रं कथं भवेत् ॥ २ ॥ मनसा संविचार्याथ जनपीडाकरान् खलान् ॥ देवालयग्राममध्यान्निष्कास्य स्यामहं सुखी ॥ ३ ॥ अहंतासत्यपैशून्यकामक्रोधमदाः खलाः ॥ लोभमोहौ च मात्सर्यं महामोहप्रदा इमे ॥ ४ ॥ एतान् सर्वान्समाहूय व्यंकटेशः कृपाकरः ॥ उवाच सर्वैर्न स्थेयं युष्माभिर्मत्पुरेऽनिशम् ॥ ५ ॥ ते ऊचुः ॥ भवंतं शरणं प्राप्ताः रक्षणं कुरु नो चिरम् ॥ भवद्भक्तगणान् सर्वे पीडयामो न च क्वचित् ॥ ६ ॥ वासं स्थलं देहि विभो तत्राज्ञाकारिणो वयम् ॥ वसामः सर्वदा देव प्राह तान्भगवान्हरिः ॥ ७ ॥ क्रमाज्जले निवसत

उत्तरक्रमतः खलु ॥ शाकंभरीसकाशात्तु निवसध्वं गतव्यथाः ॥ ८ ॥ अधोजलस्य संसर्गात् पानयोग्यं न तज्जलम् ॥ स्नानेन मार्जनेनैव मन्मंत्रस्य जपात्खलु ॥ ९ ॥ पीडा न जायते तेषां मदादीनां ब्रवीम्यहम् ॥ ते ऊचुः ॥ सदा तु पुण्यकर्तॄणां न च पीडाकरा वयम् ॥ १० ॥ इत्युक्त्वा विविशुस्तोयं पृथक् कूपे पृथग्जले ॥ तानि तीर्थानि ज्ञेयानि सर्वपापहराणि च ॥ ११ ॥ एकस्मिन् समये दुष्टा जगन्नाशितुमुद्यताः ॥ ज्ञातं भगवता कर्म खलानां नाशहेतवे ॥ १२ ॥ बोधः शमो दमोऽलोभः सत्यं सत्संग एव च ॥ शांतिर्दया तितिक्षा च सर्वानाहूय देवराट् ॥ १३ ॥ आह लोभादिकूपा ये प्रसिद्धास्तीर्थनामभिः ॥ ते मद्ग्रामवासिनो लोकान् पीडयंति खलाः खलु ॥ १४ ॥ भवद्भिरुपरि स्थेयं कामादीनां मदाज्ञया ॥ तेषां निर्गमनं नैव कार्यं कूपाद्बहिः किल ॥ १५ ॥ तदाज्ञां शिरसा धृत्वा तथा चक्रुः सुरप्रियाः ॥ चमत्कृतिः परा ज्ञेया जलाधस्ते सुसंस्थिताः ॥ १६ ॥ कामादयः खिन्नवक्त्रास्तदूर्ध्वं च शमादयः ॥ यदा ह्यज्ञानसंभूतिस्तदोर्ध्वं यांति वैरिणः ॥ १७ ॥ सत्यादींश्च पराजित्य तेऽपीच्छावशतः परान् ॥ ततः प्रभृति तीर्थानि प्रख्यातानि द्विधाभवन् ॥ १८ ॥ अस्याध्यायश्रवादेव क्रामक्रोधादिनाशनम् ॥ इति श्री-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवालयग्राममाहात्म्ये अष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ श्रीव्यास उवाच ॥ अहंतादीनि तीर्थानि प्रोक्तानि तव चानघ ॥ तेषां शांत्यर्थमेतानि शमादीनि तथोपरि ॥ १ ॥ कामादीनां बाधनार्थं शमादीनां च वृद्धये ॥ तीर्थं देवस्य वामे तु सन्निधौ पुण्यदायकम् ॥ २ ॥ सार्धद्विशतहस्ते तद्वनमालेति संज्ञितम् ॥ वनमाला यथा देवे तथैवेदं प्रमुच्यते ॥ ३ ॥ वनं नाम जलं प्रोक्तं तस्य मा श्रीः प्रयुज्यते ॥ तेनालते शोभते वै वनमालं प्रकीर्तितम् ॥ ४ ॥ देवकायेऽपि योगित्वाद्वनमालमिति प्रथा ॥ नित्यं स्नानेन लोभादिबंधनं शांतिदायकम् ॥ ५ ॥ किं वच्मि भवतः साधो सर्वं भद्रं भविष्यति ॥ अतः परं शृणु मुने सर्वतीर्थोत्तमोत्तमम् ॥ ६ ॥ स्वामिपुष्करिणीसंज्ञं व्यंकटेशस्य तोषदम् ॥ श्रवादेव भवेत्प्रीतिर्व्यंकटेशे भविष्यति ॥ ७ ॥ इति श्रीदेवालयग्राममाहात्म्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ शौनक उवाच ॥ सूत सूत वदास्माकं धरणी केन श्रेष्ठताम् ॥ जगाम सूतसूनुस्त्वं वक्ता नान्योऽस्ति त्वादृशः ॥ १ ॥ आनंदः श्रवणाज्जातः कियानिति न वर्ण्यते ॥ तौ कर्णौ तौ करौ पादौ सा जिह्वा तच्च मस्तकम् ॥ २ ॥ तच्छरीरं च तत्कर्म तज्जन्म सफलं विदुः ॥ येन येन हरेः सेवा कृता भक्त्यापरेऽव-

---

दन् ॥ ३ ॥ अतोऽस्माकं हरेः कृष्णचरितं शेषशायिनः ॥ सूत जीव चिरं साधो भवान् कल्याणकृत् खलु ॥ ४ ॥ देवालयपुरेशस्य किं प्रियं वद नो मुने ॥ तीर्थं व्रतं च नैवेद्यं सर्वं नः कृपया वद ॥ ५ ॥ सूत उवाच ॥ एवमेव पुरा पृष्टो व्यासो जैमिनिना मुदा ॥ तेन यत्कथितं तत्ते भणतीव शिवप्रदम् ॥ ६ ॥ व्यास उवाच ॥ सच्छिष्य सामवेदज्ञ जैमिने शृणु तत्त्वतः ॥ व्यंकटेशप्रियं तीर्थं सर्वश्रेष्ठमिहोच्यते ॥ ७ ॥ पुरा श्रीपार्वती देवी पर्यपृच्छत शंकरम् ॥ व्यंकटेशस्य यत्तीर्थं वद मां त्वं कृपानिधे ॥ ८ ॥ तेनाहं प्रार्थिता पूर्वं तद्धामे वासकारिणी ॥ तत्किं पुरमतिश्रेष्ठं कस्माज्जातं वदस्व तत् ॥ ९ ॥ व्यास उवाच ॥ प्रियाया वचनेनैव समाधिस्थो हरः स्वयम् ॥ इत्थं स्म पृष्टः खलु देवसेवकस्तत्स्मारितानंतहृताखिलेंद्रियः ॥ १० ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तां भागवतोत्तमोत्तमम् ॥ ११ ॥ शिव उवाच ॥ साधु पृष्टं महाभागे त्वया भागवतोत्तमे ॥ शृणुष्वावहिता भद्रे परं गुह्यं वदामि ते ॥ १२ ॥ पुरा वैकुंठनिलये विष्णुदर्शनलालसाः ॥ सर्वे देवाः समायाता नत्वा प्रांजलयः स्थिताः ॥ १३ ॥ सर्वान्

---

१ मनसः आकर्षकम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्कृत्य हृष्टात्मा जगाद प्रणतान् विभुः ॥ विष्णुरुवाच ॥ किमर्थमागता देवा मुनयश्च तपोधनाः ॥ ॥ १४ ॥ किं वो कार्यं मया कार्यं सत्वरं वदतानघाः ॥ देवा ऊचुः ॥ दयासिंधो त्वमस्माकं प्राणदाता न संशयः ॥ १५ ॥ कृतत्रेताद्वापराणि युगानि धर्मदानि वै ॥ तत्रास्माकं परा तृप्तिः कलावस्मिन् युगे जनाः ॥ १६ ॥ अधर्मरुचयोऽस्माकं परधर्मकराः खलाः ॥ न दास्यंति ततो हानिर्भविष्यति सुराधिप ॥ १७ ॥ अतः कुरु यथायोग्यं यत्र बाधा कलेर्नहि ॥ तथा रचय तीर्थं वै सर्वतीर्थसमाश्रयम् ॥ १८ ॥ विष्णुरुवाच ॥ कृतं मया पुरे वै तद्धामे देवालयाभिधे ॥ सर्वैस्तत्र प्रगंतव्यं वसतिर्मम सन्निधौ ॥ १९ ॥ तत्र तीर्थान्यनेकानि क्षेत्राणि विविधानि च ॥ तत्र वै पुण्यकर्तृणां कलिदोषो न विद्यते ॥ २० ॥ अहमप्यागमिष्यामि मद्धामे पूर्वकल्पिते ॥ स्वामिपुष्करिणीतीरे वसामि रमया सह ॥ २१ ॥ एवमुक्तैस्तु तैर्देवैः सानंदं गमनं कृतम् ॥ पार्वत्युवाच ॥ स्वामिपुष्करिणी का सा कथं जाता कुतो वद ॥ २२ ॥ महादेव दयासिंधो यथा बुद्ध्याम्यहं वद ॥ श्रीशिव उवाच ॥ शृणु पार्वति वक्ष्यामि सर्वपापहरं यशः ॥ २३ ॥

१ मुनीन् ।

पुरा श्रीमति गोलोके राधाकृष्णौ समाहितौ ॥ गोपिभिश्चैव गोपैश्च ब्रह्माण्डात्तु बहिः स्थिते ॥ २४ ॥ तत्र देवाः सगंधर्वा मुनयो यक्षकिन्नराः ॥ आगता उत्सवे तस्मिन् गायनं विष्णुवल्लभम् ॥ २५ ॥ जातं सरस्वतीदेवी सापि गानं चकार ह ॥ संतुष्टाः सर्व एतैते वस्त्रालंकरणं ददुः ॥ २६ ॥ शिवोऽपि गायनं चक्रे तानमानसमन्वितम् ॥ क्षणार्धात्तत्र यज्जातं शृणु रासोत्सवे मुदा ॥ २७ ॥ जलं सर्वत्र प्रसृतं राधाकृष्णौ न दृष्टिगौ ॥ हाहाकारस्तदा जातो ब्रह्माद्या दुःखितास्तदा ॥ २८ ॥ श्रीकृष्णं प्रार्थयामासुः देवदेव रमापते ॥ श्रीराधाप्रिय वैकुंठ जलशायिन्नमोऽस्तु ते ॥ २९ ॥ दर्शनं नो दिदृक्षूणां देहि त्वमन्यथा मृतिः ॥ तस्मिन्नेव क्षणे सर्वैः श्रुता वागंतरिक्षजा ॥ ३० ॥ शिवो मत्पूजने शास्त्रं यत्र धर्मो हि मत्प्रियः ॥ प्रकरोतु जलं गृह्य शपथं हि सदाशिवः ॥ ३१ ॥ ततो वो दर्शनं दास्ये शिव आज्ञामपालयत् ॥ तदैव दृष्टिगौ जातौ राधाकृष्णौ ननंदतुः ॥ ३२ ॥ सर्वैर्हि पूजितो देवस्तज्जलं स्वशरीरजम् ॥ राधाकृष्णांगसंभूतं तेजोरूपं सुनिर्मलम् ॥ ३३ ॥ ब्रह्मणे दत्तं किंचित्तु जलायाज्ञां ददौ विभुः ॥ गच्छ देवालयपुरे पुष्करिण्यां वसाज्ञया ॥ ३४ ॥ इत्युक्तं तज्जलं तस्मान्निर्गतं भूतलेऽगमत् ॥ गुप्तमार्गेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चागत्य गोलोकाद्गोकुलप्रियम् ॥ ३५ ॥ गोमुखाकारधारा तु प्रकटा देवसन्मुखे ॥ चत्वारिंशद्धस्तमा-
नाद्व्यंकटेशप्रिया सदा ॥ ३६ ॥ तदा जयजयारावो वाद्यनादोऽभवद्दिवि ॥ स्वभार्याभ्यां जगन्नाथः
प्रत्यक्षः स्वगणैः सह ॥ ३७ ॥ व्यंकटेशः प्रसन्नश्च दर्शनं प्रददौ क्षणात् ॥ आगतां तां तु दृष्ट्वैव गंगा
गोदावरी तथा ॥ ३८ ॥ चर्मण्वती वेत्रवती शरयूर्गंडकावरा ॥ कृष्णा वेणा पूर्णकुंभा शतद्रूश्च सर-
स्वती ॥ ३९ ॥ पूर्णा च तपती चैव पंचगंगा महानदी ॥ ककुभ्रती वारणा च भीमा च नर्मदा तथा
॥ ४० ॥ चंद्रवंशा च सुरसा ताम्रपर्णी पयस्विनी ॥ कृतमाला चावटोदा सिंधुः शोणश्च तौ नदौ
॥ ४१ ॥ वैहायसी च कावेरी क्षिप्रा चर्मण्वती तथा ॥ पयोष्णी चैव निर्विंध्या तुंगभद्रा तदागताः
॥ ४२ ॥ तापी प्रणीता प्रख्याता गोमती शरयूस्तथा ॥ रोधस्वती सप्तवती सुषोमा च मरुद्वृधा
॥ ४३ ॥ असिक्नी च वितस्ता च यमुना चारुणा तथा ॥ चंद्रभागा शतद्रूश्च एताः सर्वाः समागताः
॥ ४४ ॥ प्रयागं पुष्करं चैव मानसं च सरोवरम् ॥ समुद्राः सप्त क्षेत्राणि पुष्करिण्यां समागमन् ॥ ४५ ॥
अयोध्या मथुरा माया काशी कांची अवंतिका ॥ पुरी द्वारवती चैव मायूरं क्षेत्रमागतम् ॥ ४६ ॥ सर्वे

देवाः समायाता यक्षगंधर्वकिन्नराः ॥ आनंदेन समाजग्मुः वासार्थं देवसन्निधौ ॥ ४७ ॥ यक्षा मरुद्गणाः
साध्या विश्वेदेवाः समागताः ॥ पर्वताः सरितः सर्वाः सप्तद्वीपानि चागमन् ॥ ४८ ॥ वेदाः शास्त्राणि
पाखंडदेवताश्चापि आगताः ॥ षष्टिकोटीनि तीर्थानि मातरिश्वा पुराब्रवीत् ॥ ४९ ॥ तानि सर्वाणि चा-
गत्य प्रणामं चक्रतुस्तदा ॥ पुष्पवृष्टिरभूत्तत्र सुगंधः पवनो ववौ ॥५०॥ चमत्कृतिस्तदा जाता नृत्यं गानं
समन्वितम् ॥ अन्तरिक्षादयो वाचं सुश्रुवुः सर्व एव ते ॥ ५१ ॥ अस्मिन् स्थले पूर्वमेव व्यंकटेशः समा
गतः ॥ अथैतत्तीर्थं प्रवरं स्वामिपुष्करिणीति च ॥ ५२ ॥ देवाज्ञया प्रकटितं कलिकल्मषनाशनम् ॥
वराहो गुप्तरूपेण तीर्थं देवाज्ञया स्थितः ॥ ५३ ॥ एतत्सदृशमन्यं न त्रिषु लोकेषु भूतिदम् ॥ पापापहं
सौख्यदं च मुक्तिदं ज्ञानसाधनम् ॥ ५४ ॥ एवं वाचं श्रुतवती व्यंकटेशं च पश्यती ॥ नेत्रमेलनमेवासी-
द्ध्यानप्राप्तं परेश्वरम् ॥ ५५ ॥ आलिंगंगुर्मुदा युक्ताः देहभावं समागताः ॥ साष्टांगं प्रणिपत्यायुस्तोत्रं
चक्रुस्तदान्तकाः ॥ ५६ ॥ नमोस्तु देवेश जगन्निवास कल्याणदायिन् सततं नमस्ते ॥ जय देवेश सर्वा-
त्मन् जय नाथ नमोस्तु ते ॥ ५७ ॥ जयाजेय महायोगिन् व्यंकटेश नमोऽस्तु ते ॥ जय लक्ष्मीपते देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुधापालके नमः ॥ ५८ ॥ वराहदत्तस्थानाय पर्वते व्यंकटाभिधे ॥ अत्र त्वया पुष्करिण्यां वराहाय स्थलं कृतम् ॥ ५९ ॥ जनानां पापहाराय सुखदाय नमोऽस्तु ते ॥ स्तुतिं श्रुत्वा स्मितं कृत्वा स्तोत्रं प्रपठनादघम् ॥ नश्यत्येव न संदेहः श्रवणादपि मुक्तिदम् ॥ ६० ॥ अस्मिन्तीर्थे स्नानदानब्राह्मणानां च भोजनैः ॥ देवतीर्थप्रसादाद्वै सर्वं कोटिगुणं भवेत् ॥ ६१ ॥ जनरक्षाकरैः सर्वैरिह स्थेयं स्थले स्थले ॥ अस्योदकस्य स्पर्शेन कलिदोषो गमिष्यति ॥ ६२ ॥ श्रद्धया फलदं सर्वमन्यथा बहुकालतः ॥ अश्रद्धया च क्रोधेन कृतं भवति निष्फलम् ॥ ६३ ॥ शिव उवाच ॥ इत्युक्त्वांतार्हितो देवस्तत्रैव गुप्तरूपतः ॥ अतः श्रेष्ठमिदं तीर्थं राधाकृष्णशरीरकम् ॥ ६४ ॥ तदेव जलमित्युक्तं स्वामिपुष्करिणीति च ॥ सर्वासां पुष्करीणां या स्वामित्वेन व्यवस्थिता ॥ ६५ ॥ अतस्तन्नामसंप्राप्तिः स्मरणेन च भद्रदम् ॥ इति श्रीदेवदेवस्य चरितं परमाद्भुतम् ॥ ६६ ॥ कथितं ते मया देवि कथामेकां वदामि ते ॥ श्रवणादस्य वितथं पापं गच्छति सत्वरम् ॥ ६७ ॥ सुखदं मोक्षदं चैव विघ्नहानिः पदे पदे ॥ इति श्रीदेवालयग्राममाहात्म्ये त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥ छ ॥ शौनक उवाच ॥ व्यंकटेशमुखाब्जात्तु निर्गतं वचनं

महत् ॥ पुष्करिण्यां स्नानमात्रात् कलिबाधा गमिष्यति ॥ १ ॥ को धर्मः किंतु वै पापं किं कार्यं चरमे युगे ॥ कृतत्रेताद्वापरेषु वद कर्म महामते ॥ २ ॥ सूत उवाच ॥ पृष्टो जैमिनिना व्यासः एवमेव यथा भवान् ॥ यद्यत्स कथयामास तच्छृणु त्वं महामुने ॥ ३ ॥ जैमिनिरुवाच ॥ वेदव्यास महाभाग व्यंकटेशकथानकम् ॥ श्रुत्वा मे परमो हर्षः सदा चेतसि जायते ॥ ४ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति तत्क्षणात् ॥ व्यंकटेशकथा गोदा त्वन्मुखं ब्रह्मपर्वतः ॥ ५ ॥ अहं तु गौतमो नाम मदघं धेनुहत्यया ॥ समं तन्नाशने याता कथा गंगा भुवि स्थिता ॥ ६ ॥ अग्रे वद महाभाग देवालयस्थिता द्विजाः ॥ क्षत्रिया वैश्यशूद्राश्च संकरांत्यजजास्तथा ॥ ७ ॥ केन पुण्येन तद्ग्रामे वासस्तेषां महात्मनाम् ॥ अन्यां वद कथां श्रेयस्कारिणीं भक्तिदायिनीम् ॥ ८ ॥ युगधर्माश्च मे ब्रूहि मुखादेवस्य निर्गतान् ॥ देवदेवस्य कृपया यथा बाधा कलेर्नहि ॥ ९ ॥ सूत उवाच ॥ इति संप्रश्नसंहृष्टो जैमिनेर्बादरायणः ॥ उवाच तमृषिश्रेष्ठं कर्ममार्गप्रवर्तकम् ॥ १० ॥ व्यास उवाच ॥ जैमिने शृणु तत्त्वेन पूर्ववृत्तं यथाभवत् ॥ नारायणगिरेः स्वामी यदा देवालयं पुरम् ॥ ११ ॥ गतो लक्ष्म्यादिभिस्तीर्थैर्मुनीनूचे तदा हरिः ॥ भवद्भिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रार्थितं पूर्वं त्वद्वियोगो न नो भवेत् ॥ १२ ॥ तथा कुरु जगन्नाथ लोकपाल कृपाकर ॥ अतो वच्मि महाभागास्तथा कुरुत सादरम् ॥ १३ ॥ देवालयपुरे सर्वैर्वस्तव्यं द्विजरूपकैः ॥ अत्रत्यैः पक्षिपशुभिः स्थावरैर्जंगमैरपि ॥ १४ ॥ देवालयपुरे स्थेयं नानाजातिस्वरूपिभिः ॥ तत्र धर्मेण स्वीयेन वर्ततां निर्भयं स्थलम् ॥ १५ ॥ कलौ कलुषबुद्धीनां वर्णानां सुखनाशकम् ॥ तत्पुरं देवदेवस्य मम लक्ष्म्याः सुखप्रदम् ॥ १६ ॥ ब्राह्मणा ऊचुः ॥ ब्राह्मणानां कथं धर्मः कलिधर्मः कथं वद ॥ आश्रमाणां च वर्णानां कीदृक् कस्मिन्युगे भवेत् ॥ १७ ॥ त्वदन्यो नास्ति नो वक्ता धर्ममेच्छाम वेदितुम् ॥ सूत उवाच ॥ एवं विप्रवचो देवी निशम्यानंदसंयुतः ॥ १८ ॥ प्राह सर्वान् जनान् पश्यन् युगधर्मं ब्रवीम्यहम् ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ १९ ॥ सृष्टिं कृत्वा विरिंचिस्तु कृतमाह युगं वचः ॥ भो भो कृत त्वमागच्छ भूमौ गच्छ ममाज्ञया ॥ २० ॥ बद्धांजलिं पुरो यातं ब्रह्मणः परमेष्ठिनः ॥ कृतस्य लक्षणं वक्ष्ये सावधाना भवंत्विति ॥ २१ ॥ द्विजरूपः शुद्धदेहो नानृतं वदति क्वचित् ॥ करे कंठे मस्तके च रुद्राक्षभूतिधारकः ॥ २२ ॥ उपवीती सदा पूर्णज्ञानवैराग्यसूचकः ॥ प्रणम्य ब्रह्मदेवं

तत् प्राह भूमौ कथं मया ॥ २३ ॥ गंतव्यं पापकलहरता यत्र नराः सदा ॥ ब्रह्मोवाच ॥ त्वं गच्छ युग भद्रं ते दुष्टहानिर्भविष्यति ॥ २४ ॥ त्वं यावत् पृथिवीसंस्थस्तव मार्गानुसारिणः ॥ भविष्यंति जनाः सर्वे त्वं हि श्रेष्ठयुगं मतम् ॥ २५ ॥ इत्युक्तं तत् कृतयुगं भूमौ प्राप्तं पुरानघाः ॥ तस्य धर्मं प्रवक्ष्यामि सुखसंतानहेतवे ॥ २६ ॥ भ्रात्रा हनूमता प्रोक्तं भ्रातरं भीममच्युतम् ॥ श्रीहनूमानुवाच ॥ कृतं नाम युगं तात यत्र धर्मः सनातनः ॥ २७ ॥ कृतमेव न कर्तव्यं तस्मिन्काले युगोत्तमे ॥ न तत्र धर्माः सीदंति क्षीयंते न च वै प्रजाः ॥ २८ ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ नासन् कृतयुगे तात तदा न क्रयविक्रयः ॥ २९ ॥ न सामऋग्यजुर्वर्णा क्रिया नासीच्च मानवी ॥ अभिध्यायफलं तत्र धर्मः संन्यास एव च ॥ ३० ॥ न तस्मिन्युगसंसर्गे व्याधयो नेंद्रियक्षयः ॥ नासूया नापि रुदितं न दर्पो नापि वैकृतम् ॥३१॥ न विग्रहः कुतस्तंद्री न द्वेषो न च पैशुनम् ॥ न भयं नापि संतापो न चेर्ष्या न च मत्सरः ॥ ३२ ॥

कृतमेव सर्वं कृतकृत्या इत्यर्थः । तत एव हेतोः कृतयुगं नाम ॥ २८ ॥ देवादयः ऐकमत्ये नासन्नित्यर्थः ॥ २९ ॥ त्रयीधर्मस्य चित्तशुद्ध्यर्थत्वात्तस्याश्च तदानीं स्वभावत्वान्न सामादीन्यासन् मानवी क्रिया कृष्याद्यारंभरूपा न किंतु अभिधायफलं संकल्पादेव सर्वं संपद्यते इत्यर्थः । गृहस्थ एव सर्वं मोक्षफलं प्राप्नोति स संन्यासः ॥ ३० ॥ वैकृतं कपटम् ॥ ३१ ॥ विग्रहो वैरं । तंद्रा आलस्यं द्वेषः परानिष्टचिंतनम् । मत्सरः परोत्कर्षासहिष्णुत्वम् ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः परमकं ब्रह्म सा गतिर्योगिनां परा ॥ आत्मा च सर्वभूतानां शुक्लो नारायणस्तदा ॥ ३३ ॥ ब्राह्मणाः सर्वसिद्धास्ते दयादिकृतलक्षणाः ॥ कृते युगे समभवन् स्वकर्मनिरताः प्रजाः ॥ ३४ ॥ समाश्रयं समाचारं समज्ञानं च केवलम् ॥ तदा हि समकर्माणो वर्णा धर्मानवाप्नुवन् ॥ ३५ ॥ एकं देवं सदा युक्ता एकमंत्रविधिक्रियाः ॥ पृथग्धर्मास्त्वेकवेदा धर्ममेकमनुव्रताः ॥ ३६ ॥ चातुराश्रम्ययुक्तेन कर्मणा कालयोगिना ॥ अकामफलसंयोगात्प्राप्नुवंति परां गतिम् ॥ ३७ ॥ यत्र शुद्धा जनाः सर्वे निर्वैराः पशुपक्षिणः ॥ लक्षवर्षं हि जीवंति सर्वे धर्मपरायणाः ॥ ३८ ॥ संवत्सरैः पंचशतैर्बालानां तु रदोद्भवः ॥ दशसप्त च लक्षाणि साष्टाविंशत्सहस्रकम् ॥ ३९ ॥ कृतस्य मानं वर्षाणि नाण्यं रत्नमयं बभौ ॥ कार्तिके शुक्लपक्षे वै नवम्यां कृतसंभवः ॥ ४० ॥ चतुष्पात्सकलो धर्मः कृते चैव प्रवर्तते ॥ त्रेतामपि निबोधत्वं

शुक्लनारायण इत्यनेन सर्वे तद्भक्तत्वात् सत्वगुणसंपन्ना एव सर्वे इत्यर्थः ॥ ३३ ॥ कृतलक्षणाः सिद्धशमदमादिलक्षणाः ॥ ३४ ॥ समं ब्रह्म तदेव आश्रयादिर्यस्य ॥ ३५ ॥ एकः प्रत्यगात्मा । मंत्रः प्रणवः । विधिः वेदांतश्रवणादिः । तत्वप्रतिपादको वेदः । सर्वेऽपि ज्ञाननिष्ठा एवेत्यर्थः ॥ ३६ ॥ कालो दर्शादिः । तद्युक्तेन कर्मणा स्वर्गादिसुखं तदभावे परां गतिं गच्छंति ॥ ३७ ॥ लक्षवर्षमायुः कृतयुगे ॥ ३८ ॥ रदाः दंताः ॥ ३९ ॥

यस्मिन्सत्रं प्रवर्धते ॥ ४१ ॥ त्रेताया लक्षणं विप्राः प्रवक्ष्यामि निबोधत ॥ क्षत्रियः स्थूलदेहः स समित्कुशकरस्तथा ॥ ४२ ॥ यज्ञकृद्यज्ञमित्रश्च यज्ञहस्तः सदा शुचिः ॥ अतो यज्ञप्रवृत्तिर्हि त्रेतायां वर्तते द्विजाः ॥ ४३ ॥ पादेन ह्रसते धर्मो रक्ततां याति चाच्युतः ॥ सत्यप्रवृत्ताश्च नराः क्रियाधर्मपरायणाः ॥ ४४ ॥ ततो यज्ञाः प्रवर्तंते धर्माश्च विविधाः क्रियाः ॥ सर्वे जनाः पुण्यकरा न पापरुचयोऽभवन् ॥ ४५ ॥ ब्राह्मणाः क्षत्रिया वैश्या शूद्राः संकरजातयः ॥ स्वस्वधर्मरता जीवा बहुकल्याणभोगिनः ॥ ४६ ॥ त्रेतायां भावसंकल्पा क्रियादानफलोपगाः ॥ प्रचलंति न वै धर्मात्तपोदानपरायणाः ॥ ४७ ॥ तस्मिन्युगे नृणामायुर्दशवर्षसहस्रकम् ॥ दश च द्वे च लक्षाणि षण्णवतिसहस्रकम् ॥ ४८ ॥ मानं युगस्य विज्ञेयं भीमसेन त्वयानघ ॥ माधवे तु तृतीयायां शुक्लायां युगसंभवः ॥ ४९ ॥ माघकृष्णे त्वमायां च द्वापरस्य ततो गमः ॥ लक्षणं शृणु तस्यापि जैमिने पापनाशकम् ॥ ५० ॥ वैश्यजात्यां द्वापरस्य जननं वर्तते मुने ॥ उग्रः शांतो निष्ठुरश्च चापी खड्गी शरी तथा ॥ ५१ ॥

भावः संकल्पः भावो भावना क्रिया अहं अनेन कर्मणा इदं फलं अनेन प्रकारेण करिष्यामीत्येवंरूपा तद्विषय एव संकल्पो येषां अत एव क्रियादिफलोपगाः फलभुजः । नतु कृतवत्संकल्पसिद्धिः ॥ ४७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुण्यं पापं समं यस्मिन् भूमौ त्वरितमागतम् ॥ द्वापरे च युगे धर्मो द्विभागोनः प्रवर्तते ॥ ५२ ॥ विष्णुर्वै पीततां याति चतुर्धा वेद एव च ॥ मनुष्याणां सहस्रायु र्धर्मयुक्तंतपोधनाः ॥ ५३ ॥ ततोऽन्ये च चतुर्वेदास्त्रिवेदाश्च तथापरे ॥ द्विवेदाश्चैकवेदाश्चाप्यनृचश्च तथापरे ॥ ५४ ॥ एवं शास्त्रेषु भिन्नेषु बहुधा नीयते क्रिया ॥ तपोदानप्रवृत्ता च राजसी भवति प्रजा ॥ ५५ ॥ एकवेदस्य चाज्ञानाद्वेदास्ते बहवः कृताः ॥ सत्वस्य चेह विभ्रंशात्सत्वे कश्चिदवस्थितः ॥ ५६ ॥ सत्यात्प्रच्यवमानानां व्याधयो बहवोऽभवन् ॥ कामाश्चोपद्रवाश्चैव तदा वै दैवकारिताः ॥ ५७ ॥ यैरर्द्यमानाः सुभृशं तपस्तप्यंति मानवाः ॥ कामकामाः स्वर्गकामा यज्ञांस्तन्वंति चापरे ॥ ५८ ॥ नाण्यं रौप्यमयं यस्मिन् क्षत्रिया युद्धकामुकाः ॥ चतुःषष्टिसहस्राणि वसुलक्षसमा युगम् ॥ ५९ ॥ इति श्रीदेवालयमाहात्म्ये एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ व्यंकटेशो जगन्नाथो ब्राह्मणान् प्राह सर्वदः ॥

चतुर्वेदाः वेदत्रयोक्तं कर्म आथर्वणोपनिषदुक्तं ध्यानं कर्मोपास्तिसमुच्चयकरा इत्यर्थ । त्रिवेदाः केवलकर्मणः । द्विवेदाः स्वशाखोक्तं संध्यावंदनादि कर्म ध्यानं चानुतिष्ठंतीति । एकवेदाः ध्यानैकानिष्ठाः । अनृचः कृताकृत्याः । ऋङ्मात्रेणापि हीना वा इति वनपर्वटीकायां ॥ ५४ ॥ १ बुद्धेः ।

हे भूमिदेवाः शृणुत कलिधर्मं भयावहम् ॥ १ ॥ कलेर्मानं च द्वात्रिंशत्सहस्रं वेदलक्षकम् ॥ नृणामायुः शतं प्रोक्तमपमृत्युयुतं खलु ॥ २ ॥ लक्षणं तस्य वक्ष्यामि शूद्ररूपी यतः खलः ॥ वृद्धः पिशाचवदनः कलहद्वेषसंगमः ॥ ३ ॥ अधोदृष्टिः पतति च विवेकेन विहीनकः ॥ जिह्वां तु दक्षिणे हस्ते वक्रतुंडो हसन् रुदन् ॥ ४ ॥ वामहस्तेन धृत्वा स्वमेढ्रं लज्जाविहीनकः ॥ ब्रह्मणः संमुखं गत्वा प्रांजलिर्वाक्यमब्रवीत् ॥ ५ ॥ किमाज्ञा भवतो ब्रह्मन् ब्रह्मा प्राह कले शृणु ॥ कुरु राज्यं मया दत्तं धरणीपालनात्मकम् ॥ ६ ॥ कलिरुवाच ॥ ब्राह्मणाः पुण्यकर्माणो प्रजाः सर्वास्तथाविधाः ॥ तत्र मे गमनं नास्ति यत्र पुण्यकथाः शुभाः ॥७॥ यत्र पापरता जीवा ते मे प्रीतिकरा मताः ॥ ब्रह्मोवाच ॥ तव चित्तानुगाः सर्वे भविष्यंति न संशयः ॥८ ॥ त्वयापि नो पीडनीया गुरुद्विजपरायणाः ॥ आज्ञा तु शिरसा धार्या गतः कलिर्मुदान्वितः ॥ ९ ॥ तस्मिन् धर्मान्प्रवक्ष्यामि त्यागार्थं ब्राह्मणोत्तमाः ॥ ब्राह्मणाः शूद्रकर्माणस्तथा शूद्रा धनार्जकाः ॥१०॥ ब्राह्मणाः सर्वभक्षाश्च भविष्यंति कलौ युगे ॥ अजपा ब्राह्मणास्तात शूद्रा जपपरायणाः ॥ ११॥ बहवो म्लेंछराजानः पृथिव्यां मनुजाधिप ॥ मृषानुशासिनः पापा मृषावादपरायणाः॥ १२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तदा ब्राह्मणः कश्चित्स्वधर्ममुपजीवति ॥ निवृत्तयज्ञस्वाध्याया दंडाजिनविवर्जिताः ॥ १३ ॥ अल्पायुषः स्वल्पबलाः स्वल्पवीर्यपराक्रमाः ॥ अल्पसाराल्पदेहाश्च तथाऽसत्याल्पभाषिणः ॥ १४ ॥ बहुशून्या जनपदा मृगव्यालावृता दिशः ॥ युगांते समनुप्राप्ते वृथा च ब्रह्मवादिनः ॥ १५ ॥ बहुप्रजा ह्रस्वदेहाः शीलाचारविवर्जिताः ॥ मुखे भगाः स्त्रियो राजन् भविष्यंति युगक्षये ॥ १६ ॥ अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ॥ केशशूलाः स्त्रियो विप्र भविष्यंति युगक्षये ॥ १७ ॥ अट्टमन्नं शिवो वेदः केशस्तु भगमुच्यते ॥ चतुष्पथो ब्राह्मणश्च शूलो विक्रय उच्यते ॥ १८ ॥ अल्पक्षीरास्तथा गावोऽल्पपुष्पफला द्रुमाः ॥ दुष्टानां प्रतिगृह्णंति पतितानां द्विषामपि ॥ १९ ॥ भिक्षार्थं पृथिवीपालश्चंचूर्यंते द्विजैर्दिशः ॥ करभारभयाद्भीता गृहस्थाः परिमोषकाः ॥ २० ॥ मुने छद्माकृतिछन्ना वाणिज्यमुपजीविनः ॥ मिथ्या च नखरोमाणि धारयंति तदा द्विजाः ॥ २१ ॥ अल्पक्षीरास्तथा मोघाः शुष्कप्रायः सरिद्गणः ॥ आश्रमेषु वृथाचाराः पानपा गुरुतल्पगाः ॥ २२ ॥ परान्नगुणवक्तारो गुरुदेवविनिंदकाः ॥ चित्रवर्षी च पर्जन्यो न बीजारोहणं शुभम् ॥ २३ ॥ अधर्मफलमत्यर्थं तदा भवति चानघाः ॥ तदा च पृथिवीपालो

यो भवेद्धर्मसंयुतः ॥ २४ ॥ अल्पायुः स हि मंतव्यो नहि धर्मोऽस्ति कश्चन ॥ भूयिष्ठं कूटमानैश्च पण्यं विक्रीणते जनः ॥ २५ ॥ धर्मस्य बलहानिः स्यादधर्मश्च बली तथा ॥ अधर्मिष्ठैरुपायैश्च प्रजा व्यवहरंत्युत ॥ २६ ॥ संचयेन तथाल्पेन भवंत्याढ्या मदान्विताः ॥ धनं विश्वासतो न्यस्तं न दास्यंति विधर्मिणः ॥ २७ ॥ पुरुषादानि सत्वानि पक्षिणोऽथ मृगास्तथा ॥ नागराणां विहारेषु चैत्येष्वपि च शेरते ॥ ॥ २८ ॥ षड्वर्षा वा सप्तवर्षाः स्त्रियो गर्भधरा मुने ॥ दशद्वादशवर्षाणां पुंसां पुत्रः प्रजायते ॥ २९ ॥ भवंति षोडशे वर्षे नराः पलितिनस्तथा ॥ तरुणा वृद्धशीलाश्च वृद्धास्तरुणशीलिनः ॥ ३० ॥ स्त्रियः पतीन् वंचयंति पशुदासैश्च क्रीडनम् ॥ श्वशुरं चैव श्वश्रूं च देवरं पतिमेव च ॥ ३१ ॥ आक्रोशंति स्त्रियो विप्र पितरं मातरं तथा ॥ संत्यं संक्षेप्स्यते लोके नरैः पंडितमानिभिः ॥ ३२ ॥ सत्यहान्या ततस्तेषामायुरल्पं भविष्यति ॥ आयुषः प्रक्षयाद्विद्यां न शक्ष्यंत्युपजीवितम् ॥ ३३ ॥ विद्याहीनान्नविज्ञानाल्लोभोऽप्यभिभविष्यति ॥ लोभक्रोधपरा मूढाः कामासक्ताश्च मानवाः ॥३४॥ वैरबद्धा भविष्यंति परस्परवधैषिणः ॥ भार्या मित्राश्च पुरुषा भार्यासंबंधप्रीतिदाः ॥ ३५ ॥ मत्स्यामिषेण जीवंतो दुहतश्चा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यजैडकम् ॥ सरित्तीरेषु कुद्दालैर्वपयिष्यंति चौषधीः ॥ ३६ ॥ ताश्चाप्यल्पफला ज्ञेया निराहाराः प्रजास्ततः ॥ न यक्ष्यंति न होष्यंति हेतुवादविमोहिताः ॥ ३७॥ श्राद्धे देवे च पुरुषा येऽपि नित्यं धृतव्रताः ॥ तेऽपि लोभसमायुक्ता भोक्ष्यंतीह परस्परम् ॥ ३८ ॥ निम्ने कृषिं करिष्यंति योक्ष्यंति धुरि धेनुकाः ॥ एकहायनवत्सांश्च योजयिष्यंति दुर्बलान् ॥ ३९॥ राजानो दंडरुचयो सतां दारान् धनानि च ॥ भोक्षंते निरनुक्रोशा रुदतामपि जैमिने ॥४०॥ न कन्यां याचते कश्चिन्न च कन्या प्रदीयते ॥ स्वयंग्राहा भविष्यंति विश्वासो नास्ति पितृजे॥४१॥भार्यादानाद्द्रव्यलाभकर्मकारा भवंति च ॥ हस्तो हस्तं परिमुषेदेकाहार्ययुगं तथा ॥४२ ॥ एकवर्णस्तदा लोको पिता पुत्रं न क्षंस्यति ॥ एडूँकान्यूजयिष्यंति वर्जयिष्यंति देवताः ॥४३॥एडूकचिह्ना पृथिवी न देवगृहभूषिता ॥ स्त्रीणां भूषणपर्याप्तिः केशैरेव भविष्यति॥४४॥ गुंजालंकारशोभाढ्याः सुवर्णादिविवर्जिताः ॥ ततो दुःखेन संभिन्नाः पश्चात्तापेन संयुताः ॥ ४५ ॥ ऋषिभिः प्रेरिता संतः कर्म कुर्वंति सात्विकम् ॥ तेन दुःखलयो भावी कृतं संपत्स्यते ततः ॥ ४६ ॥ पुनर्धर्मस्य वृद्ध्या तु

१ अजाशब्देन (शेळी) न ग्राह्या तस्या दुग्धस्य पवित्रत्वात् बकी ग्राह्या । २ अस्थ्यांकिलाभित्तिः ।

सदानंदो भविष्यति ॥ तस्मात्कलियुगं घोरं तद्भयं नास्ति मत्पुरे ॥ ४७ ॥ तत्र गच्छत वै विप्राः स्ववृत्त्योपार्जितं धनम् ॥ गृहीत्वा पोषणं भार्यापुत्रादीनां सुखप्रदम् ॥ ४८ ॥ देवालयपुरस्थस्य मन्त्रामग्राहकस्य च ॥ स्वकर्मस्थस्य जीवस्य कलिबाधा न विद्यते ॥ ४९ ॥ इदं वृत्तं पठेद्यस्तु शृणुयाच्च भयं न वै ॥ इति श्रीदेवालयग्राममाहात्म्ये द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीव्यास उवाच ॥ इत्थं श्रीव्यंकटेशस्य वचनाज्जातकौतुकाः ॥ गिरिस्था मुनयः सर्वे देवालयमुपागमन् ॥ १ ॥ देवालयस्य विप्रा वै गिरिस्था ऋषयः स्मृताः ॥ एवं सर्वे क्षत्रियाद्याः पशुपक्षिगणा अपि ॥ २ ॥ व्यंकटेशपुरे रम्ये भूवैकुंठे सदा स्थिताः ॥ कलेर्भयं नास्ति यत्र श्रुत्वा त्रैलोक्यसंस्थिताः ॥ ३ ॥ आगत्य वसतिं चक्रुर्नानारूपेण जैमिने ॥ स्वधर्मेणैव सर्वेषां कल्याणमभवद्धनम् ॥ ४ ॥ प्राप्तं सुखेन संसारं कृत्वा मोक्षमवाप्नुवन् ॥ जैमिनिरुवाच ॥ कथं धर्मः कलौ कार्यः ब्राह्मणैः कथयस्व मे ॥ ५ ॥ द्रव्याभावेन संसारः सुखदो हि भविष्यति ॥ धर्माद्धनं कथं प्राप्यं येन देवः प्रसीदति ॥ ६ ॥ श्रीव्यास उवाच ॥ स्वधर्मचारी पुरुषः महतीं गतिमश्नुते ॥ धृतिः क्षमा दमोऽस्तेयं शौचमिंद्रियनिग्रहः ॥ ७ ॥ ह्रीर्विद्या सत्यमक्रोधो दशकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मलक्षणम् ॥ आर्यैः प्रशंसितो धर्मो गर्हितोऽधर्म उच्यते ॥ ८ ॥ द्रव्यांतरा धर्महानिर्मतो मे धनसंग्रहः ॥ कर्तव्यो वै स्वधर्मेण हीति देवानुशासनम् ॥ ९ ॥ धनं तु द्विविधं ज्ञेयं दैवमानुषभेदतः ॥ मानुषान्नरकं याति दैवात्स्वर्गमवाप्नुयात् ॥ १० ॥ तस्माद्दैवं हि कर्तव्यं सर्वदा ब्राह्मणोत्तमैः ॥ मानुषं हि न कर्तव्यं सर्वदा पापकारकम् ॥ ११ ॥ मानुषं मुनयो वित्तमर्थमाहुरशाश्वतम् ॥ दैवमाहुस्तथा वित्तं धर्मं दिव्यसुखप्रदम् ॥ १२ ॥ मानुष्यं द्रव्यमेवेह स्वधर्मोपार्जितं शुभम् ॥ तं धर्मं शृणु विप्रेंद्र येन सौख्यमवाप्स्यति ॥ १३ ॥ याजनाध्ययने दानं यजनाध्यापने तथा ॥ प्रतिग्रहश्च विप्राणां कर्माणि षडिमानि तु ॥ १४ ॥ षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ १५॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यामेव जीवेत शीलैर्वा दोषदृक् तयोः ॥ १६॥ वार्तांविचित्राशालीनयायावरशिलोंछनम् ॥ विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १७ ॥ ऋतामृ-

वृत्तेः निर्वाहार्थं चातुर्विध्यमाह । वार्ता विचित्रा वार्ता कृषिवाणिज्यादिलक्षणाः । वार्ता तु वर्तने वार्तिं गणे कृष्याद्युदंतयोः । इति मेदिनी । शालीनं धार्ष्ट्यं विनैव प्राप्तं अयाचितम् । यायावरं प्रत्यहं धान्ययाच्ञा । शीलं शालिक्षेत्रादौ स्वामित्यक्तं कणिशोपादानम् । उंछं आपणादिपतितकणोपादानम् । शिलोंछनमेकीकृत्य चतुर्धेत्युक्तम् ॥ १७ ॥

ताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ १८ ॥ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितम् ॥ मृतं तु नित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ॥ २० ॥ ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ सर्ववेदमयो विप्रः सर्ववेदमयो नृपः ॥ २१ ॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवम् ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २२ ॥ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् ॥ खड्गेन वापदाक्रांतो न श्ववृत्त्या कथंचन ॥ २३ ॥ कुसूलकुंभीधान्यो वा त्र्याहिकोऽश्वस्त-

१ कनिष्ठवर्णः । पण्यैः ब्राह्मणेन विक्रियार्हैः न तु सुरालवणाद्यैः । आपदा आक्रांतः ॥ २३ ॥ गृहस्थो द्विविधः । यायावरशालीनश्च तयोर्यायावरः प्रवरः धान्ययाची । स चतुर्विधः । याज्ञवल्क्य आह । कुटुंबपोषणे द्वादशाहपर्याप्तधान्यः कुसूलधान्यः । षडहपर्याप्तधान्यः कुंभीधान्यः । त्रिदिनपर्याप्तधान्यः त्र्याहिकः । अश्वस्तनः । श्वोभवं धान्यमस्यास्तीति श्वस्तनः न श्वस्तनः अश्वस्तनः । एकाहपर्याप्तधान्य इत्यर्थः । कुसूलधान्यः याजनादिषट्कर्मा भवेत । कुंभीधान्यश्चः त्र्याहिकः याजनाध्यापनप्रतिग्रहैः वर्तेत । आश्वस्तनिकः । याजनाध्यापनाभ्यां वर्तेत । शिलोंछः ब्रह्मसत्रेण अध्यापनेनेति । कलावश्वस्तनिक निषेधः । शालीनोऽपि चतुर्विधः यायावरवत् । इत्यादि मिताक्षरायां स्पष्टम् । शिलोंछनमपि कलौ वर्ज्यम् । यायावरो धान्या-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोऽपि वा ॥ एवं धनं ब्राह्मणानां पोष्यवर्गस्य पोषणे ॥ २४ ॥ कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः ॥ सेवानूपो नृपो भैक्ष्यमापत्तौ जीवनानि तु ॥ २५ ॥ कलिधर्मेण वै विप्रा नानाजातित्वमागताः ॥ तत्रापि कर्मनियतो धर्मस्य फलमाप्नुयात् ॥ २६ ॥ देवो मुनिर्द्विजो राजा वैश्यः शूद्रो बिडालकः ॥ पशुम्लेंच्छश्च चांडालो दश विप्राः प्रकीर्तिताः ॥ २७ ॥ उंछवृत्तिर्मिताहारः संतुष्टः संयतेंद्रियः ॥ वेदशास्त्रार्थतत्वज्ञो देवो विप्रः स उच्यते ॥ २८ ॥ फलमूलाशनो दांतस्तपस्वी वेदशास्त्रवित् ॥ कृत्याकृत्यविशेषज्ञः स विप्रो मुनिरुच्यते ॥ २९ ॥ षट्कर्मनिरतो नित्यं देवतातिथिपूजकः ॥ स्वाध्यायनिरतः साधुः स विप्रो द्विज उच्यते ॥ ३० ॥ धनुर्वेदविशेषज्ञो राजसेवापरश्च यः ॥ त्रिकर्मकृन्महोत्साही

याज्ञाकर्ता अनेनपक्वान्नयाचनं निषिद्धम् । परं च ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ॥ अध्वगः क्षीणवृत्तिश्च षट् पक्वान्नस्य भिक्षुकाः ॥ इति धर्माब्धौ ॥ २४ ॥ आपत्कालीनान्यावृत्तिमाह । कृषिः प्रसिद्धा । शिल्पं सूपकरणादि । भृतिः प्रेष्यत्वम् ॥ कुसीदं वृद्ध्यर्थधनप्रयोगः । इदं ब्राह्मणव्यतिरिक्तम् । ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् । आपद्यपि न वार्धुष्यं ब्राह्मणस्य विधीयते ॥ शकटं भाटकेन धान्यादिवहनद्वारेण जीवनं गिरिः तद्वत् तृणेंधनद्वारेण जीवनम् । सेवा परचित्तानुवर्तनम् । अनूपं प्रचुरतृणवृक्षजलप्रायः प्रदेशः तत्रोपयोगः कार्यः । नृपः तस्माद्याचनं भैक्ष्यं ॥ २५ ॥ १ इज्याध्ययनदानानि ।

विप्रः क्षत्रिय उच्यते ॥ ३१ ॥ हेमरत्नविशेषज्ञो धान्यपोषणतत्परः ॥ क्रयविक्रयतत्वज्ञः स विप्रो वैश्य उच्यते ॥ ३२ ॥ कृषिसेव्यसमाचारो धान्यसंग्रहणे रतः ॥ कृत्याकृत्यविहीनश्च स विप्रः शूद्र उच्यते ॥ ॥ ३३ ॥ यत्रकुत्र प्रतिग्राही नित्यं भ्रमणतत्परः ॥ कार्यमुद्दिश्य लुब्धश्च स बिडाल इति स्मृतः ॥ ३४ ॥ गम्यागम्यं न जानाति स्त्रीषु यो हि निरर्गतः ॥ कृत्याकृत्यं न जानाति स विप्रः पशुरुच्यते ॥ ३५ ॥ वापीकूपतडागादिदेवायतनभेदकः ॥ विप्रदेवापवादी च स विप्रो म्लेंछ उच्यते ॥ ३६ ॥ परहिंसापरः क्रूरः परदारपरायणः ॥ परद्रव्याभिलाषी च स चांडालो हि निर्दयः ॥ ३७ ॥ श्वानविप्रः काकविप्रो मूषिको विप्र उच्यते ॥ स्वकीयवर्णधर्मेण जीवनं सुखदायकम् ॥ ३८ ॥ सत्तवित्तागमा धर्म्या दायो लाभः क्रमो जयः ॥ प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥ ३९ ॥ उपन्यस्तेन यल्लब्धं विद्याया पणपूर्वकम् ॥ शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात् ॥ ४० ॥ विज्ञानशासनाद्वादाल्लब्धं प्राध्ययनाच्च यत् ॥ धनमेवंविधं सर्वं विज्ञेयं धर्मशासनम् ॥ ४१ ॥ इति ते कथितं विप्र संसारे धनकारणम् ॥

---

१ उत्पत्तिस्थानं आकरादिः । २ पैतृकधनं अन्वयागतम् । ३ निधेः । ४ वृद्ध्यर्थं धनप्रयोगः । ५ कृषिवाणिज्ये ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं ते ब्राह्मणाः सर्वे देवालयपुरस्थिताः ॥ ४२ ॥ धर्मेण वर्तनं तेषां व्यंकटेशप्रियाः खलु ॥ जातास्ततो भक्तिबलान्नित्यं प्रत्यक्षदर्शनाः ॥ ४३ ॥ एवं स्वधर्मणा विप्राः क्षत्रिया वैश्यपादजाः ॥ स्त्रियोऽपि मोक्षभागिन्यः स्वधर्मफलमीदृशाम् ॥ ४४ ॥ धर्मस्य पूर्णतार्थं हि भक्तिरेव बलीयसी ॥ भक्त्या मुक्ताः कति कति तेषामंतो न विद्यते ॥ ४५ ॥ धर्मकर्मणि विघ्ना वै योगे ज्ञाने च दुःखदाः ॥ भक्तं रक्षति देवेशो व्यंकटेशो दयानिधिः ॥ ४६ ॥ अतस्तद्भक्तिभावेन सेवनीयो जनार्दनः ॥ भक्तया तारितो भर्ता शीलया ब्राह्मणाधमः ॥ ४७ ॥ अतः कार्या भक्तिरेव भुक्तिमुक्तिफलेप्सुभिः ॥ अध्यायश्रवणात्सौख्यं भक्तिरुत्पद्यते नृणाम् ॥ ४८ ॥ इति श्रीदेवालयग्राममाहात्म्ये त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ छ ॥

जैमिनिरुवाच ॥ भो गुरो तारक मुने नारायण कृपानिधे ॥ चरितं त्वन्मुखांभोजाच्छ्रुत्वानंदं परं गतः ॥ १ ॥ व्यंकटेशचरित्रस्य श्रवादेव नरा भुवि ॥ गतपापा भविष्यन्ति महत्कौतूहलं कलौ ॥ २ ॥ पुनः पुनर्महादेव कथाश्रवणकौतुकम् ॥ नव्यवद्भाति हृदये तस्मात्कथय सुव्रत ॥ ३ ॥ पूर्वं त्वयैव कथितमाम्नाया जलकौतुकम् ॥ तज्जलस्पर्शमात्रेण पिशाचा मुक्तिभागिनः ॥ ४ ॥ आम्नाया सा कथं जाता

कस्यांशा च कुतो नदी ॥ किंरूपा कुत्र संजज्ञे नामनिर्वचनं कुरु ॥ ५ ॥ सूत उवाच ॥ इति तस्य वचः स्वान्ते विचार्य मुनिसत्तमः ॥ कृष्णद्वैपायनः प्राह प्रेमगद्गदया गिरा ॥ ६ ॥ व्यास उवाच ॥ एवमेव पुरा पृष्टः कार्तिकेयेन शंकरः ॥ स्वामिकार्तिक उवाच ॥ भो भो जनक सर्वेश शंकरस्त्वं जगद्गुरुः ॥ ७ ॥ अतस्त्वां परिपृच्छामि देवालयपुरेशितुः ॥ कथां कथय भक्तेश्च हेतुं मुक्तिप्रदां शिवाम् ॥ ८ ॥ नारायणगिरौ यद्यत्तीर्थं तत्रगतं मुदा ॥ मन्नाम्ना यातु विख्याता स्वामिपुष्करिणी प्रिया ॥ ९ ॥ सापि मुख्या प्रियतमा श्रुता जनमनोहरा ॥ या नदी तत्र वहति पापनाशकरा कथम् ॥ १० ॥ कुत्र जाता कथं जाता कस्यांशे नाम किंफला ॥ तीर्थानि कानि संत्यस्यां कियदंतरतः क्रमात् ॥ ११ ॥ व्यास उवाच ॥ वार्णी पुत्रस्य पिबतो महादेवस्य कर्णतः ॥ जलं नयनजं पादे पतितं न तु भूतले ॥ १२ ॥ मनसोह्लादजनकं त्रैलोक्याद्भुतकारणम् ॥ तत उत्थाय श्रीशर्वो ननर्त प्रेमपूरितः ॥ १३ ॥ स्कंद उवाच ॥ किमर्थं नृत्यसि भवानंबु नेत्रोद्भवं कुतः ॥ किमाश्चर्यं वद विभो शरणागतपालक ॥ १४ ॥ श्रीशिव उवाच ॥ शृणु पुत्र प्रवक्ष्यामि संशयांधांजनं परम् ॥ पूर्वं त्वया कृतं प्रश्नं नदीसंबंधमादरात् ॥ १५ ॥ श्रुत्वैव मे स्मृति-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जाता तेन नृत्यामि भो सुत ॥ दक्षिणांभोधितीरे वै क्षेत्रे रामेश्वराभिधे ॥ १६ ॥ पद्मनाभ इति ख्याते ब्राह्मणो ज्ञानदुर्बलः ॥ अप्रतिष्टो लोभयुक्तो मत्सरादिसमन्वितः ॥ १७ ॥ उत्पन्नो जमदग्नेर्वै गोत्रे बहुधनाधिपः ॥ दृष्टिहीनो महात्मानौ जरठौ पितरौ कदा ॥ १८ ॥ नार्चितौ तेन दुष्टेन कलत्राधीनचेतसा ॥ कष्टान्नं दीयते ताभ्यां मिष्टमश्नाति सार्भकः ॥ १९ ॥ अद्य श्वो वा मरिष्यावः स्वादु किंचित् प्रदीयताम् ॥ आवयोरिदमित्यन्नं प्रियमित्युदितेऽपि च ॥ २० ॥ नैव दत्तं किंचिदपि भर्त्सितौ च पुनः पुनः ॥ आतिथ्येनागते विप्रे भर्त्सनं प्रकरोत्यसौ ॥ २१ ॥ दीयते चेदुष्टमन्नं तेन मिष्टं तु भुज्यते ॥ तेन कर्मविपाकेन महता कालयोगतः ॥ २२ ॥ गतं धनं मृता भार्या नष्टा पुत्रादयः परे ॥ तदा चौर्यं तु तु कुशलो हरते दृष्टिसत्पथः ॥ २३ ॥ करोति शपथानुच्चान् गृहीतं न मयेति च ॥ द्यूतेषु शूरो वृजिनेषु क्रूरो चौर्येषु वीरो सुजनेषु भीरुः ॥ परस्वहारो वनितासु जारो यथाभयः स्नायुजतंतुपिंडः ॥ २४ ॥ एवं दुर्वृत्तजातेन सर्वो ग्रामः सुभीतितः ॥ राजाज्ञया धिःकृतोऽसौ वनमध्ये विवेश ह ॥ २५ ॥ पश्चात्तापेन संयुक्तो मनसश्चाजयाल्लघुः ॥ किं कर्तव्यं क्व गंतव्यमिति चिन्तातुरोऽभवत् ॥ २६ ॥ वनाद्वनं समायातः क्षुधया पीडितो भृशम् ॥ सदा श्रमापनोदार्थं स्नानं कुर्वन् जले जले ॥ २७ ॥ तेन प्रापितसद्बुद्धिर्भ्रमन् देवालयं पुरम् ॥ समीपमगमत्तत्र यत्र गाणपतो गिरिः ॥ २८ ॥ शिवमाराधयामास गणेशं वर्षविंशतिः ॥ एकं रुरोद पुरतः शर्व शंभो शिवेति च ॥ २९ ॥ त्वत्पुत्राराधने मग्नं त्वं मा तारय दैवतः ॥ मनो मम महद्दुष्टं तद्धातय परेश्वर ॥ ३० ॥ शिव उवाच ॥ इत्युक्त्वा प्ररुरोदोच्चैर्भो गणेश महेश्वर ॥ तदाहं करुणाविष्टस्तस्य दृष्टिपथं गतः ॥ ३१ ॥ मां दृष्ट्वा मुक्तकंठोऽसावधिकं प्ररुरोद ह ॥ भक्तं तथाविधं दृष्ट्वा गणेशः प्ररुरोद वै ॥ ३२ ॥ तयोर्वृत्तेनाहमपि भक्त्या प्रेम्णाऽरदं बहु ॥ एवं नेत्रजलेनैषां प्रवाहो बहुविस्तृतः ॥ ३३ ॥ सूत उवाच ॥ शिव ऊचे पद्मनाभं वरं वृणु यथेप्सितम् ॥ पद्मनाभ उवाच ॥ मन्मनो वश्यतां यातु ज्ञानं भवतु मेऽनिशम् ॥ ३४ ॥ शिव उवाच ॥ एवं भवतु भद्रं ते त्वन्नेत्रपतितं जलम् ॥ सरिद्रूपेण मनसो मलं हरतु नित्यशः ॥ ३५ ॥ मनोवा नाम विख्याता पापहंत्री भविष्यत्ति ॥ आम्नायायां मिलित्वा सा पूर्णत्वं वै गमिष्यति ॥ ३६ ॥ ततो दुग्धवहा शुद्धा भूत्वा गंगा समुद्रगा ॥ गणेशनेत्रजोदेन स्नातृविघ्नहरा सदा ॥ ३७ ॥ मन्नेत्रजलसं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगभक्तकल्याणदायिनी ॥ अस्यां स्नानेन दानेन मनःशुद्धिर्निरंतरम् ॥ ३८ ॥ स्नानं पानं संगमजं फलं कोट्यधिकं विदुः ॥ त्वं च देवालयं गच्छ वस देवसमीपतः ॥ ३९ ॥ पद्मनाभ उवाच ॥ भवत्प्रसादात्सकला गरिष्ठा गता व्यथा तात कृपा वरिष्ठा ॥ चित्तस्य शुद्धिर्महती बलिष्ठा कल्याणदारिष्टविनष्टदृष्टा ॥ ४० ॥ अहं गच्छामि देवेशमित्युक्त्वा स पुरं गतः ॥ तत्रैव न्यवसद्धीमान् भार्यापुत्रादयोऽभवन् ॥ ४१ ॥ शिव उवाच ॥ हे पुत्र सा स्मृतिर्जाता तया मे नयने जलम् ॥ एवंभूता सर्वशिवा नदीनामुत्तमा परा ॥ ४२ ॥ यस्याः संगार्थमनघा मनसो वाहिनी गता ॥ तस्याः किं वच्मि माहात्म्यं लेशतः शृणु मे सुत ॥ ४३ ॥ इति देवालयग्राममाहात्म्ये चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ शिव उवाच ॥ पुष्करिण्युद्भवे पूर्वं चरितं श्रीनिवासजम् ॥ दृष्ट्वा तद्वर्णने वेदाः समर्था अपि नाऽभवन् ॥ १ ॥ भक्तैर्माहात्म्यमतुलं निशम्य ब्रह्मश्वासजाः ॥ सर्वैर्विचारिता तत्र ब्रह्मविद्या तपःपरा ॥ २ ॥ शुको वशिष्ठो जनको जाबालिर्गौतमः परः ॥ एकतश्च द्वितश्चैव त्रितश्चैव महातपाः ॥ ३ ॥ जमदग्निर्भृगुः कण्वो ब्रम्हेंद्राद्याः सुरास्तथा ॥ शिवोऽपि परया भक्त्या गोविंदं भजतेऽनिशम् ॥ ४ ॥ वृक्षवल्लीपशूनां हि सर्वे तिष्ठन्ति

सन्निधौ ॥ वयं वै केन रूपेण व्यंकटेशस्य सेवने ॥ ५ ॥ तिष्ठामो ह्यनिशं देवकृपया तद्भविष्यति ॥ इत्थं विचार्य वेदा वै तपोवनमुपागताः ॥ ६ ॥ तपो हि परमं ब्रह्म तपसा सृज्यते जगत् ॥ तपःसाध्यो हरिः साक्षाद्भक्ति मे हृदयं तपः ॥ ७ ॥ एवं विनिश्चयं कृत्वा निगमास्तपसा हरिम् ॥ अर्चयामासुरव्यग्रा वर्षमात्रं दिवानिशम् ॥ ८ ॥ सगुणं हृदये मूर्तिं ध्यात्वा भक्त्यैकचेतसा ॥ पौरुषेणैव सूक्तेन पूजां ध्यानं जपं तथा ॥ ९ ॥ होमं च तर्पणं चैव पानं स्नानं सुभक्षणम् ॥ वर्षान्ते भगवांस्तुष्टो व्यंकटेशो दयानिधिः ॥ १० ॥ प्रत्यक्षं दर्शनं दत्त्वा वरं ब्रूत महाशयाः ॥ वेदा ऊचुः ॥ त्वं ब्रह्म परमं देव निर्गुणः सगुणः परः ॥ ११ ॥ सृष्टिस्थित्यप्ययानां हि त्वामेव कारणं विदुः ॥ अदित्यां वामनो भूत्वा बलेर्यज्ञं स्तुवन् प्रभुः ॥ १२ ॥ बंध्वर्थं याचनां मत्वा त्रिधा हि निदधे पदम् ॥ अगजाशयने स्थित्वा बालरूपी क्षणाद्भवौ ॥ १३ ॥ स गणेशस्त्वमेवासि स्तुतिभिः सीदसाधनम् ॥ अमृतोत्पादने खिन्नान् देवान् दृष्ट्वा गदाधरः ॥ १४ ॥ स्वयं निर्मथने युक्तो बाहुभ्यामुतते नमः ॥ आकाशवज्जगद्व्याप्य मेरोरपि महान् भवान् ॥ ॥ १५ ॥ अणोरप्यणुरूपस्त्वमत्यतिष्ठद्दशांगुलम् ॥ जीवः सर्वोत्तमो रूपो ज्ञाने तपसि कर्मसु ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवाज्ञापालका देवा अवध्नन् पुरुषं पशुम् ॥ जन्मत्वात्मतया पुंसां मृत्युरत्यंतविस्मृतिः ॥ १७ ॥ मूलाज्ञानेन देवेश मृत्योर्मुक्षीयमामृतात् ॥ त्वद्भासा भासयत्येष रविरग्निश्च चन्द्रमाः ॥ सूर्यमंडलवर्ती च धियो यो नः प्रचोदयात् ॥ १८ ॥ यक्षाः साध्याश्च ब्रह्माद्या देवाश्च मुनयस्तथा ॥ वेदा आज्ञां पालयन्ति सर्वे तर्दिद्र ते वशे ॥ १९ ॥ इति स्तुत्वा नमश्चक्रुः साष्टांगं दंडवद्भुवि ॥ पुनरुत्थाय ते सर्वे नम्राः सांजलयो मुदा ॥ २० ॥ शिव उवाच ॥ अष्टपद्यात्मकं स्तोत्रं वेदपादाभिधं वरम् ॥ यः पठेच्छृणुयाद्वापि तस्याभीष्टं भवेद् ध्रुवम् ॥ २१ ॥ अष्टमासं प्रतिदिनं जपेद्यो वसुसंख्यया ॥ तस्य सिद्धिः करे प्राप्ता भविष्यति संशयः ॥ २२ ॥ शिव उवाच ॥ इति स्तुत्या प्रसन्नात्मा लक्ष्मीशः करुणाकरः ॥ मेघगंभीरया वाण्या प्राह वेदान् जगत्पिता ॥ २३ ॥ वरान् वृणुत भद्रं वो किमभीष्टं ददामि वः ॥ वेदा ऊचुः यदि प्रसन्नो देवेश भगवन् भक्तवत्सलः ॥ २४ ॥ जातं वरस्य कृत्यं नो वेदादीनामगोचरः ॥ अस्मद्दृष्टिपथं यात इदमेव महत्फलम् ॥ २५ ॥ तथापि भवदाज्ञाया भंगभीत्या वरामहे ॥ यथा ब्रह्मादयो देवा भवत्स्थाननिवासिनः ॥ २६ ॥ नानारूपैरर्चनं ते कुर्वन्ति सुखिनोऽभवन् ॥ तथास्माकं दिश

विभो येन भक्ता भवेमहि ॥ २७ ॥ श्रीलक्ष्मीवेंकटेश उवाच ॥ धन्या यूयं महाभागा मद्रूपा एव केवलम् ॥ सगुणां भक्तिमिच्छंतः सर्वजीवनहेतवः ॥ २८ ॥ अतो जीवनरूपेण नदीरूपेण चानघाः ॥ भवितव्यं भवद्भिश्च लोककल्याणहेतवे ॥ २९ ॥ वेदस्यांशान्नदी यस्मादाम्नायेति भविष्यति ॥ तस्यास्तीरे तीर्थसंघो भविष्यति मम प्रियः ॥ ३० ॥ देवालयोपगा श्रेष्ठा देवसज्जनसंयुताः ॥ एवं भवत हे वेदा मम भक्तिर्भविष्यति ॥ ३१ ॥ इत्युक्त्वांतर्दधे देवो वेदा वै विस्मिताः खलु ॥ ततो नदीस्वरूपेण निर्गता अंशतः स्थिताः ॥ ३२ ॥ शिव उवाच ॥ एवं नदी पुरा जाता प्रख्याता भुवनत्रये ॥ नाम्नाम्नायेति भुवने देवमान्या बभूव ह ॥ ३३ ॥ पूर्वं गणेशभक्तैश्च यत्र तप्तं स्वकर्धये ॥ तपोवनं ततो जातं गव्यूतिद्वितयं ततः ॥ ३४ ॥ वेदानां तपसाधिक्यं सरित्तज्ज्ञा सदाधिका ॥ यत्रोद्गमे वेदतीर्थं वेदस्य फलदायकम् ॥ ३५ ॥ शतहस्ते ब्रह्मतीर्थं चंद्रतीर्थं सुयामुनम् ॥ सरस्वतीतीर्थवरं मथुरातीर्थमेव च ॥ ३६ ॥ सत्यातीर्थं कृष्णतीर्थं यशोदातीर्थमुच्यते ॥ अगस्त्यतीर्थमिति च कापितं पार्वतं तथा॥३७॥

---

१ अयोध्या ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्वतीर्थं पुरा यत्र साश्वः स्वर्गं गतो नरः ॥ कण्वः शुक्रो भृगुः प्राणो जमदग्निस्तु कौशिकः ॥ ३८ ॥ मार्कंडेयो मरीचिश्च गुरुरत्रिस्तु कश्यपः ॥ ऋष्यशृंगः कहोलश्च जनको राम एव च ॥ ३९ ॥ एषां तीर्थानि ख्यातानि साध्यं राजिकमेव च ॥ वैश्वदेवं तीर्थवरं सिद्धतीर्थं सुसिद्धिदम् ॥ ४० ॥ राधातीर्थं बुद्धितीर्थं कावेरीतीर्थमुच्यते ॥ तीर्थं लाभं च लक्षं च सावित्रीतीर्थमुच्यते ॥ ४१ ॥ गयातीर्थं पिण्ड-दानात् पितॄणां मुक्तिदायकम् ॥ पितृतीर्थं मातृतीर्थं श्राद्धेन तृप्तिदं विदुः ॥ ४२ ॥ तीर्थानामंतरं ज्ञेयं शतहस्तप्रमाणतः ॥ येषु स्नानं सकृज्जातं दुःखहंतृ न संशयः ॥ ४३ ॥ ऋषयो न्यवसन्तस्ते तत्र तीर्थानि चक्रिरे ॥ ततो याम्यमुखी जाता यममार्गनिवारिणी ॥ ४४ ॥ तत्र श्राद्धं सकृद्दत्तं निरयादुद्धृतेः करम् ॥ धनुःपंचशते ज्ञेयं तीर्थं रामेश्वराभिधम् ॥ ४५ ॥ यत्र रामेश्वरो राजा रामासंगाद्धतप्रभः ॥ अकस्मादागतः स्नात्वा रामेश्वरमवाप्तवान् ॥ ४६ ॥ धनुस्त्रिंशतसंख्याया रोगघ्नं तीर्थमुच्यते ॥ अशी-तिर्वातरोगाश्च त्रिवर्षस्नानपानतः ॥ ४७ ॥ गच्छन्ति विलयं स्कंद धनुर्द्विशतके ततः ॥ मनोवासंगमो वर्ण्यः सर्वदुःखहरः परः ॥ ४८ ॥ तत्र तीर्थं प्रयागं वै प्रयागादधिकं विदुः ॥ गणेशदक्षनेत्रोदं सूर्यजं

तच्च वै मतम् ॥ ४९ ॥ यस्य नेत्रे चंद्रसूर्यौ प्रख्यातौ ब्रह्मगोलके ॥ तज्जा सा यमुना ज्ञेया गंगा तु शिवजा स्मृता ॥ ५० ॥ सरस्वती तु वेदांशा तासां यत्र सुसंगमः ॥ प्रयागमिति तं विद्धि महासिद्धिप्रदं विदुः ॥ ५१ ॥ रे रे लोकाः पापनाशं यदीच्छथ सुखं परम् ॥ प्रयागं गच्छत प्राज्ञाः संसारान्मुक्तिमाप्नुत ॥ ५२ ॥ यावत्संगमजं स्नानं न वृत्तं भक्तिमार्गतः ॥ तावत्संसारजं दुःखं किमर्थं नोपगच्छत ॥ ५३ ॥ वायोः स्पर्शात्पापहानिरुक्ता स्नानस्य किं फलम् ॥ अग्रे तीर्थालयान्यस्यां सतीतीर्थं ततः परम् ॥५४॥ सतीतीर्थात्पुरोभागे शतचापप्रमाणतः ॥ तीर्थं नरहरेः ख्यातं कोटितीर्थाधिकं विदुः ॥ ५५ ॥ तत्रैव तीर्थं गाणेशं सर्वविघ्नहरं परम् ॥ तत्तीर्थमहिमानं कः शेषोऽपि वर्णनाक्षमः ॥ एतदध्यायश्रवणं भवत्य-तिसुखप्रदम् ॥ ५६ ॥ इति देवालयग्राममाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥

स्कंद उवाच ॥ अतीवो मनसोह्लादः श्रवणादेव जायते ॥ तत्तीर्थं कथमुत्पन्नं किं फलं वद मे पितः ॥ १ ॥ साधूनां समदृष्टीनामार्तपीडाविनाशिनाम् ॥ नहि गोप्यं त्रिलोकेषु गुह्याद्गुह्यतरं वद ॥ २ ॥ गुह्यं पुत्रे च शिष्ये च वदन्ति गुरवः सदा ॥ शरणं ते सुचरणं मरणस्यापि वारणम् ॥ ३ ॥ आश्रितोऽस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दयासिंधो मामुद्धर कथां वदन् ॥ व्यास उवाच ॥ पुत्रवाक्यं निशम्यासौ हर्षाद्वक्तुमथारभत् ॥ ४ ॥
शिव उवाच ॥ धन्योऽसि पुत्र ते बुद्धिर्धन्या सा पार्वती शिवः ॥ व्यंकटेशकथा गंगा पापिनां पापदा-
हिनी ॥५ ॥ तस्यां स्नातुं समुद्युक्तः कोऽन्योऽस्ति सदृशस्त्वया ॥ अतो वच्मि कथासारं शृणु भक्त्यै-
कचेतसा ॥ ६ ॥ महाकालवने पूर्वं क्षिप्रातीरे द्विजोत्तमः ॥ संदीपनकुले जातः पुत्रशिष्यैश्च संयुतः ॥
॥ ७ ॥ शिवशर्मेति विख्यातः पत्नी यस्य गुणाकरा ॥ पतिव्रता पतिप्राणा पतिचित्तानुवर्तिनी ॥ ८ ॥
शुभं वाप्यशुभं वक्ति धवस्तद्वचने रता ॥ सुगुणानामतः ख्याता सर्वजीवाभयप्रदा ॥ ९ ॥ पुत्रे शिष्ये
न मनुते भेदं सा पत्युराज्ञया ॥ नित्यं क्षिप्रानदीस्नानं महाकालस्य दर्शनम् ॥ १० ॥ धनं बहुविधं
तेन प्राप्तं वैश्वानरार्चनात् ॥ एवं हि वसतस्तस्य ब्रह्मचारी समागतः ॥ ११ ॥ सरिन्नाथतटे वासो गण-
नाथस्य यत्र हि ॥ प्रवालक्षेत्रमिति तत् ख्यातं त्रैलोक्यमंडले ॥ १२ ॥ ढुंढिराजात्मजो मौंजीबंधना-
न्तर्गतः पुरात् ॥ जितेंद्रियो गणपती रूपवानतिबुद्धिमान् ॥ १३ ॥ वैकर्तनजवेदानां पठने कांक्षया
गुरुम् ॥ पश्यञ्छृण्वन्नुज्जयिनीं शिवशर्माणमागतः ॥ १४ ॥ भारद्वाजस्य वै गोत्रे जातोऽहमभिवादये ॥

नाम्ना गणपतिर्नाथ वेदान् शिक्षय मां गुरो ॥ १५ ॥ भवत्सेवां करिष्यामि यया मोक्षो न दुर्लभः ॥
शिवशर्मोवाच ॥ वस शिष्य महाभाग वेदान् प्राप्स्यस्यनुत्तमान् ॥ १६ ॥ शिष्यधर्मेण विचर मा गर्वं
कुरु सुव्रत ॥ इत्युक्तस्तु तदा चक्रे सेवां गुरुजनप्रियः ॥ १७ ॥ शिव उवाच ॥ गुरुसेवैव परमा सुखदा
सर्वदा सदा ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात् परब्रह्म तस्माद्गुरुमुपाश्रयेत् ॥ १८ ॥
एवं गणपतिर्विप्रो दांतो गुरुकुले वसन् ॥ भिक्षामादाय गुरवे निवेद्याज्ञा गुरोर्यदा ॥ १९ ॥ तदा वै
भोजनं नोचेदुपवासपरोऽभवत् ॥ अग्रे तिष्ठन् बद्धपाणिः स्वामिन् किं करवाण्यहम् ॥ २० ॥ गुर्वाज्ञो-
ल्लंघनं नैव गुरोरुच्छिष्टभोजनम् ॥ करोति परमप्रीत्या पादसंवाहनादिकम् ॥ २१ ॥ गुरोर्वस्त्रं तथा पात्रपादु-
कोपानहस्तथा ॥ हस्ते गृह्णाति सततं छायायाः क्रमणं नहि ॥ २२ ॥ समिधेंधनदर्भाणां जलानां चैव
जैमिने ॥ गुरोर्गृहे आनयनं प्रकरोति सदा बटुः ॥ २३ ॥ गुरुपत्नी गुरोः पुत्रा स्नुषा यद्यदिशन्ति हि ॥
तत्तत्करोति सानंद एवं कालो महानगात् ॥ २४ ॥ एतस्मिन्नेव काले तु गुरुपत्न्या गुरोस्तथा ॥ वात-
रक्तः समभवत् स रोगो बलवत्तरः ॥ २५ ॥ अयं रोगोऽष्टधा प्रोक्तो वातपित्तकफैस्त्रिधा ॥ त्रिदोषजो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्तजश्च द्वंद्वजस्तु त्रिधा मतः ॥ २६ ॥ उत्पत्तिरस्य भवति लवणाम्लातिसेवनैः ॥ तीक्ष्णोष्णाजीर्ण-
मलिनशुष्कमांसाशनैरपि ॥ २७ ॥ मूलपिण्याकनिष्पावाम्लान्नपर्युषितेन च ॥ दध्यिक्षुरसतो रोगो भव-
तीति विनिश्चयः ॥ २८ ॥ मृदुगात्रस्य स्थूलस्य मिथ्याहारविहारिणः ॥ चिन्तया चापि हीनस्य सुकु-
मारस्य वायुना ॥ २९ ॥ रक्तं हि कुपितं पादे दुष्टेन वायुना सह ॥ पादस्पर्शेन दुःखं स्याद्बधिरत्वं
तयोस्तथा ॥ ३० ॥ पित्तादाहश्चोष्णयुक्तः शोथस्तु रक्तवर्णकः ॥ घर्मप्रवृत्तिर्बहुधा कृशत्वं च क्षताधि-
कम् ॥ ३१ ॥ स्पर्शज्ञानेन शून्यत्वं शिथिलत्वं च संधिषु ॥ आलस्यं हस्तपादोरुस्कंधजानुषु पीडनम्
॥ ३२ ॥ निस्तेजत्वं च कण्डूश्च रक्तवर्णाश्च ग्रंथयः ॥ मोहो दाहो ज्वरो निद्रानाशो विग्रुलता तथा
॥ ३३ ॥ संकोचस्तु शिराणां वै छिद्राणि च तनौ खलु ॥ ग्रंथयो बहवोऽगेषु रक्तस्रावश्च जायते ॥ ३४ ॥
एवं रोगेण संयुक्तौ दंपती शुद्धमानसौ ॥ तत्सेवां गणपश्चक्रे वस्त्रप्रक्षालनादिना ॥ ३५ ॥ पादाभ्यंगांग-
संवाहभोजनाच्छादनादिभिः ॥ विष्टां मूत्रं च सिंघाणं स्वयं हि क्षिपते बहिः ॥ ३६ ॥ मलासृङ्मूत्र-
दुर्गंधं सहते क्षालनं तथा ॥ करोति ब्रह्मचारी स सदा निर्मलचेतसा ॥ ३७ ॥ तस्य भक्त्या प्रसन्नोऽभूत

गुरुः पत्न्या समन्वितः ॥ शिष्यमाहूय धर्मात्मा प्राह मां विपिने नय ॥ ३८॥ तत्राहं निवसिष्यामि कंचि-
त्कालं स्त्रिया सह ॥ तपसा देहमोक्षं वा रोगनाशमथापि वा ॥ ३९ ॥ करिष्ये वचनं कार्यं त्वया मे
नान्यथा वद ॥ इत्युक्तस्तौ तु विपिने तापसारण्यमानयत् ॥ ४० ॥ गव्यूतिद्वितयं गत्वा सरित्तीरे
निषीदतुः ॥ तत्र सेवकधर्मेण संतोषमकरोत्तयोः ॥ ४१ ॥ प्रत्यहं तौ निर्भर्त्सयतां कथं त्वं मूढधीः
सदा ॥ आवांस्तुदंति दंशा वै न निवारयसि रे शठ ॥ ४२ ॥ मधुरान्नं नानयसि कथं सेवां करोषि रे ॥
भिक्षापात्रे स्वल्पभिक्षा दुर्मते दृश्यते किल ॥ ४३ ॥ इत्यादिवचनैर्दुष्टैस्ताडितोऽपि प्रणम्य सः ॥ अप-
राधं क्षम स्वामिन् नाथ बालस्य दुष्टधेः ॥ ४४ ॥ एवं द्वादश मासा वै गतास्तत्र वने सतः ॥ एकदा
तरुणी श्यामा रूपेण धिःकृताप्सराः ॥ ४५ ॥ यस्या नेत्रस्य शोभार्थे हरिणा वनवासिनः ॥ कांत्या
शशी मुखेनैव सिंहकट्या विराजते ॥ ४६ ॥ पद्मिनी नाम सा जात्या लावण्येन रती रतिः ॥ नासा शुकस्य
नासेव शब्दतः कोकिला बभौ ॥ ४७ ॥ अलंकारवती साध्वी कटाक्षेण तु मोहदा ॥ हावभावसमायुक्ता
देवशर्माग्रतः स्थिता ॥ ४८ ॥ प्रणम्योवाच विनयादयं शिष्यः कुतस्तव ॥ पुत्रो वा रोगिणी केयं रोग-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्तो भवान् कुतः ॥ ४९ ॥ नाम किं कुत्र वासस्ते विपिने निर्जने कथम् ॥ तयेत्युक्तो देवशर्मा तां विलोक्य सुमोह च ॥ ५० ॥ सर्वं वृत्तं निवेद्यास्यै भवती कुत आगता ॥ सोचे कुलेन गेत्रेण मम किं कार्यमद्य वः ॥ ५१ ॥ मातापितृविहीनाहं सांप्रतं भर्तुरिच्छया ॥ आगता ब्राह्मणी चाहं तव शिष्यं वराम्यहम् ॥ ५२ ॥ शिवशर्मोवाच ॥ भार्या मे भव सुश्रोणि तव वाक्यं करोम्यहम् ॥ इयं जाया मया त्यक्ता शिष्यस्तु सेवने रतः ॥ ५३ ॥ सोवाच ॥ त्वं तु रोगबलैर्व्याप्तो जरठो दंतहीनता ॥ मृत्युः स्मरति नित्यं त्वां मया किंच करिष्यसि ॥ ५४ ॥ शिवशर्मोवाच ॥ तपसा रोगमुक्तोऽहं भविष्याम्यचिरादिह ॥ दशनैः किमु कृत्यं ते जरठोऽपि सुशक्तिमान् ॥ ५५ ॥ त्वया प्रयत्नः क्रियते भर्तुरर्थे महान् यदि ॥ अतस्त्वां वरये प्राज्ञे वरत्वेन गृहाण माम् ॥ ५६ ॥ सोवाच ॥ नाहं त्वयार्थिनी ब्रह्मन् कुमार्या जरठोऽमतः ॥ गृहं धनं सुवसनं धान्यं पात्रं सुभूषणम् ॥ सदन्नं भोजने नित्यं दरिद्राणां कुतो वद ॥ ५७ ॥ सर्वं तुच्छमहं मन्ये गुणी युवा धवो यदा ॥ भवत्सु सर्वं हीनं वै नाहं त्वां वरयेऽधुना ॥ ५८ ॥ शिवशर्मोवाच ॥ तव वाक्येऽधुना शब्दस्तेन प्रीतिर्मम त्वयि ॥ इतो गृहं गमिष्यामि तवार्हं वसनादिकम् ॥ ५९ ॥

संपादयामि भद्रं ते शिष्यं ते प्रेरयाम्यहम् ॥ सोवाच ॥ गच्छ गच्छ त्वरायुक्तो ममार्हो नासि वै भवान् ॥ ६० ॥ उक्त्वा जगाम गणपं मोहयन्ती दृशावला ॥ मोहितः कामबाणेन शिवशर्मापि वै गृहम् ॥ ६१ ॥ पत्नीशिष्यसहायेन रोगेण च समन्वितः ॥ पत्नी मम कथं सा स्यान्मनसीत्थं विचारयन् ॥ ६२ ॥ इति देवालयग्राममाहात्म्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ स्कंद उवाच ॥ वद देव महासिंधो किं कृतं शिवशर्मणा ॥ अत्यद्भुतं वृत्तमिदं जरठस्यापि कामता ॥ १ ॥ रोगी मृत्युमुखे मग्नो भेको दंशानपेक्षते ॥ सिंहदंष्ट्रांतरगतो यथा भोजनमिच्छति ॥२॥ कंठे घुरघुरारावः सन्निपातेन मृत्युगः ॥ यथेच्छति स्वीयद्रव्यं तथायं स्त्रियमिच्छति ॥ ३ ॥ कालस्य नायं महिमा नो वा दैवस्य कर्मणः ॥ नो वा युगभवः कश्चित् मदनस्य बलं हि तत् ॥ ४ ॥ शिव उवाच ॥ सत्यमुक्तं त्वया पुत्र ब्रह्माद्याः काममार्गणैः ॥ विद्धाः पेतुः कष्टमार्गे त्रिलोकविजयी च सः ॥५॥ मोहिनीवशगो ब्रह्मा चंद्रमा गुरुतल्पगः ॥ बृहस्पतिर्बंधुभार्यामग्रहीत्स्वेन तेजसा ॥६॥ सुत्रामा देवराट् लुब्धः सहस्रभगतां गतः ॥ रावणः कौरवश्चैवाजामिलो व्याधं एव च ॥७॥ विष्णुर्भूत्वा कृष्णनामा गोकुले मोहमाप सः ॥ दारुकाख्ये वने पूर्वं लिंगपातात्सुदु-

१ दमयन्तीचरित्रगः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुयहम् ॥८॥ विश्वामित्रादयोऽप्येवं त्वयापि बहुरूपतः ॥ देवस्त्रियो नष्टशौचाः कृताः कामस्य तद्बलम् ॥९॥ शच्यभिलाषो नहुषं शिवजाकांक्षा दनोः सुतं हुंडः ॥ धृतजायातनुकेशवलिप्साहुंडजं यमाध्वगं चक्रे ॥१०॥ जालंधरमगजाशा वृंदाशा गतजयं रमाधीशम् ॥ श्रीमत्याशा विष्णुं दशरथकुलजं तमोयुतं चक्रे ॥११॥ धन्वन्तरिकरकलशामृताहरणकरबलाधिपा दितिजाः ॥ दृष्ट्वैव मोहिनीं तां स्त्री मम बुद्ध्या यमालयं जग्मुः ॥ १२ ॥ गुरुजायेहा शशिनं निर्मलकायं कलंकितं चक्रे ॥ षट्शतकीचकहननं पांचाल्याशा चकार धर्मेण ॥ १३ ॥ कचाशा देवयानीं तु बंधुरूयाशा हि वालिनम् ॥ कर्णाशा द्रौपदीलज्जां जह्नीहा गांगजं महः ॥ १४ ॥ अहनत्सर्वतो भद्रं किमु वर्ण्यं मया तव ॥ एवंभूता हि बहवो देवासुरनरेष्वपि ॥ १५ ॥ इत्थं कामस्य माहात्म्यं बाणास्तस्याबलाः सदा ॥ ताभिर्जगन्मोहयति किमाश्चर्यं शिवस्य वै ॥ १६ ॥ अतिचिंतासमाविष्टः भोजनाच्छादनाप्रियः ॥ ऊर्ध्वदृष्टिः श्वासपरः सदा म्लानमुखोऽभवत् ॥ १७ ॥ सा कन्या मे कथं जाया बाह्वोरंतरमाविशेत् ॥ यदि नायाति चार्वंगी तदा मे मरणं ध्रुवम् ॥ १८ ॥ इत्थं चित्ते चिन्तयति कामरोगेण धिःकृतः ॥ शिष्यं सेवापरं प्राह तां स्त्रियं गच्छ सत्वरम् ॥ १९ ॥

येनकेनाप्युपायेन मम भार्यां सतीं कुरु ॥ अन्यथा मृत्युदंष्ट्रा मां यमलोकं हि नेष्यति ॥ २० ॥ गुरुहत्याभवं पापं कुत्र तत्क्षालयिष्यसि ॥ इत्थं निशम्य वचनं शिष्यः सर्वांगकंपितः ॥ २१ ॥ रुदन् प्राह गुरो नाथ करोमि वचनं तव ॥ त्वय्यधीना हि मे प्राणा त्वदायत्तं कलेवरम् ॥ २२ ॥ शिवशर्मोवाच ॥ गच्छ गच्छ तुरं गच्छ तामानय मदंतिके ॥ इत्युक्तस्तं प्रणम्याह गच्छामीति च निर्ययौ ॥२३॥ गुरुपत्नी क्रोधयुता निर्भर्त्स्य शिष्यमाह सा ॥ यदि तां त्वं सपत्नीं मे करिष्यसि शठाधम ॥ २४ ॥ शापदग्धं करोमि त्वामन्यथा वरदास्म्यहम् ॥ गुरुपुत्र उवाच ॥ सापत्नमातरमहं नेच्छामि गच्छ मद्गृहात् ॥२५॥ मन्मनोविपरीतां त्वं वर्तने कुरुषे मतिम् ॥ तदैव त्वां पातयिष्ये ब्रह्महत्याशतेन वै ॥ २६ ॥ गुरुरुवाच॥ रे शिष्य दुर्मते गच्छ तामानय मम स्त्रियम् ॥ अन्यथा पापमेव स्यात्सर्वनाशो भवेत्तव ॥ २७॥ शिष्य उवाच ॥ गच्छामि नाथ विपिने त्वत्कृपालेशतो गुरो ॥ धर्मपत्नीं करिष्यामि भवेत्तव ज्ञानिसत्तम ॥२८॥ गुरुरुवाच ॥ एवं ते भाषमाणस्य बुद्धिः शिष्य प्रवर्धताम् ॥ गुरुपत्निरुवाच ॥ यदि मद्वचनं नैव करोषि कुष्टरोगभाक् ॥२९॥ भविष्यसि न संदेहो गुरुपुत्र उवाच ह ॥ मातुर्वचनमुल्लंघ्य ममापि दुर्मतिर्यदि ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्महत्या गुरोर्हत्या जगद्धत्या तव स्थिरा ॥ अनेकनरके वासोऽनंतकालं भविष्यति ॥ ३१ ॥
गणपतिरुवाच ॥ गुरुपत्नि नमस्तुभ्यं गुरुपुत्र नमोऽस्तु ते ॥ गुरोराज्ञा यथा मान्या तथैव भवतारेपि
॥ ३२ ॥ इत्युक्त्वा निर्गतो विप्रो गव्यूतिद्वितयं गतः ॥ तत्रापश्यत् स्त्रियं तां च चिंतया व्याकुलीकृतः
॥ ३३ ॥ तथा दृष्टो यदा गत्वा हस्तं धृत्वाब्रवीन्मुदा ॥ एह्येहि भद्रं गणप तवातीवं भविष्यति ॥ ३४ ॥
मम भर्ता त्वमेवासि जगद्धात्रा विनिर्मितः ॥ मम रूपं मम गृहं धनं मम कलेवरम् ॥ ३५ ॥ सर्वं नाथ-
स्त्वमसि मा विलंबं कुरु भो प्रभो ॥ तदैवाहं वृद्धकामा यदा त्वां द्दष्टवत्यहम् ॥ ३६ ॥ गुरोः
समीपे मां नैव गृह्णासीति न चोदितः ॥ सर्वं त्यक्त्वाश्रमं पूर्वं नयामि भवनं मम ॥ ३७ ॥ शिव उवाच ॥
ततः सा भ्रूकटाक्षेण ताडयामास तं हृदि ॥ स्मितं चक्रे हावभावं मदनेन वशीकृता ॥ ३८ ॥ श्रुत्वा
वाक्यानि दृष्ट्वा तद्धैर्यमालंब्य भूसुरः ॥ उवाच क्षम भो देवि त्वं मे दीनस्य वै शृणु ॥ ३९ ॥ गुरोराज्ञा-
करी त्वं च भव मे जननी मुदा ॥ तेन स्वर्गाधिरूढा ते कीर्तिः पातालगामिनी ॥ ४० ॥ सोवाच ॥
वृद्धं न वरये नाथ रोगिणं हीनशक्तिकम् ॥ त्वमेव मे सखा चेति निश्चयः पूर्वमेव नः ॥ ४१ ॥ गुरुणा

गुरुपत्न्या वा गुरुपुत्रेण वा प्रभो ॥ कथितं किं ममाचक्ष्व भव भर्ता ममानघ ॥ ४२ ॥ शिव उवाच ॥
तेन सर्वं प्रकथितं श्रुत्वोच्चैः प्रजहास सा ॥ अरे गणप न प्रज्ञा तवास्ति किं करोम्यहम् ॥ ४३ ॥ यदि
भार्या गुरोर्जाता सपत्नीत्वं सदैव मे ॥ सापत्नता च पुत्राणां कथं नाथ गमिष्यति ॥ ४४ ॥ विरुद्धजनकं
वाक्यं विचार्य भव मे धवः ॥ अन्यथा गुरुपत्न्यास्ते गुरुपुत्रस्य शापजम् ॥ ४५ ॥ भयमस्ति महन्नाथ
त्वं मे प्राणिग्रहं कुरु ॥ शिव उवाच ॥ गणपतिस्तदा खिन्नः कथं सर्वं भविष्यति ॥ ४६ ॥ परस्परवि-
रोधे तु कथं कार्यं ममाधुना ॥ माता श्रेष्ठा पिता ज्येष्ठो गुरुपुत्रस्तथैव च ॥ ४७ ॥ कस्य कार्यं मया
कार्यं किं मे दैवादुपस्थितम् ॥ गुरोर्गरीयसी माता हीति शास्त्रानुशासनम् ॥ ४८ ॥ यथा गुरुर्मा-
न्यतमस्तथा तत्पुत्रसंततिः ॥ कस्याज्ञापालनं कार्यं मयास्मिन्धर्मसंकटे ॥ ४९ ॥ पितुराज्ञाकरो रामः
सभार्यो वनमाविशत् ॥ जामदग्न्येन निहता रेणुका ह्युत्थिता पुनः ॥ ५० ॥ भीष्मेणापि पितुस्तोषः
कृतो लोकहितार्थिना ॥ गौतमाज्ञापालनार्थं मातुश्च वधकर्मणि ॥ ५१ ॥ प्रवृत्तः शस्त्रमुद्यम्य चिरकारी
प्रशस्यते ॥ उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ॥ ५२ ॥ अतो मया गुरोराज्ञा पाल्या सर्वा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मना यदि ॥ मृत्युर्वा कुष्ठरोगो वा पापं भवतु वा न वा ॥ ५३ ॥ इत्थं विचार्य मनसि बद्धांजलिमुवाच सः ॥ अहं पुत्रस्त्वया पाल्यो जननी त्वं भवाधुना ॥ ५४ ॥ मम यदभावि भवतु गुरुतोषाच्छुभं खलु ॥ स्युवाच ॥ गुरुपत्नी भविष्यामि ममाभीष्टं ददासि चेत् ॥ ५५ ॥ शिष्य उवाच ॥ नमामि भवतीं साध्वीं वदाभीष्टं किमस्ति ते ॥ ददामि गुरुतोषार्थं स्वदेहं प्राणमेव च ॥ ५६ ॥ सत्येन चैव शपथं करोमि सर्वदा वचः ॥ स्युवाच ॥ तवांगाच्छेदनं कृत्वा त्वचं देहि महामते ॥ ५७ ॥ जलेन पूरिते नेत्रे सर्वं व्यर्थं भवेत्तव ॥ शिष्य उवाच ॥ देहि शस्त्रं गृहाण त्वं मदंगत्वचमेव हि ॥५८॥ सूत उवाच ॥ तया दत्तायुधं गृह्य स्वांगच्छेदनमारभत् ॥ धन्यः शिष्यस्त्वचं सर्वां छेदयित्वा ददौ मुदा ॥ ५९ ॥ नमस्तेऽस्तु महाभागे गच्छावो मद्गुरोर्गृहम् ॥ स्युवाच ॥ हे वत्स ते प्रसन्नाहं वरं वरय सुव्रत ॥ ६० ॥ गुरुभक्तिः कृता सत्या धन्यस्त्वमसि भूतले ॥ इच्छां ते पूरयिष्यामि ब्रूहि ब्रूहि वरं वृणु ॥ ६१ ॥ अहं बालो हि ते देवि वरं देहि ममानघे ॥ गुरोः पत्नी भव त्वं मे मा सपत्नी च मा भव ॥ ६२ ॥ गुरुपुत्रमनः पूर्णं कुरु तूर्णं पतिव्रते ॥ स्युवाच ॥ तवाज्ञापूरणं कार्यं प्रतिज्ञातं मयैव हि ॥ ६३ ॥ तस्मात्सर्वं करिष्यामि गच्छावस्त्व-

द्गुरोर्गृहम् ॥ इत्युक्त्वा निर्गता गंतुं तेन शिष्येण जैमिने ॥ अस्याद्भुतस्य श्रवणादतुलं कार्यं जायते ॥ ६४ ॥ इति देवालयग्राममाहात्म्ये सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ७ ॥ स्कंद उवाच ॥ श्रुत्वा कथां विचित्रां हि हर्षश्चेतसि जायते ॥ अग्रे कथमभूदेव तन्मे कथय शंकर ॥ १ ॥ परस्परं विरोधात्ते शिष्यस्य किमभूत्तदा ॥ माता वा गुरुपुत्रो वा किं कुर्वाते ह्युभौ किल ॥ २ ॥ यत्कृते वरसंजातासृक्पातो दुःखदो महान् ॥ स्वच्छं पूर्वशरीरं किं प्राप्तवान् कथमुच्यताम् ॥ ३ ॥ शिव उवाच ॥ शृणु वत्स प्रवक्ष्यामि गुरुभक्तिचरित्रकम् ॥ शिष्यं तामागतां दृष्ट्वा शिवशर्मा सुतोषतः ॥ ४ ॥ उवाच तं गणपतिं साधुकृत्यं कृतं त्वया ॥ मम भार्या त्वया दत्ता तेनाहं तुष्ट एव च ॥ ५ ॥ धन्यस्त्वं नरशार्दूल ममाज्ञा पालिता त्वया ॥ एह्येहि वत्स किं ब्रूहि म्लानतां किं समागतः ॥ ६ ॥ इत्युक्तस्तेन गुरुणा हाहेत्युक्त्वा-पतत्क्षितौ ॥ उच्चैरुरोद धिग्धिङ्मां मूर्च्छामाप क्षणाच्च सः ॥ ७ ॥ गुरुपत्नी प्रियं दृष्ट्वा शिष्यं तं भूतले गतम् ॥ प्रेम्णा समीपमागम्य वत्सोत्तिष्ठ भयं त्यज ॥ ८ ॥ इत्युक्त्वालिंगनं चक्रे नयनोद्घाटनं तदा ॥ तां दृष्ट्वैव पुनः प्राह क्षमां कुरु महासति ॥ ९ ॥ साष्टांगं प्रणनामाथ पुत्रस्त्वं जननी मम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा शापं देहि कल्याणि गुरुपुत्र नमोस्तु ते ॥ १० ॥ शिव उवाच ॥ सा प्रेम्णोरौ गृह्य बालं हनुं धृत्वा पतिव्रता ॥ नेत्रे प्रमार्जयामास स्वाचलेन शुचिस्मिता ॥ ११ ॥ किं शोचसि वृथा पुत्र वत्स मां कथया धुना ॥ शिष्य उवाच ॥ अपराधः कृतो देवि तव बंधोर्मया महान् ॥ १२ ॥ गुरोः प्रीतिकरेणाहं सपत्नी ते विनिर्मिता ॥ शरीरं मांसदानेन जर्जरं यममार्गगम् ॥ १३ ॥ मा मां शप खलं दुष्टं पादयोः प्रणतं सदा ॥ मातोवाच ॥ पुत्र भीतिं त्यजाशु त्वं स्वशरीरं विलोकय ॥ १४ ॥ आवां तव परीक्षार्थमेवं जातौ सुरोगिणौ ॥ नाथाज्ञयैव स्त्रीरूपं धृतं जनमनोहरम् ॥ सपत्नी नास्ति मे वत्स गुरुबंधोः सुखं तव ॥ १५ ॥ अन्या नास्त्येव तां पश्येयुक्तो न दृष्टवान् पराम् ॥ कलेवरं पूर्ववच्च संजातं तत्क्षणाच्च तत् ॥ १६ ॥ गुर्वोश्चैवामयो नष्टः शिष्यस्तुष्टिमगाच्च सः ॥ साब्रवीत्पश्य देवान् वै वरं दातुं समागतान् ॥ १७ ॥ वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् ॥ शिवं विरंचिं गोविंदमिंद्रादीन् देवसत्तमान् ॥ १८ ॥ एवं ब्रुवन्त्यां तस्यां तु सर्वे देवाः समागमन् ॥ शिष्यं गणपतिं प्रोचुर्वरं ब्रूहीति सादरम् ॥ १९ ॥ त्वया कृता गुरोरर्चा तथैव तोषिता वयम् ॥ गणपतिरुवाच ॥ भवतां दर्शनेनैव कृतार्थोऽहं न संशयः ॥ २० ॥ भवतां च गुरोरंघ्रौ

भक्तिरस्तु ममाधिका ॥ इममेव वरं याचे ब्रह्मविष्णुमहेश्वराः ॥ २१ ॥ देवा ऊचुः ॥ भो भो गणपते वत्स भक्तिरस्तु च मोक्षदा ॥ अस्मिञ्जन्मनि ते बाल मुक्तिः स्यान्नात्र संशयः ॥ २२ ॥ परं लोकोपकारार्थं त्वया जन्म प्रगृह्यताम् ॥ कलौ कलुषबुद्धीनां गुरुमार्गमजानताम् ॥ २३ ॥ उपदेशेन ज्ञानस्य मंदान् तारय सत्वरम् ॥ गोदातीरे प्रतिष्ठाने ज्ञानमार्गप्रदर्शकाः ॥ २४ ॥ देवांशात्ते भविष्यंति सज्जनाः सत्प्रदायिनः ॥ आदिनाथो गुरुः पूर्वं शिव एव प्रकीर्तितः ॥ २५ ॥ ततो विष्णुस्ततो ब्रह्मा पारंपर्यक्रमादिह ॥ तस्मिन्वंशेऽभवज्जन्म दुहितृवंशजं मतम् ॥ एतज्जनुषि यन्नाम तत्र तद्वै भविष्यति ॥ २६ ॥ कलिनाधर्ममित्रेण नराः सर्वे वशीकृताः ॥ तांस्तारयसि धर्मेण वासस्ते नृहरेरुप ॥ २७ ॥ श्रीलक्ष्मीव्यंकटेशस्य ग्रामे देवालयाभिधे ॥ त्वद्वंशजानां वसतिर्भविष्या जनशर्मदा ॥ २८ ॥ अयं मनुष्य एवेति बुद्धिर्लोकं वारिष्यति ॥ रामकृष्णादिषु यथा तथैव कलिधर्मतः ॥ २९ ॥ तव पूजा करिष्यन्तिशुभाशुभविचारिणः ॥ विद्वांसो वा महामूर्खा वर्णाश्चत्वार एव च ॥ ३० ॥ अन्यजात्यां समुत्पन्नास्तेषु पूज्यतमो भवान् ॥ भविष्यसीह संसारी भार्यापुत्रान्वितः सुखी ॥ ३१ ॥ शिवशर्मन् सत्यलोकं गच्छ त्वं सकुटुंबकः ॥ इत्युक्त्वा ते गता देवाः स्वं स्वं धाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभाकराः ॥ ३२ ॥ गुरुरुवाच ॥ वत्स गच्छ गृहं साधो गणनाथस्य सेवनम् ॥ कुरु सर्वं शुभाधारं
गच्छामि स्वर्गमार्गतः ॥ सकुटुंबपरीवारस्त्वं च कालेन गच्छसि ॥ ३३ ॥ उक्त्वा तं स्वर्गमगमद्विमा-
नारूढ एव सः ॥ पत्नीपुत्रादियुक्तश्च शिष्यो वै गृहमागतः ॥ ३४ ॥ भार्यापुत्रादयः प्राप्ता ईशाज्ञा च
यथाभवत् ॥ तथैव ह्यभवत्सर्वं तीर्थं नरहरेः स्मृतम् ॥३५॥ तत्र कृत्वा सकृत्स्नानं लक्षस्नानफलं लभेत् ॥
यत्किंचिद्दीयते दानं बहुपुण्यप्रदं विदुः ॥ ३६ ॥ दर्शनात्पापनाशः स्यात् स्मरणाच्च पवित्रता ॥ श्रवणा-
त्पठनाच्चास्य ज्ञानोत्पत्तिः प्रजायते ॥ ३७ ॥ एवं ते तीर्थमाहात्म्यं नृहरेः सन्निधौ स्थितम् ॥ तीर्थं
गणेशरूपस्य भक्तविघ्नहरं परम् ॥ ३८ ॥ इति श्रीदेवालयग्राममाहात्म्ये गणेशतीर्थवर्णनं नामाष्टत्रिंशो-
ध्यायः ॥ ३८ ॥ ॥ ७ ॥ ऋषय ऊचुः ॥ सूत नो वद माहात्म्यं नृहरेः पापनाशनम् ॥ कस्मा-
त्स्थितो सरित्तीरे कस्यांशोऽनंतसुप्रियः ॥ १ ॥ सूत उवाच ॥ भवत्प्रश्नानुसारेण जैमिनिः पृष्टवान्
गुरुम् ॥ स्कंदः शिवं विरिंचिं च नारदः परिपृष्टवान् ॥ २ ॥ यथाहुस्ते तथाख्यास्ये शृणुध्वं ऋषिस-
त्तमाः ॥ पुरा कृतयुगे ब्रह्मञ्छिवक्रीडाविघातकः ॥३॥ अग्निर्गिरिजया दत्तं वीर्यं पीत्वा वनं गतः ॥ गंगायां

त्यक्तवांस्तच्च कृत्तिका ह्यपिबन् वरम् ॥ ४ ॥ ताभिस्त्यक्तं शरस्तंबे पुत्रो जातस्तु षण्मुखः ॥ पार्वत्यग्निं
समाहूय प्राह त्वं कृतवानघम् ॥ ५ ॥ दंपत्योर्भंगकृल्लोके लीलाया नारकी भवेत् ॥ तत्पापशमने वह्ने
भूमौ जन्म प्रगृह्यताम् ॥६॥ भवाञ्छिवकुलोत्पन्नः साधूनां रक्षणे रतः ॥ दुष्टानां बुद्धिदाता त्वं गुरुसेवा-
करः स्वयम् ॥ ७ ॥ आदिनाथगुरोरग्ने पारंपर्यक्रमादिह ॥ नाम्ना नरहरिः ख्यातो व्यंकटेशस्य सन्निधौ
॥ ८ ॥ देवाल्याभिधे ग्रामे ह्याम्रासंज्ञासरित्तटे ॥ दक्षिणे वस धर्मात्मन् सर्वलोकशिवाय वै ॥ ९ ॥ पूर्वं
गोदातटे स्थित्वा पश्चाद्वेदान्समाश्रय ॥ त्वद्दर्शनेन सर्वेषां कल्याणं वै भवेद् ध्रुवम् ॥ १० ॥ त्वन्नाम्नैव
च प्रख्यातं तीर्थं नद्यां भविष्यति ॥ त्वद्वंशजातकन्यायाः कुले विख्यातपौरुषः ॥ ११ ॥ शर्मणा जंन-
भद्रेण गणपतिर्भविष्यति ॥ तत्तीर्थं भवतस्तीर्थाद्धनुर्मात्रप्रमाणतः ॥ १२ ॥ द्वे तीर्थं सर्वदे ज्ञेये कन्या-
पुत्रप्रदे ध्रुवम् ॥ स्नात्वा मंत्रं तयोर्जप्त्वा यंत्रं धृत्वा गले सुखम् ॥ १३ ॥ मंत्रं शृणु महाभाग पवित्रं
नृहरेर्वरम् ॥ प्रणवं पूर्वमुच्चार्य वह्निबीजं ततः परम् ॥ १४ ॥ तवर्गपंचमं सेंदुं चंद्रहीनं तदेव तु ॥ यका-
रस्य परं पश्चाद्धरिरित्यक्षरद्वयम् ॥ १५ ॥ ङेतमुच्चार्य वह्निस्त्री मंत्रोऽयं तु नवाक्षरः ॥ तारं गणेशबीजं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च कवर्गस्य तृतीयकम् ॥ १६ ॥ टपंचमं च पाद्यं च स्वरमेकादशं पुरः ॥ हृदयं तु ततः प्रोक्तं मंत्रोऽयं तु नवाक्षरः ॥ १७ ॥ प्रथमस्य तु यंत्रं वै शृणु स्कंद महामते ॥ त्रिकोणं मंडलं पश्चाच्चतुरस्रत्रयावृतम् ॥ १८ ॥ चतुर्द्वारयुतं तच्च मध्ये मंत्रं लिखेत्सुधीः ॥ पूजयित्वा धारयति यो विजयी स्यान्न संशयः ॥ १९ ॥ त्रिकोणं चैव षट्कोणमष्टपत्रं सकर्णिकम् ॥ चतुर्द्वारयुतं कार्यं चतुरस्रत्रयान्वितम् ॥ २० ॥ मध्ये तारं त्रिकोणे च षट्कोणे मंत्रमेव च ॥ चतुःकोणे ध्रुवं स्थाप्य द्वारेषु च तथैव हि ॥ २१ ॥ इदं यंत्रं द्वितीयं हि धारणात्सुखदं परम् ॥ गच्छ वह्ने परं कार्यं लोकरक्षणहेतवे ॥ २२ ॥ इत्युक्तः पार्वतीदेव्या वह्निः सर्वं तथाकरोत् ॥ अध्यायश्रवणात्पापदुःखहानिर्न संशयः ॥ २३ ॥ इति श्रीदेवालयग्राममाहात्म्ये नरहरिगणेशतीर्थवर्णनं नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॐ श्रीशिव उवाच ॥ शृणु पुत्र प्रवक्ष्यामि ह्याम्राया दक्षिणे तटे ॥ हनूमान् सर्वदुःखानां हारकः पूजनाद्भवेत् ॥ १ ॥ हनुमत्संज्ञके तीर्थे हनुमद्दृष्टिगोचरे ॥ नद्यां शनौ स्नानमात्रात्तथार्चाया हनूमतः ॥ २ ॥ सार्धसप्तसमापीडा ग्रहराजस्य नो भवेत् ॥ तत्पृष्ठे च महाकाली दुःखहंत्री प्रतिष्ठिता ॥ ३ ॥ तस्याः सेवाभिषेकश्च

बलिदानं कृतं यदि ॥ अपमृत्युभयं घोरं पूजनान्नाशयिष्यति ॥ ४ ॥ जनपीडा यदोत्पन्ना तदा सेव्या प्रयत्नतः ॥ मंत्रं च जप्त्वा तस्या वै सुखभागिह जायते ॥ ५ ॥ एवं सरित्तीरगताः सर्वे देवा प्रकीर्तिताः ॥ एषां संस्मरणात्सद्यः सर्वपापक्षयो भवेत् ॥ ६ ॥ द्वारयात्रां प्रवक्ष्यामि मोक्षद्वारप्रदायिनीम् ॥ शृण्वन्सुखमयीं लक्ष्मीं लभते नात्र संशयः ॥ ७ ॥ अष्टद्वाराणि ख्यातानि वसुसंख्यासु दिक्षु च ॥ तानि स्थानानि वक्ष्येऽहं विधिं तत्र स एव च ॥ ८ ॥ आश्विने शुक्लपक्षे तु प्रथमे घस्र एव च ॥ प्रातर्नित्यविधिं कृत्वा व्यंकटेशं प्रणम्य च ॥ ९ ॥ प्रार्थयेच्च जगन्नाथं मंत्रेणानेन भक्तितः ॥ दीनपालक देवेश करिष्ये प्रीतये तव ॥ १० ॥ अद्यारभ्य द्वारयात्रां निर्विघ्नं कुरु मे प्रभो ॥ ततो गच्छेत्पूर्वदिशं सिद्धक्षेत्रे प्रभुं शिवम् ॥ ११ ॥ पूजयित्वा प्रार्थयीत तव यात्रा कृता मया ॥ अनया प्रीयतां देवो लक्ष्मीशो धरया सह ॥ १२ ॥ पुनर्गत्वा व्यंकटेशं प्रणम्य विनिवेदयेत् ॥ पूर्वद्वारे कृता यात्रा प्रीयतां भक्तपालक ॥ १३ ॥ गृहं स्वकीयं गत्वा तु हविष्यं भक्षयेन्मुदा ॥ शुचिर्जितेंद्रियो मौनी पादचारी हविष्यभुक् ॥ १४ ॥ कामादिषट्रिपूञ्जित्वा कार्यो यात्राविधिस्त्वयम् ॥ द्वितीया गुग्गुलादेव्यास्तृतीया गणपस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च ॥ १५ ॥ गिरिस्थितस्य सा प्रोक्ता यस्माज्जाता मनोवहा ॥ चतुर्थी तु प्रयागस्य पंचमी राजमं-
दिरे ॥ १६ ॥ वसतिर्यत्र ढुंढेश्च पूर्णा तस्य प्रकीर्तिता ॥ षष्ठी जीवंतिकादेव्या भालदुष्टलिपेर्गमः ॥१७॥
कल्याणकारिणी यात्रा पूर्णनद्याश्च सप्तमी ॥ अष्टमी मल्लहंतुर्वै द्वाराण्येतानि तत्तिथौ ॥ १८ ॥ पूर्वद्वार-
विधिः सर्वद्वारेषु परिकीर्तितः ॥ आदावंते प्रतिदिनं स्नानं पुष्कारिणीजले ॥ १९ ॥ नदीजलेऽथवा स्नानम-
शक्तौ मार्जनं चरेत् ॥ नवम्यां व्यंकटेशस्य पूजनं बहुधाचरेत् ॥ २० ॥ नैवेद्यं भक्तितो दत्त्वा चतुःप्रस्थ-
प्रमाणतः ॥ मंत्रेण प्रार्थयेद्देवं सांजलिस्तं प्रणम्य च ॥ २१ ॥ पूर्णा यात्रा कृता देव प्रीतो भव सुरेश्वर ॥
तव प्रसादात्सफला मम संतु मनोरथाः ॥ २२ ॥ इति प्रार्थ्य गृहीत्वाज्ञां प्रसादं तीर्थमेव च ॥ भोजनं
ब्राह्मणैः कार्यं कल्याणं वै भविष्यति ॥ २३ ॥ इयं यात्रा ध्रुवं पुत्रतनयासुखदाद्भुता ॥ द्वारयात्रोद्भवं
पुण्यं ब्रह्मा न वर्णितुं क्षमः ॥ श्रवणात्फलमस्या वै भवेच्च सुखदं ध्रुवम् ॥ २४ ॥ इति श्रीदेवालयग्राम-
माहात्म्ये चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ स्कंद उवाच ॥ शिव शंकर सर्वात्मन् द्वार-
यात्रा श्रुता मया ॥ परं स्त्रीभिश्च बालैश्च जरठैर्गंतुमक्षमा ॥ १ ॥ बहुदीर्घा कथं कार्या वद त्वं कृपया

मम ॥ कुमारीस्त्रीवटूनां वै वासनाधिकता खलु ॥ २ ॥ तेषां दया समुत्पन्ना मम चित्ते वद प्रभो ॥
यथाहि व्यंकटेशस्य मनस्तोषः प्रजायते ॥ ३ ॥ द्वारयात्राफलं तेषां पार्वतीश नमोऽस्तुते ॥ श्रीशिव
उवाच ॥ धन्यस्त्वं पुत्र लोकोपकारार्थं पृच्छसेऽनघ ॥ ४ ॥ वहनेनापि कर्तव्या ह्यशक्तेन न दोषभाक् ॥
अन्यां त्वां कथयिष्यामि लघ्वीं यात्रां हिताय वै ॥ ५ ॥ ईष्यशुक्लप्रतिपदि प्रातःस्नानं विधाय च ॥
गृहीत्वार्चनसामग्रीं स्नात्वा पुष्करिणीजले ॥ ६ ॥ तस्याः पूजां मुदा कृत्वा व्यंकटेशं प्रणम्य च ॥ द्वार-
यात्रां तु गच्छामि प्रीतिर्भवतु मे त्वयि ॥ ७ ॥ प्रसन्नो भव देवेश दयाकर नमोऽस्तुते ॥ ततो गच्छेद्धनू-
मंतं पूर्वद्वारे विधिः श्रुतः ॥ ८ ॥ अग्नीश्वरं महादेवं द्वितीयायां प्रपूजयेत् ॥ दत्तात्रेयं तृतीयायां चतुर्थ्यां
नाथपूजनम् ॥ ९ ॥ पंचम्यां ललितारूपां सप्तशृंगीं प्रपूजयेत् ॥ षष्ठ्यां जीवंतिकां देवीं सप्तम्यां गणपं
विभुम् ॥ १० ॥ अष्टम्यां शीतलां देवीं सर्वस्फोटविनाशिनीम् ॥ व्यंकटेशेन चाज्ञप्ता चेशानद्वारगाभ-
वत् ॥ ११ ॥ स्फोटरोगे समुत्पन्ने सर्वैः पूज्या सुखाय सा ॥ १२ ॥ एवमष्टदिनं कृत्वा नवम्यां श्रीशपूज-
नम् ॥ यात्रा पूर्णा तु गोविंद जाता मे त्वत्प्रसादतः ॥ १३ ॥ नमस्कृत्य गृहं गत्वा भोजनं ब्राह्मणैः सह ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वोत्सवं समागच्छेन्मंडपोद्धरणाय वै ॥१४॥ अशनं मंडपे दत्ते पश्चाद्वा पूर्वमेव वा ॥ यथारुचि तथा कार्यं भक्तिरेव सुतुष्टिदा ॥ १५ ॥ संततिः सौख्यमारोग्यं सौभाग्यं पतितुष्टिता ॥ सर्वं भवति चैवात्र यात्रया द्वारसंज्ञया ॥ १६ ॥ श्रवणादपि सौख्यं स्याद्व्यंकटेशप्रियो भवेत् ॥ तस्मात्तत्प्रीतये कार्या यात्रा सर्वात्मनैव हि ॥१७॥ इति श्रीदेवालयग्राममाहात्म्ये लघुद्वारयात्रावर्णनं नामैकचत्वारिंशोऽध्यायः॥४१॥ ॐ स्कंद उवाच ॥ संदेहं हर मे शर्व चित्ते जातं कुतूहलम् ॥ कथितं द्वारयात्रायां दत्तात्रेयार्चनं त्वया ॥ १ ॥ दत्तात्रेयः कथं तत्रानसूयानंदवर्धनः ॥ त्रिमूर्तिस्त्रिगुणाधीशो भक्तपालनतत्परः ॥ २ ॥ तस्य वृत्तं यथाजातं मा त्वं कथय भो पितः ॥ यस्य स्मरणमात्रेण भूतप्रेतादिनाशनम् ॥ ३ ॥ श्रीशिव उवाच ॥ शृणु स्कंद प्रवक्ष्यामि दत्तात्रेयकथानकम् ॥ शृणुयाद्वा पठेद्वापि तस्यात्रेयः प्रसीदति ॥ ४ ॥ स्मर्तृगामी स भगवान् भक्तवांछाप्रपूरकः ॥ ग्रामे देवालये यस्य वसतिः सर्वदा सदा ॥ ५ ॥ व्यंकटेशागमात्पूर्वं गुप्तरूपेण संस्थितः ॥ अद्यापि व्यक्तता तस्य नास्ति सत्यं ब्रवीमि ते ॥ ६ ॥ भक्तानां दर्शनं नित्यमभक्तानां कदापि न ॥ बहुकालांतरे तस्य मूर्तिरूपेण व्यक्तता ॥ ७ ॥ दक्षिणद्वारगा यात्रा

यत्र तत्र भविष्यति ॥ तस्य स्थानस्य महिमा भविष्यः कथितस्तव ॥८॥ ये तस्य भक्ता विप्रेंद्र तेऽपि सर्वमहत्तमाः ॥ श्रीव्यंकटेशो लक्ष्मीशः स्वांशं दत्तं जगद्गुरुम् ॥ ९ ॥ स्वालये स्थापयामास मोक्षलक्ष्म्या समन्वितम् ॥ त्रिगुणं षड्भुजं देवं वदनत्रयशोभितम् ॥ १० ॥ मध्ये नारायणमुखो वामे तु चतुराननः ॥ दक्षिणे शिववक्त्रश्च शोभते स्वेच्छया परः ॥ ११ ॥ तस्य माहात्म्यमतुलं श्रूयतां भो मुनीश्वराः ॥ यस्य भक्तैर्महासिद्धैर्यत्कृतं तच्छ्रवे सुखम् ॥१२॥ दत्तभक्तकथां दिव्यां शृणु पुत्र सुखाप्तये ॥ सह्याद्रितटभूदेशे मातापुरमिति श्रुतम् ॥ १३ ॥ नगरं तत्र विप्रोऽभूद्विष्णुदत्तेति विश्रुतः ॥ पत्नी तस्य सुशीलेति विख्याता पतिदेवता ॥ १४ ॥ तद्गृहेऽश्वत्थवृक्षेऽभूद्राक्षसोऽतिभयानकः ॥ नित्यं भूतबलिं तस्य खादन्नास्ते द्रुहन् कविः ॥ १५ ॥ अन्यान्पीडयते क्वापि न तद्गेहे कदाचन ॥ तस्योपकृतमर्धं तु तस्य बुद्धिरभूत्किल ॥ १६ ॥ दर्शयामास चात्मानं विप्रायोवाच मंजुलम् ॥ विप्रवर्य त्वया दत्तं भुजऽन्नं प्रत्यहं विभो ॥ १७ ॥ तुष्टोऽहं प्रतिकर्तुं च समर्थोऽस्मि तदादिश ॥ स्वपत्न्यभिमतेनाह विप्रस्तं दर्शयस्व भो ॥ १८ ॥ दत्तदेवं महात्मानं यूयं हि ज्ञानवित्तमाः ॥ स उवाच त्रिवारं ते संदेशे योगिनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरुम् ॥१९॥ शक्तो यदि तमीशानं विज्ञातुं त्रिविधाकृतिम् ॥ विचित्रं रूपमास्थाय स नित्यमिह रंस्यति ॥ २० ॥ तथेत्युक्तः स तं देवं मृगयन्सर्वतो दिशम् ॥ बभ्रामाथ कदाचित्तं देवं विज्ञाय सत्वरः ॥ २१ ॥ एहि विप्रेति तं प्राह सोऽपि शीघ्रं तमन्वियात् ॥ मद्यमांसापणे कश्चिन्नग्न उन्मत्तवेषधृक् ॥ २२ ॥ विचरत्याकरालास्यो मदविह्वललोचनः ॥ मद्यदिग्धतनूदेशो मक्षिकाभिरुपद्रुतः ॥ २३ ॥ सोऽयमित्याह तं रक्षः शंकितश्च द्विजोत्तमः ॥ किंवा भवेन्न वा सोऽयं दुराचारोऽयमीदृशः ॥ २४ ॥ किं करोमीति यावत्स ह्रदि चिन्तयते द्विजः ॥ तावद्दूरं गतः सोऽभूददृश्यश्च महेश्वरः ॥ २५ ॥ परागत्यागतो विप्रो राक्षसोऽप्याह विस्मितः ॥ किं कृतं मंदभाग्येन त्वया विप्रातिकुत्सितम् ॥ २६ ॥ पुरैव शिक्षितोऽसि त्वं कथं विस्मृतवानसि ॥ संतापस्ते न कार्योऽहं पुनस्तं दर्शये विभुम् ॥ २७ ॥ इत्युक्त्वा पुनरेवासौ कदाचित् सत्वरोऽब्रवीत् ॥ एहि शीघ्रं महादेवः सन्निधौ चरति द्विजः ॥ २८ ॥ स तथैव व्ययात्तावत्स्मशाने धूलिधूसरः ॥ श्वभिः परिवृतः कश्चित्कपाली रक्तलोचनः ॥ २९ ॥ अस्थिकुंडलकेयूरमालाकंकणभूषणः ॥ करस्थेनास्थिना विप्रं ताडयामास मन्युमान् ॥ ३० ॥ सोऽतिभीतः

स्खलन्मुह्यन्प्राधावज्जीवितेच्छया ॥ रक्षो दूरं च संदृश्य तदवस्थं द्विजोत्तमम् ॥ ३१ ॥ दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥ प्रत्युवाच हसन्सोऽपि गृहमायात्सुलज्जितः ॥ ३२ ॥ एकदा पुनरेवासौ राक्षसोऽथाजुहाव तम् ॥ एहि विप्र प्रतिज्ञा मे सफलास्तु त्रिधा कृता ॥ ३३ ॥ पत्न्यापि शिक्षितोऽगच्छत्पृष्ठतस्तस्य चिंतयन् ॥ तृतीयं दर्शितेऽनेन विचिकित्सा भवेद्यदि ॥ ३४ ॥ दुर्भगोऽस्ति न मे तुल्यस्त्रिषु लोकेषु कुत्रचित् ॥ किं करोमि कथं धैर्यं भवेन्मम सुदुर्मतेः ॥ ३५ ॥ यद्यप्यनर्गलं रूपं यदि वा ताडयिष्यति ॥ तथापि चरणावस्य न त्यजेऽहं कथंचन ॥ ३६ ॥ इति गच्छ बहिर्ग्रामान्श्वपचानां स पक्वणे ॥ मृतरासभमांसानि कश्चिदुत्कृत्य यच्छति ॥ ३७ ॥ श्ववायसशृगालेभ्यः सोऽसावित्याह राक्षसः ॥ निवृत्तो दूरतस्तस्य भिया सोऽथ द्विजोत्तमः ॥ ३८ ॥ धैर्यमालंब्याभिमुखो गत्वा पादग्रहोऽभवत् ॥ पदा स ताडयामास बहुवारं तथाह्यमुम् ॥ ३९ ॥ नैव मुंचत्यसौ सोऽथ तन्मांसेनाह तच्च तम् ॥ सर्वांगो मांसलिप्तोऽभून्न मुमोच तथाप्यमुम् ॥ ४० ॥ ततो ब्रवीत्किमर्थं रे दुःखदस्त्वमुपस्थितः ॥ वधिष्ये त्वामहं मूढ किं ते कृत्यं मया सह ॥ ४१ ॥ तथापि न मुमोचामुं स द्विजः स्वार्थ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साधकः ॥ ततः प्रसन्नो भगवान् विप्रमाह दयापरः ॥ ४२ ॥ किं कार्यं कुत्सितेनास्ति तृतीयं स त्वमा-
गतः ॥ ततोऽभिवाद्य देवेशं हर्षनिर्भरमानसः ॥ ४३ ॥ यावद्विलोकते तावन्न मांसं पक्वणं न च ॥
शुचिं शान्तं तमासीनं मुनिं नियतमानसम् ॥ ४४ ॥ दृष्ट्वा पुनः प्रणम्येशमानंदाच्चाविलेक्षणः ॥ गद्गदा-
क्षरमाहेदं धन्योऽहं जगतीतले ॥ ४५ ॥ धन्या मे जननी लोके धन्योऽसौ जनकः कविः ॥ यत्प्रसादा-
दहं प्राप्तो योगिवंद्यपदांबुजम् ॥ ४६ ॥ इति प्रणयसंबद्धं विप्रं प्राह कृपांबुधिः ॥ किं कार्यं तव मे कार्यं
कृतमित्यवगम्यताम् ॥ ४७ ॥ उवाचाद्य स मे गेहे पितुः श्राद्धं प्रवर्तते ॥ निमंत्रयामि देवेश प्रसादः
क्रियतामिति ॥ ४८ ॥ तथेत्याह त्वयाग्रे भो गम्यतां पृष्ठतस्त्वहम् ॥ सुस्नातः शुचिरेष्यामि सफल-
स्ते सुविक्रमः ॥ ४९ ॥ एवमुक्तस्त्वरायुक्तः प्रियामाह शुचिस्मितः ॥ निमंत्रितो मे देवेशः पाकशुद्धि-
र्विधीयताम् ॥ ५० ॥ दृष्ट्वा सापि तथा चक्रे तावदायात्स विश्वदृक् ॥ पुरैव विप्रः सुस्नातो पाद्यं तस्मै
न्यवेदयत् ॥ ५१ ॥ अन्ये निमंत्रिताः के स्युर्मादृशा इत्यपृच्छत ॥ त्वत्समोऽन्योऽस्ति देवेशेत्युक्त्वा
सा पतिदेवता ॥ ५२ ॥ बहिरागत्य मध्यस्थं व्योमगं रविमैक्षत ॥ ५३ ॥ नमः सवित्रे जगदेकबंधवे

सर्वात्मने सर्वधियां च साक्षिणे ॥ अचेतनं देवमिदं सचेतनं विधासि विश्वं स्वकरैर्विप्रभो ॥ ५४ ॥
विज्ञापनीयं तव देव किं यत्सर्वात्मनः सर्वदृशः परस्य ॥ यो मायया मां विविधं विकारं विधाय विष्टः
सकलांतरात्मा ॥ ५५ ॥ तत्तस्याः प्रार्थनां देवः श्रुत्वागत्य उपस्थितः ॥ मूर्तिमान् किं करोमीति प्राह
सौम्याकृतिः स्वयम् ॥ ५६ ॥ साह श्राद्धे द्वितीयस्त्वं भव विप्रो मयार्थितः ॥ तथेति पाद्यमादाय
स्वासने सुस्थितस्तदा ॥ ५७ ॥ योगीशोऽप्याह द्वौ जातौ तृतीयो नैव दृश्यते ॥ देवहीनं भवेच्छ्राद्ध-
मित्युक्ता सा पुनः सती ॥ ५८ ॥ विहारं स्वं समाविश्य प्रार्थयामास स्वं सुरम् ॥ गेहेश्वर समुत्तिष्ठ देहे-
नान्येन सत्वरम् ॥ ५९ ॥ श्राद्धं भोक्तुं समासीनो भगवांस्त्वां प्रतीक्षते ॥ तृतीयं स समानं भो मन्यते
त्वां सुरोत्तम ॥ ६० ॥ नमस्ते सुरवर्याय वैश्वानर हविर्भुज ॥ त्वं मुखं सर्वदेवानां धूमकेतोऽनुगृहाण माम्
॥ ६१ ॥ नमो गृहपते तुभ्यं कर्माध्यक्ष नमोऽस्तु ते ॥ एवं संप्रार्थितो देवः कुंडादेकाद्विनिर्गतः ॥ ६२ ॥
अंशेनान्येन कुंडेऽपि धिष्ठितः सुरसत्तमः ॥ आगत्य स्वासने पाद्यमादायोपाविशत्तदा ॥ ६३ ॥ भग-
वांस्तत्समालोक्य तस्या माहात्म्यमुत्तमम् ॥ हृदि विस्मयमापन्नः परितोषं परं गतः ॥ ६४ ॥ सूर्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्त्रं तदा विप्रो देवे विप्रा मुनीश्वरम् ॥ पैत्र्यं कर्म यथान्यायं श्राद्धं प्रावर्तयत्तदा ॥ ६५ ॥ देवास्त्रयोऽथ विधिवद्भुक्त्वा श्राद्धं यदा परम् ॥ तृप्ताः स्मेत्यूचुरव्यग्रास्तुष्टाः श्राद्धेन तस्य ते ॥ ६६ ॥ आचान्तेष्वक्षयं दत्त्वा समाप्येतौ च दंपती ॥ साष्टांगं प्रणिपत्याग्रे प्रांजली तावुभौ स्थितौ ॥ ६७ ॥ विष्णुदत्त उवाच ॥ दत्तात्रेयं हरिं कृष्णमुन्मादं प्रणतोऽस्म्यहम् ॥ आनंददायकं देवं मुनिबालं दिगंबरम् ॥६८॥ पिशाचरूपिणं विष्णुं वंदेऽहं ज्ञानसागरम् ॥ योगिनं भोगिनं नग्नमनसूयात्मजं कविम् ॥ ६९ ॥ भोगमोक्षप्रदं वंदे सर्वदेवस्वरूपिणम् ॥ ऊरुक्रमं विशालाक्षं परमानंदविग्रहम् ॥ ७० ॥ वरदं देवदेवेशं कार्तवीर्यवरप्रदम् ॥ नानारूपधरं ह्यद्यं भक्तचिंतामणिं गुरुम् ॥ ७१ ॥ विश्ववंद्यपदांभोजं योगिहृत्पद्मवासिनम् ॥ प्रणतार्तिहरं गूढं कुत्सिताचारचेष्टितम् ॥ ७२ ॥ मिताचारं मिताहारं भक्ष्याभक्ष्यविवर्जितम् ॥ प्रमाणं प्राणिनिलयं सर्वाधारं नतोऽस्म्यहम् ॥ ७३ ॥ सिद्धसाधकसंसेव्यं कपिलं कृष्णपिंगलम् ॥ विप्रवर्यं वेदविदं वेदवेद्यं वियत्समम् ॥ ७४ ॥ पराशक्तिपदाश्लिष्टं राजराज्यप्रदं शिवम् ॥ शुभदं सुंदरग्रीवं सुशीलं शांतविग्रहम् ॥ ७५ ॥ योगिनं रामया स्पृष्टं रामारामं रमाप्रियम् ॥ प्रणतोऽस्मि महादेवं शरण्यं भक्तवत्स-

लम् ॥ ७६ ॥ वीरं वरेण्यमृषभं वृषाचारं वृषप्रियम् ॥ अलिप्तमनघं मेध्यमनादिमगुणं परम् ॥ ७७ ॥ अनेकमेकमीशानमनंतमनिकेतनम् ॥ अध्यक्षमसुरारार्तिं शमं शान्तं सनातनम् ॥ ७८ ॥ गुह्यं गभीरं गहनं गुणज्ञं गह्वरप्रियम् ॥ श्रीदं श्रीशं श्रीनिवासं श्रीवत्सांकं परायणम् ॥ ७९ ॥ जपन्तं जपतां वंद्यं जयन्तं विजयप्रदम् ॥ जीवनं जगतः सेतुं जानानं जातवेदसम्॥ ८० ॥ यज्ञमीज्यं यज्ञभुजं यज्ञेशं याजकं यजुः ॥ यष्टारं फलदं वंदे साष्टांगं परया मुदा ॥ ८१ ॥ श्रीगुरुरुवाच ॥ इत्युक्त्वा साऽभवत्तूष्णीं देवस्तुष्टोऽब्रवीदिदम् ॥ श्रीदत्तदेव उवाच ॥ द्विजवर्य प्रसन्नोऽस्मि वरं वरय सुव्रत ॥ ८२ ॥ मम भक्तस्य ते विप्र वांछितं प्रददाम्यहम् ॥ दिव्यमष्टोत्तरशतं नाम्नां यत्ते प्रकाशितम् ॥ ८३ ॥ स्तोत्रं पुरातनं तेन तोष्यते यः समाहितः ॥ मत्प्रियः स भवेन्नित्यं तथा योगरतः सदा ॥ ८४ ॥ सुशीलेयं तव सती गुणज्ञा पतिदेवता ॥ दृष्टश्चास्याः प्रभावोऽपि प्रत्यक्षं तपसो मया ॥ ८५ ॥ कल्याणगुणसंपन्ना सर्वविद्यानिधिर्भवान् ॥ यादृशीयं तव सती तादृशश्च भवान् पतिः ॥ ८६ ॥ समशीलौ युवां मह्यं परमाह्लाददायकौ ॥ यावज्जीवं महाभागौ सुखिनौ योगतत्परौ ॥ ८७ ॥ ममानुग्रहलेशेन परमानंदभाजनौ ॥ योगपारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परात्मानं संप्राप्य सुखिनो चिरम् ॥ ८८ ॥ अंते च परमानंदस्वरूपं मेऽभिधास्यथ ॥ चरमं जन्म वेदं वा प्रसादो यत्र मे भवेत् ॥ ८९ ॥ द्विजवर्य गृहाणेमां मंत्रोपनिषदं शुभाम् ॥ यं यं त्वमनुगृह्णासि जह्येमां मनुजं सुरम् ॥ ९० ॥ ऐश्वर्यमायुरारोग्यं धनं धान्यं यशः श्रियम् ॥ पुत्रं राजमनौपम्यं यद्यदिच्छेच्च कामितम् ॥ ९१ ॥ सर्वं संप्राप्स्यतेऽचिन्त्यं नात्र कार्या विचारणा ॥ पितरस्ते दिवं प्राप्ता ब्रह्मलोकं सनातनम् ॥ ९२ ॥ श्राद्धेनानेन विप्रेंद्र विमुक्ताः कर्मपाशतः ॥ ब्राह्मणाः सहिते तत्र मुक्तिं यास्यंति दुर्लभाम् ॥ ९३ ॥ राक्षसस्तव गेहस्थो महोपकृदयं कविः ॥ उच्छिष्टपात्रसिक्थानि भुक्त्वा यातु दिवं सुधीः ॥ ९४ ॥ श्रीगुरुरुवाच ॥ इत्युक्त्वा देवदेवेशो विप्रकर्णेऽजपत्तदा ॥ महोपनिषदं दिव्यां सोऽभूत्सिद्धो महामतिः ॥ ९५ ॥ सह पत्न्या तपश्चक्रे भगवंतं परं गुरुम् ॥ शिरस्याधत्त देवेशो तयोः स्वं करपंकजम् ॥ ९६ ॥ ततश्चांतर्दधे देवो विद्युत्पुंज इव क्षणात् ॥ प्रसन्नः सविता तस्मै दिव्यां सिद्धगतिं ददौ ॥ ९७ ॥ विमानं कामगं चापि दर्शनं स्मृतिमात्रतः ॥ ततो व्योमारुहत्क्षिप्रं सह पत्न्याभिवंदितः ॥ ९८ ॥ स स्तुतश्च वरानस्मै ददौ प्रीतो गृहेश्वरः ॥ यदा यदा त्वं कल्याणि मम प्रत्यक्षतां शुभे ॥ ९९ ॥ वांछसे दर्शयाम्यद्धा यत्तेऽभीष्टं करोम्यहम् ॥ विप्रवर्य त्वया सम्यङ् नित्यमाराधितो यथा ॥ १०० ॥ कर्मसिद्धिस्तथा सर्वा शंसन्ते तव मानद ॥ तेजीयांश्च दुराधर्षो ह्यनुल्लंघितशासनः ॥ १०१ ॥ भविष्यसि सुखी नित्यं सुखदः सर्वदेहिनम् ॥ इत्युक्त्वा तं गृहपतिः स्वकीयं स्थानमाविशत् ॥ १०२ ॥ रक्षोऽप्युच्छिष्टभुग्दिव्यं यानमारुह्य तं द्विजम् ॥ प्रीत्यामंत्र्य दिवं प्राप्तः प्रसादात्परमात्मनः ॥ १०३ ॥ इति श्रीदेवालयग्राममाहात्म्ये श्रीदत्तवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ श्रीशिव उवाच ॥ कस्यचिद्द्विजमुख्यस्य भार्यातीव मनोहरा ॥ तस्य किंचित्समुत्पन्नं कार्यं यात्राविदूरतः ॥ १ ॥ स विधाय गृहे रक्षां शिक्षित्वा च निजां सतीम् ॥ ग्रामान्तरमगात्तस्य मासमात्रं गतं तदा ॥२॥ पिशाचः कोऽपि तद्देशे झुटिंग इति विश्रुतः ॥ कामातुरो मृतः पूर्वं दुर्जनो दुर्मदः खलः ॥ ३ ॥ दुराधर्षस्तथान्येषां पिशाचानां च दुःखदः ॥ मंत्रवादिभिरप्युग्रो दुर्ग्राह्यो दुरतिक्रमः ॥ ४ ॥ सुरूपां स्त्रियमालोक्य छलेन च बलेन च ॥ आनीय स्ववशं भुंक्ते नानारूपो हि मायया ॥ ५ ॥ तामप्यस्य विशालाक्षीं वीक्ष्य भार्यामनिंदिताम् ॥ कथं मे वशमायातीत्येवं चिंतयते सदा ॥ ६ ॥ तदंतरमनुप्राप्य तस्मिन्नेव दिने कुधीः ॥ वेषं तस्य विधायाग्र्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायाह्ने गृहमन्वियात् ॥ ७ ॥ तमविज्ञाय भर्तारं मत्वा सा सुभगा ददौ ॥ पाद्यमाचमनीयं च कथमाग-
मनं त्विति ॥ ८ ॥ पप्रच्छ तमथोवाच स दुष्टस्तामनिंदिताम् ॥ यदर्थं यत्समीपं च गतोऽहं स द्विजो
मम ॥ ९ ॥ मार्गे मिलित्वा एवासौ मया पृष्टोऽब्रवीदिदम् ॥ इदानीं न हि ते कार्यं माससमात्रं कथंचन
॥ १० ॥ इत्युक्तः सन्निवृत्तोऽहं स्वगृहं पुनरागतः ॥ इत्युक्ते साभवत्तूष्णीं तस्य चेष्टामजानती ॥ ११ ॥
सोऽपि सुप्तः सुखं रात्रौ वशमानीय तां सतीम् ॥ बुभुजे स्वेच्छया हृष्टः सातिदुःखान्विताभवत् ॥ १२ ॥
अतिधार्ष्ट्यं बलं चास्य भोगसामर्थ्यमेव च ॥ अन्यान्बहुविकारांश्च वैलक्षण्यं तथाविधम् ॥ १३ ॥ वि-
ज्ञाय दुःखिता किंचित् वक्तुं नाशकदप्रियम् ॥ संदिग्धचित्ता सा तस्मिन् किमिदं स्वित्कथं त्विति
॥ १४ ॥ प्रत्याख्यातुं च सा बाला न शशाक मनस्विनी ॥ मासेन स समायातो दृष्ट्वा तं सदृशाकृ-
तिम् ॥ १५ ॥ विस्मयं परमापन्ना भार्या पप्रच्छ किंत्विति ॥ तया कथितमाकर्ण्य किं कार्यमधुना
मया ॥ १६ ॥ धनं गृहं च मे पत्नी गृहीत्वायं सुखी स्थितः ॥ स्वमित्रबंधुवर्गेषु सभ्येषु च न्यवेदयत्
॥ १७ ॥ तेनैव शक्ताः सर्वत्र वक्तुं वा किंचिदप्रियम् ॥ उभयोरपि संदेहात्तूष्णीमासन्सुविस्मिताः ॥ १८ ॥

एवं विवदमानौ तौ ग्रामाद्ग्रामं पुरात्पुरम् ॥ परस्परं विजिगीषू नगरं तच्च जग्मतुः ॥ १९ ॥ विष्णुदत्तो
महाभागो यत्र तिष्ठति स प्रियः ॥ बांधवास्तस्य पक्षीयाः श्वशुरः शालकादयः ॥ २० ॥ सा च पत्नी
न जानन्ती दृष्ट्वा भावैकरूपिणौ ॥ तया सहैव ते सर्वे जग्मुर्निश्चयकारणात् ॥ २१ ॥ तौ चागत्य गृहं
तस्य विष्णुदत्तस्य योगिनः ॥ नमस्कृत्य यथा वृत्तं निवेद्याग्रे व्यवस्थितौ ॥ २२ ॥ सर्वज्ञः स समालो-
क्य भूतमेकं तथापरम् ॥ मानुषं किमिदानीं मे कृत्यमस्मिन्बले भवेत् ॥ २३ ॥ निश्चित्येति मनस्येव
तावाह सदसि ध्रुवम् ॥ नीतिमार्गप्रकाशार्थं क्रममुक्तिं प्रबोधयन् ॥ २४ ॥ शीलरूपवयोऽवस्थास्वरवर्णा-
कृतिर्गतिः ॥ एकरूपमिवाभाति नाम गोत्रं क्रियादिकम् ॥ २५ ॥ जयोऽजयो वाप्युभयोर्ज्ञेयोऽस्याभि-
र्भवेत्कथम् ॥ संज्ञार्थं यद्विधा स्यामः क्षंतव्यं तद्विजोत्तमैः ॥ २६ ॥ एवमुक्त्वा तयोर्बाले तत्तमुद्रां विल-
क्षणाम् ॥ समंत्रां प्रददौ योगी यथा न स्याद्विपर्ययः ॥ २७ ॥ पृथगानीय तत्रैकं दूरे चान्यं निधाय
च ॥ तव गेहे धनं विप्र कुप्यभाण्डांशुकादिकम् ॥ २८ ॥ प्रकाशं चाप्रकाशं च लक्षणं च स्त्रियास्त-
था ॥ अन्यच्चापि भवेद्वस्तु तत्समाख्यातुमर्हसि ॥ २९ ॥ तद्विज्ञाय विधास्यामि स्वामित्वं चापरोऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा ॥ तेनोक्तं लेखयित्वान्यं पृष्ट्वा तच्च विलिख्य सः ॥ ३० ॥ नीत्वा दूरे च तौ पश्चात्तामपृच्छदनिंदिताम् ॥ शरीरस्थं च गेहस्थं लक्षणं सर्वं देहि मे ॥ ३१ ॥ लिखित्वा तत्समालोक्य सत्यं चेतरमेव च ॥ निश्चित्य पुनरानीय तानाह प्रहसन्निव ॥ ३२ ॥ पंचक्रोशात्मकमिदं क्षेत्रं कृत्वा प्रदक्षिणम् ॥ शीघ्रमागम्यतां चोभौ प्रथमो विजयी भवेत् ॥ ३३ ॥ यानि लिंगानि देवानां मार्गस्थानां भवन्ति हि ॥ वक्तव्यानि भविष्यन्ति चोभाभ्यां वै पृथक् पृथक् ॥ ३४ ॥ इत्युक्तौ तौ विनिर्गत्य गतौ शक्त्या पिशाचकः ॥ दण्डार्धेन समागत्य सर्वमाह जयाशया ॥ ३५ ॥ विप्रोऽप्यागत्य मध्याह्ने तदेवाह यथास्थितम् ॥ पुनराह स योगी तौ चित्ते कृत्वा पुरोदितम् ॥ ३६ ॥ योगिनोऽस्मिन्गिरौ सिद्धा यावन्तः संति विश्रुताः ॥ परिवृत्य गिरिं नत्वा पृष्ट्वा गोत्रं सनामकम् ॥ ३७ ॥ ब्रूतं शीघ्रं समागत्य प्रथमो विजयी भवेत् ॥ इत्युक्तौ तौ तथा चक्रे मुहूर्तेन पिशाचकः ॥ कथयामास चागत्य सर्वं तच्च यथामति ॥ ३८ ॥ विप्रो रात्रौ याममात्रे दुःखादागत्य चाब्रवीत् ॥ न मे दृष्टा महान्तस्ते नामगोत्रं कुतो मम ॥ ३९ ॥ परिवृत्य गिरिं सत्यमागतोऽहं द्विजोत्तम ॥ मनस्येव च सत्सर्वं निधायाह पुनः कविः ॥ ४० ॥ परीक्षैका च शिष्टा मे

तां विधाय जयो भवेत् ॥ इत्युक्त्वा लोहकरकं समानाय्याब्रवीदिदम् ॥ ४१ ॥ मुखेनाविश्य नालेन निर्गत्यैषा प्रगृह्यताम् ॥ इत्युक्ते त्वरया भूतः सूक्ष्मरूपी समाविशत् ॥ ४२ ॥ मुखं नालं च योगीशो मंत्रेणामंत्रयत्तदा ॥ कीलयामास दुःखं तु जनोपद्रवकारकम् ॥ ४३ ॥ जहर्षुरुच्चैस्ते सभ्या विप्रोऽसौ सा वधूस्तथा ॥ नमश्चक्रुर्महाप्राज्ञं नीतिज्ञं धर्मतत्परम् ॥ ४४ ॥ स उवाच सदस्यां तां शृणुतेदं वचं मम ॥ दृष्टमात्रो मया ज्ञातः खलोऽयं दुःखदः सताम् ॥ ४५ ॥ अनित्यानि गृहे तस्मिन्नपवादो भवेद्ध्रुवम् ॥ इति मेऽयं कृतो यत्नो जनसंदेहभेदकः ॥ ४६ ॥ प्रथमे किंचिदाभासो द्वितीये सविशेषकः ॥ तृतीये संशयश्छिन्नो बंधनं तु चतुर्थके ॥ ४७ ॥ यथाज्ञं पुरुषं शास्त्रं क्रमबोधं विधाय च ॥ दग्ध्वा समूलमज्ञानं वेदान्तैर्विश्रमं व्रजेत् ॥ ४८ ॥ तथेयं प्रक्रिया विप्रा नीतिज्ञैः संप्रकाशिता ॥ मयापि दर्शिता युष्मत्संदेहविनिवारिणी ॥ ४९ ॥ इति देवालयग्राममाहात्म्ये त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ शृणुष्वान्यं तथैवेंद्र तस्मिन्नेव पुरोत्तमे ॥ तनैव योगिवर्येण कृतं निर्णयमादरात् ॥ १ ॥ प्रतिष्ठाने पुरा विप्रो ज्ञानविज्ञानपारगः ॥ जन्मनैव समुत्पन्नः पैशाचपदवीमियात् ॥ २ ॥ जनसंगाद्भृशं भीतो विषयेभ्यस्तथैव च ॥ सर्व-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञोऽपि तथा चक्रे चेष्टां मानभिया हि सः ॥ ३ ॥ पिता माता च तं मत्वा जन्मनैव पिशाचकम् ॥ प्रतीकाराय तौ यत्नं कुर्वन्तौ सुतवत्सलौ ॥ ४ ॥ मंत्रौषधधनत्यागतीर्थयात्रासुरार्चनम् ॥ व्रतोपवासनियमं दयाधर्मजपादिकम् ॥ ५ ॥ कृतेऽपि सर्वथा यत्ने प्रकृतिं न ययौ सुतः ॥ मलं मूत्रं तथाभक्ष्यं पानमन्नं च जल्पनैः ॥ तिष्ठन्नेव सदा कुर्याद्वाच्यावाच्यं न विद्यते ॥ ६ ॥ व्रतं तथैव ते दध्युर्न संध्या नाग्निसेवनम् ॥ न सावित्र्या जपो नापि वदेच्छुद्धं तथाक्षरम् ॥ ७ ॥ माहात्म्यं तस्य चाश्रुत्य सुतमादाय दंपती ॥ नगरं तत्समायातौ नमस्कृत्याग्रतः स्थितौ ॥ ८ ॥ सर्वमाश्राव्य तत्तस्य पूर्वकर्मात्मजस्य च ॥ किंभवेदिति विज्ञाय विधेर्ह्यस्य प्रतिक्रियाम् ॥ ९ ॥ एक एव सुतोऽस्माकं जीवनं देहि नौ विभो ॥ इति विज्ञापितो विद्वांस्तमाज्ञाय महाधियम् ॥ १० ॥ विश्रम्यतामिति प्राह तिष्ठत्वत्र सुतो हि वाम् ॥ इत्युक्तौ तौ गतौ भोक्तुं स उवाच शिशुं तदा ॥ ११ ॥ कस्त्वं ब्रह्मन् किमायातः किं ते कार्यं करोपि किम् ॥ गम्यतां स्वपितुर्गेहं भुज्यतां च यथासुखम् ॥ १२ ॥ मया वा किं विधातव्यं त्यज चेष्टां वदाधुना ॥ इत्युक्तस्तमुवाचेदं स योगी योगिनं तदा ॥ १३ ॥ किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥ आत्मना पूरितं विश्वं महाकल्पांबुना यथा ॥ १४ ॥ सोऽहं सदानंदमयः किं भोक्तव्यं भवेन्मम ॥ अन्नपानमहं ब्रह्मन्न मंत्रोऽन्यन्मनागपि ॥ १५ ॥ इत्युक्ते तं समालिंग्य स उवाच पुनर्वचः ॥ यद्येवं तर्हि वाचारे को दोषस्ते भविष्यति ॥ १६ ॥ जीवन्मुक्तः सुखं तिष्ठ शिक्षयन् कुरु कर्म च ॥ शंकाबंधः पुनर्मे स्यादिति चेत्तद्ब्रवीम्यहम् ॥ १७ ॥ देहाभिमानजो बंधो मुक्तिस्तत्त्याग उच्यते ॥ अहं ममेति बंधस्य नाहं न च ममेति च ॥ १८ ॥ स्वरूपं विद्धि योगीश न संबंधोऽस्ति तेऽत्र भोः ॥ मानावमानजो दोषोऽप्यभिमानवतो भवेत् ॥ १९ ॥ वासना विषयाणां च विक्रियाभिर्हि मानजा ॥ अहमित्यन्यथाबुद्धेः सर्वमेतन्न संशयः ॥ २० ॥ तमेकं यः परित्यज्य वर्तते कर्मवर्त्मनि ॥ मूढोऽपि न स बध्येत किं पुनस्त्वादृशो बुधः ॥ २१ ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ बंधस्य विषयासंगि मुक्ते निर्विषयं मनः ॥ २२ ॥ परव्यसनिनी नारी व्यग्रापि गृहकर्मणि ॥ तदेवास्वादयत्यंतर्नवसंगरसायनम् ॥ २३ ॥ एवं तत्वे परे शुद्धे धीरो विश्रान्तिमागतः ॥ तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि ॥ २४ ॥ न मोक्षो नभसः पृष्ठे नापाताले न भूतले ॥ अहंकृते विमोहस्य क्षयो मोक्ष इतीर्यते ॥ २५ ॥ अपि पुष्पावदलना-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दपि लोचनमीलनात् ॥ सुकरोऽहंकृतेस्त्यागो न क्लेशोऽत्र मनागपि ॥ २६ ॥ स्फुरति गच्छति वल्गति याचते भ्रमति मज्जति संहरति स्वयम् ॥ अपरतामुपयात्यपि केवलं चलति चंचलशक्तितया मनः ॥ २७ ॥ इति ज्ञात्वा महाबुद्धे त्यज चेष्टां प्रियोऽसि मे ॥ पित्रोः प्रीतिं समालोच्य कंचित्कालं तथा वस ॥ २८ ॥ ततो यथेष्टं विचर निर्बंधं न करोम्यहम् ॥ इत्युक्तः स तथेत्याह भुक्त्वा तस्य गृहे सुखम् ॥ २९ ॥ पतिव्रतान्नमाहात्म्याद्भयं तल्लयमागतम् ॥ तावागतौ समालोक्य ववंदे पितरौ मुदा ॥ ३० ॥ विस्मयं परमं गत्वा नमस्कृत्य द्विजोत्तमम् ॥ को मंत्रस्ते भेषजं वा किं कृतं क्षणमात्रतः॥३१॥ सर्वथा जीवनं दत्तं भवता नौ कृपानिधे ॥ इत्युक्त्वा सुतमादाय स्वगृहं पुनरागतौ ॥ ३२ ॥ स योगी मरणं यावत्तयोः स्थित्वा यथासुखम् ॥ मुक्तबंधो भुवमिमां विचचारात्मसंगतः ॥ ३३ ॥ भयमात्रावशेषोऽसौ विज्ञानामृतसागरः ॥ यथा सुबोधमात्रेण संगजं भयमुज्झति ॥ ३४ ॥ तथा सर्वोऽपि लोकोऽयं मोहमात्रावृतः प्रभो ॥ स्वात्मानं चिद्घनं नित्यमनुभूयापि सर्वदा ॥ ३५ ॥ कर्ता दाता विकर्ताहं भोक्ताहं सुखदुःखयोः ॥ इति मत्वा विमूढोऽसौ भ्रान्तं प्रत्ययसाक्षिणम् ॥ ३६ ॥ प्रत्यक्षमनुभूयापि

कोऽहं कुत्र कथं मम ॥ आत्मज्ञानं भवेदित्थं बहिराधावते मुधा ॥ ३७ ॥ कुचकोटरसंसुप्तं विस्मृत्य जननी सुतम् ॥ यथा रोदिति पुत्रार्थं तथात्मार्थमयं जनः ॥ ३८ ॥ एवं शास्त्राणि सर्वाणि बोधयंति जनं सुखम् ॥ मोहमात्रनिरासे च पर्य्यवस्यंत्यनुक्रमात् ॥ ३९ ॥ अपूर्वमणुमात्रं वा न कृत्यं शास्त्रवर्त्मना ॥ स्वबुद्ध्येदं विचार्याशु वद साधु न वा विभो॥ ४० ॥ इति देवालयग्राममाहात्म्ये चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीस्कंद उवाच ॥ गणेशतात हर मे चित्तजं संशयं प्रभो ॥ वेदा एव नदीरूपा इति ते वर्णितं पुरा ॥ १ ॥ वेदाः सदैव विख्याता अखंडा ब्रह्मरूपिणः॥ तज्जा नदी कथं जाता खंडिता च स्थले स्थले ॥ २ ॥ चतुरो वार्षिकान्मासान् जलं वहतिसा सरित् ॥ षाण्मासिकी कदाचित्तु कदाचिदष्टमासका ॥ ३ ॥ एतत्कारणमादिश्य सुखिनं कुरु मां गुरो ॥ श्रीशिव उवाच ॥ स्कंद धन्योऽसि रे वत्स वैकुंठश्रवणोत्सुकः ॥ ४ ॥ संशयच्छेदनकरी कथां वक्तुं समारभे ॥ कदाचिन्नारदो योगी पर्यटन् लोकशर्मकृत् ॥ ५ ॥ देवालयं ययौ शीघ्रं व्यंकटेशस्य दर्शने ॥ नमस्कृत्य तदा प्राह जनुर्मे सार्थकं कृतम् ॥६॥ व्यंकटेशः पूजयित्वा प्राह तं नारदं सुधीः ॥ त्वया नारद गंतव्यं त्रिषु लोकेषु सत्वरम् ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गच्छ पृथ्व्यां समाख्याहि देवालयपुरं महत् ॥ तत्र गच्छंति ये लोका दर्शनादेव तत्क्षणात् ॥ ८ ॥ श्रीमन्मुक्ता भविष्यन्ति यमभीतिः कदा नहि ॥ इति घोषय वाण्या त्वं गच्छ गच्छ त्वरां कुरुः ॥ ९ ॥ त्यक्त्वा वैकुंठमतुलं विष्णुरत्रैव तिष्ठति ॥ अतः सर्वैः प्रगंतव्यं कल्याणं वो भविष्यति ॥ १० ॥ व्यास उवाच ॥ एवं भगवतो वाक्यं श्रुत्वा संहृष्टमानसः ॥ सर्वलोकोपकारार्थं नारदो भूतलं ययौ॥ ११ ॥ धृत्वा तु वाडवं रूपं महिमा तत्प्रकाशितः ॥ ग्रामे ग्रामे पुरे देशे देशे देशांतरेऽपि वा ॥ १२ ॥ देवालयपुरस्थस्य व्यंकटेशस्य धीमतः ॥ आम्नायाः स्नानमात्रेण कार्तिके च विशेषतः ॥ १३ ॥ श्रीशदर्शनतो लोकाः सर्वान्कामानवाप्स्यथ ॥ पुष्करिण्यां तु वैशाखे माघे नृहरिसंज्ञके ॥ १४ ॥ मार्गशीर्षे दत्ततीर्थे भाद्रे हेरंबसंज्ञके ॥ चैत्रे रामस्य तीर्थे वै पौषे बालेश्वरे तथा ॥ १५ ॥ आषाढमासे स्नायाद्वै मुरलीधरसंज्ञके ॥ श्रावणे गारुडे तीर्थे प्रयागे फाल्गुने सुत ॥ १६ ॥ इषे स्नानात्पुण्यवरप्राप्तिर्वै शापमोचने ॥ ज्येष्ठे तीर्थे गणेशस्य नद्यां स्नानात्सुखोद्भवः ॥ १७ ॥ तत्तत्तीर्थेषूक्तमासे प्रत्यहं स्नानकारिणः ॥ धनं धान्यं पशून्पुत्रान् लभते ज्ञानमेव च ॥ १८ ॥ मासमात्रमशक्तो वै स्नानं कर्तुं समार्जनम् ॥ नित्यं तदप्यशक्तौ च कस्मिन्नपि दिने मुदा ॥ १९ ॥ स्नानं वा मार्जनं वापि नमनं स्मरणं तथा ॥ करोति सुखलाभार्थं तत्तत्प्राप्तिर्भविष्यति ॥ २० ॥ व्यास उवाच ॥ प्रकाशयित्वा माहात्म्यं मुनिरंतर्दधे पुनः ॥ तदा ते मनुजाः सर्वे देवसेवार्थमागताः ॥ २१ ॥ कृत्वा स्नानं पुष्करिण्यां दत्त्वा दानान्यनेकशः ॥ कार्तिके चैव तुलार्के ध्यात्वा देवं श्रियः पतिम् ॥ २२ ॥ एवं सर्वे व्रतं कृत्वा नद्यां कूपे जलाशये ॥ मासस्नानप्रभावेणाम्नायासुप्रभावतः ॥ २३ ॥ सर्वे विपाप्मनो जाता दुःखदारिद्र्यवर्जिताः ॥ तथैव रोगरहिताः सुखिनो विगतज्वराः ॥ २४ ॥ दिव्यं विमानमारुह्य गताः केचित्परं पदम् ॥ व्यधिकारास्तथा रोगा मिथो मंत्र्य यमं ययुः ॥ २५ ॥ तेषां प्रधाना ये रोगा वातपित्तकफादिकाः ॥ विषमाः सन्निपाताश्च अतिसारविषूचिकाः ॥ २६ ॥ भगंदराः प्रमेहाश्च वायुः शूलो वमिस्तथा ॥ क्षयापस्मारकुष्ठाश्च राजयक्ष्मा विचर्चिका ॥ २७ ॥ गलगंडाश्मरीदद्रुपीनसाः पलितादयः ॥ ये चान्ये बहवो रोगा यमलोकनिवासिनः ॥ २८ ॥ यमाज्ञया संचरंतो ययुस्तेऽपि यमालयम् ॥ प्रणम्य प्रेतराजाय हितं वचनमब्रुवन् ॥ २९ ॥ रोगा ऊचुः ॥ अहो यम महाबाहो सर्वसत्वनिषूदन ॥ तवाज्ञया वयं याताः पीडनाय धरातले ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पीडिता बहवो लोकाः प्रेषितास्तव मंदिरे ॥ एवं प्रवर्तमाने तु कश्चिद्विप्रः समागतः ॥ ३१ ॥ प्रकाशितं धर्मतत्त्वं सर्वभूतहिताय च ॥ देवालयपुरे विष्णुं नत्वा मुक्ता भवंति ते ॥ ३२ ॥ तत्राम्नाया जले स्नात्वा रोगहीनाभवन्मही ॥ एवं धर्मेण ये युक्ताः सर्वे ते स्वर्गवासिनः ॥ ३३ ॥ अतः क्षीणबला जाता वयं त्वां शरणं गताः ॥ अस्माकं हि गतिर्नान्या त्वदृते सूर्यनंदन ॥ ३४ ॥ तवैव का गतिर्देव किं करिष्यसि सांप्रतम् ॥ कथं ते निरयांतस्था जीवा जीवंति चांतक ॥ ३५ ॥ इति दुःखाभिभूतास्ते गदाः स्वभवनं गताः ॥ गतेषु तेषु प्रेतेशश्चित्रगुप्तममंत्रयत् ॥ ३६ ॥ पृष्टवान् लोकचरितमवनीतलसंभवम् ॥ प्रणम्योवाच मधुरं धर्मराजं हि जैमिने ॥ ३७ ॥ नारदेन कृतं लोके धर्मसंस्थापनं पुनः ॥ सर्वे विपाप्मनो जाता रोगदुःखविवर्जिताः ॥ ३८ ॥ गंतारो वैष्णवं धाम शैवं ब्राह्ममथापि वा ॥ न केपि यमलोकार्हा व्यंकटेशप्रभावतः ॥ ३९ ॥ एवं निगदिते तस्मिन्प्रेतराजस्य किंकराः ॥ निरस्ता वैष्णवैर्दूतैरनाथा इव ते कृताः ॥ ४० ॥ आत्मानं स्वामिनं चैव दैवं चैव निर्निंदिरे ॥ अलं ते सर्वथा तात निर्बलस्य गतायुषः ॥ ४१ ॥ दूतानां वचनं श्रुत्वा कोपेन प्रज्वलन्निव ॥ अपृष्ट्वैव जगामाशु तपस्तप्तुं सुदारुणम् ॥ ४२ ॥ स्वर्णशैलं समासाद्य शिवमुद्दिश्य सादरम् ॥ ज्ञात्वा मुकुंदं स्वरिपुं नारदं च तथाग्निमम् ॥ ४३ ॥ गते वैवस्वते राजन् यमलोकनिवासिनः ॥ हाहा कृत्वा प्रधावंति इतश्चेतश्च सर्वतः ॥४४॥ इंद्रियाणि वशे स्थाप्य हृदि ध्यात्वा सदाशिवम् ॥ वर्षमात्रं तदा जातं तप्यमानेऽर्कनंदने॥४५॥ तदा रुद्रश्च भगवानाविरासीज्जगत्पतिः ॥ देवस्तत्तपसा तुष्टः प्रोवाच मधुरं वचः ॥ ४६ ॥ श्रीशिव उवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपसानेन चारुणा ॥ वरं दातुं समायातो यत्ते मनसि वर्तते ॥ ४७ ॥ प्रेतराजोऽपि तच्छ्रुत्वा शैवं वचनमाहृतम्॥विस्मयात्फुल्लनयनो ददर्श शिवमव्ययम् ॥ ४८ ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं वृषभध्वजम् ॥ पार्वत्या सहितं देवं त्रिशूलवरधारिणम् ॥ ४९ ॥ दिगंबरं शशिधरं मुंडमालाविभूषितम् ॥ एवंविधं शिवं दृष्ट्वा प्रणम्योवाच सूर्यजः ॥ ५० ॥ यम उवाच ॥ त्रिकालज्ञ जगन्नाथ त्रिवर्गफलदायक ॥ त्वया विसृष्टाः सकला ब्रह्मविष्णुमहेश्वराः ॥ ५१ ॥ लोकपाश्चैव दिक्पाला मन्वाद्या वसवस्तथा ॥ तथैवान्ये च बहवस्त्रयस्त्रिंशच्च कोटयः ॥ ५२ ॥ अधिकारेषु विन्यस्तास्त्वयैव विश्वकर्मणा ॥ तवाज्ञया प्रवृत्तस्य दुष्टसंहारकारिणः ॥ ५३ ॥ ममावज्ञा कृता नूनं विष्णुना प्रभविष्णुना ॥ नारदेन कृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं मम कर्मविनाशनम् ॥ ५४ ॥ यतोऽहं दुःखितो जातो देव त्वां शरणं गतः ॥ यदि मां त्वं प्रसन्नो-
ऽसि स्वाधिकारे नियोजय ॥ ५५ ॥ इति वैवस्वतो वाक्यं श्रुत्वा क्रोधसमन्वितः ॥ त्रिशूलं योजया-
मास नारदस्य जिघांसया ॥ ५६ ॥ शिवहस्ताद्विनिर्मुक्तस्त्रिशूलो नारदं ययौ ॥ त्रिशूलमागतं दृष्ट्वा
मुनिर्विह्वलमानसः ॥ ५७ ॥ ब्रह्मलोकं ययौ तूर्णं पृष्ठशूलभयातुरः ॥ ब्रह्मापि तं समालोक्य न शशाक
निवारितुम् ॥ ५८ ॥ त्रिशूलतेजसा तप्ता ब्रह्मलोकनिवासिनः ॥ जग्मुः प्राणभयात्सर्वे ययौ ब्रह्मा जना-
र्दनम् ॥ ५९ ॥ वैकुंठे च समासीनं सत्रिशूलो मुनीश्वरः ॥ तदा कोलाहलो जातो वैकुंठे विष्णुमंदिरे ॥
॥ ६० ॥ सिंहासनात्प्रचलितो वैकुंठो देवकीसुतः ॥ ददर्श तमिमं पौत्रं सत्रिशूलं भयातुरम् ॥ ६१ ॥
पृष्ठवान् किमिदं ब्रह्मन् सर्वं चख्यौ च नारदः ॥ त्रिशूलं हस्ततः क्षिप्त्वा पृष्ठतः शिव आययौ ॥ ६२ ॥
आम्नाया स्नानमाहात्म्यं श्रुत्वा गंगा रुषान्विता ॥ उवाच परुषं वाक्यं शंभुं क्रोधारुणेक्षणा ॥ ६३ ॥
गंगोवाच ॥ केयं वेदनदी ख्याता कथं जाता ममाधिका ॥ सर्वासामहमेवास्मि गुरुर्नान्या ममाधिका ॥
॥ ६४ ॥ यतो जगद्धरोस्तेऽद्य सर्वदा शिरसि स्थिता ॥ शपैनां यदि ते प्रीतिर्नोचेद्गच्छ रसातलम् ॥६५॥

श्रुत्वा गंगोदितं वाक्यं स्त्रीप्रियः परमेश्वरः ॥ गंगामुवाच प्रहसन् न कोपं कुरु मे प्रिये ॥ ६६ ॥
आधिक्यं शृणु तस्या वै महानद्यास्तपः प्रिये ॥ त्वं तु विष्णुपदाज्जाता सा तु वेदद्रवोऽभवत् ॥ ६७ ॥
अनादिनिधना वेदा निर्गुणब्रह्मरूपिणः ॥ ६८ ॥ तस्मान्माया ततो विष्णुरतः सगुण उच्यते ॥
अतोऽधिकतरा त्वत्तः सा नदी सर्वदा शिवा ॥ ६९ ॥ इति श्रुत्वा भर्गवाक्यमाम्नायां सा सरिद्गता ॥
उवाच क्रोधताम्राक्षी त्वं गर्वं वहसे मुधा ॥ ७० ॥ अहं सर्वाधिकेत्येवं निर्लज्जे शृणु मे वचः ॥
आम्नायोवाच ॥ गंगे त्वं सर्वदा श्रेष्ठा मत्तोऽधिकतरा नहि ॥ ७१ ॥ गंगोवाच ॥ अहमेव सदा ज्येष्ठा
शिवमस्तकसंस्थिता ॥ भगीरथसमानीता तत्पितॄद्धारकारिणी ॥ ७२ ॥ आम्नायोवाच ॥ शिवो विष्णुं
च भजति सः स्वामी मम देवता ॥ मज्जलस्पर्शमात्रेण पिशाचा मुक्तिमाप्नुवन् ॥ ७३ ॥ कृष्णस्त्रीहारिणः
पापान् विजयांप्रियकारिणः ॥ कलौ यवनसंभूतान् व्यंकटेशप्रियानपि ॥ ७४ ॥ तानाहं तु महापा-
पानुद्धरिष्यामि कालतः ॥ गंगोवाच ॥ किमिदं वल्गसे मूढे दुष्टे पंडितमानिनि ॥ ७५ ॥ देवा-

१ अर्जुनः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रियानुद्धरसि देवग्रामे समास्थिता ॥ अतस्त्वां शापयोग्यां वै शपामि निम्नगाधमे ॥ ७६ ॥ सदा न तव पानीयं वहति त्वं तु दुर्बला ॥ षाण्मासिकी कदाचित्त्वं कदाचिदष्टमासिकी ॥ ७७ ॥ एवं शप्ता वेदनदी क्रोधाकंपितमानसा ॥ गंगे त्वं बहुदुष्टासि मुधा मां शप्तवत्यसि ॥ ७८ ॥ अहं नैव शपामि त्वां त्वच्छापो गृह्यते मया ॥ अहं शांतिपरा नित्यं मां प्रभुः प्रवदत्यसौ ॥ ७९ ॥ शमादिसंपन्नपरा वस त्वं मम सन्निधौ ॥ ये मे द्विषंति वामोरु परं मद्ग्रामवासिनः ॥ ८० ॥ समुद्धर महाभागे गंगे ते प्रब्रवीम्यहम् ॥ अतस्तान् दुष्टयवनानपि पापान्पुनाम्यहम् ॥ ८१ ॥ इति श्रुत्वा नदीवाक्यं सा गंगा शांतिमागता ॥ प्रणम्योवाच तां धन्या त्वं साक्षाद्वेदरूपिणी ॥ ८२ ॥ मया शप्तापि न क्रुद्धा शांत्या मच्छ्रेष्ठतां गता ॥ शापान्निवर्तयामि त्वां पयोहीनापि खंडिता ॥ ८३ ॥ अंतर्जला सदा तिष्ठ सर्वोद्धारणतत्परा ॥ अहं त्वां संमिलिष्यामि प्रतिवर्षं शरद्दतौ ॥ ८४ ॥ व्यास उवाच ॥ देवाः संमीलितास्तत्र साधु साध्वीति चुक्रुशुः ॥ शिव उवाच ॥ अहं तव सदा तीरे दक्षिणे लोकरक्षणे ॥ ८५ ॥ तिष्ठामि हनुमद्रूपी धन्या त्वं निम्नगासु च ॥ श्रीलक्ष्मीव्यंकटेश उवाच ॥ मद्ग्रामवासिनः पापानुद्धर त्वं सदानघे॥८६॥

एतस्मिन्नंतरे विष्णुः कोपरूपं सदाशिवम् ॥ सांत्वयन् श्लक्ष्णया वाचा व्यंकटेशः कृपानिधिः ॥ ८७ ॥ आह शंभोऽसामयिकं प्रलयं कर्तुमुद्यतः ॥ त्वयि कोपसमायुक्ते सर्वं भवति भस्मसात् ॥ ८८ ॥ मदिच्छया नारदेन क्षेत्रमेतत्प्रकाशितम् ॥ तवैव वासयोग्येयं भूमिरत्र सदाशिव ॥ ८९ ॥ पार्वत्या सह संतिष्ठ स्वामिपुष्करिणीमुप ॥ तवानुकंपासंयुक्तं नारदं निर्भयं कुरु ॥ ९० ॥ शूलो रक्षतु मद्ग्रामं सर्वदा वटसंस्थितः ॥ शाकंभर्याः पृष्ठदेशे धनुःशतप्रमाणतः ॥ ९१ ॥ त्रिशूलतीर्थं भवतु वटरूपस्त्वमेवहि ॥ तत्र स्नानेन दानेन हंति शूलशतत्रयम् ॥ ९२ ॥ शूलदानं प्रकुर्वीत शूलस्य प्रतिमां तथा ॥ शिवपंचाक्षरो मंत्रः सर्वथा जप्य एव तु ॥ ९३ ॥ एवं रोगस्य हरणं भविष्यति सदाशिव ॥ त्वं च शांतिमयो भूत्वा कल्याणं कुरु सर्वदा ॥ ९४ ॥ श्रीशिव उवाच ॥ एहि नारद वत्स त्वं निर्भयो भव सुव्रत ॥ व्यंकटेशप्रियावावामत्र वासस्त्वया सह ॥ ९५ ॥ तवापि तीर्थं भवतु जगत्कलहनाशकम् ॥ उत्तरस्यां दिशि ग्रामाद्बहिस्थं पुण्यपावनम् ॥ ९६ ॥ व्यंकटेशाग्रतो ज्ञेयं कीर्तिदं ज्ञानसाधनम् ॥ पंचविंशत्करशतं त्वज्जपोऽप्यत्र भद्रदः ॥ ९७ ॥ एवमुक्त्वा गताः सर्वे सर्वं स्वस्थमभूज्जगत् ॥ अत्राप्यविश्वासकरा यमलोक-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गता हि ते ॥ ९८ ॥ श्रीशिव उवाच ॥ यम गच्छ स्वलोकं वै पुण्यस्य गतिरीदृशी ॥ शिवाज्ञया गतः
सोऽथ व्यंकटेशं प्रणम्य च ॥ ९९ ॥ यत्पृष्टं ते पुत्र वृत्तं कथितं भगवद्यशः ॥ अस्य श्रवणतः शीघ्रं
सर्वरोगविनाशनम् ॥ १०० ॥ इति श्रीदेवालयग्राममाहात्म्ये त्रिशूलनारदतीर्थवर्णनं नाम पंचचत्वारिं-
शोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ श्रीशंकर उवाच ॥ नवरात्रोत्सवं वक्ष्ये व्यंकटेशस्य भोः सुत ॥
भुक्तिमुक्तिप्रदं धन्यं ब्रह्मणोक्तं स्वसूनवे ॥ १ ॥ ब्रह्मोवाच ॥ शृणु नारद तत्वेन सावधानेन चेतसा ॥ नव-
रात्रे पूजनं तु त्रिदशानां प्रकीर्तितम् ॥ २ ॥ विशेषतस्तु दुर्गाया व्यंकटेशस्य प्रीतिदम् ॥ देवालये तु
देवस्य समीपे रेणुका स्थिता ॥ ३ ॥ या विश्वजननी प्रोक्ता ब्रह्मांडसृष्टिकारिणी ॥ व्यंकटेशेन भक्तानां
कुलदेवीति स्थापिता ॥ ४ ॥ पूर्वं देवैर्यथा पूजा कृतोत्साहे मुदान्वितैः ॥ तथैव सकलं कार्यं भूमौ
भक्तिमभीप्सुभिः ॥ ५ ॥ ऋषय ऊचुः ॥ सूत त्वं कथयास्माकं पूर्वं देवैः कृतं कथम् ॥ किमर्थं च कथं
जातं देवकार्यं वदस्व नः ॥ ६ ॥ सूत उवाच ॥ शृणुध्वमृषयः सर्वे श्रीपर्वतनिवासिनः ॥ व्यंकटेशमहो-
त्साहवर्णने हर्षितोऽस्म्यहम् ॥ ७ ॥ दानवा दैत्यरक्षांसि देवानां पीडने रताः ॥ दुष्टाः स्तेनास्त्रासयंति

ब्राह्मणान् छलयंति च ॥ ८ ॥ स्वाहास्वधानिषेधश्च वेदध्वनिलयस्तथा ॥ देवा दुःखेन संतप्ता ऋषि-
भिस्ते प्रचोदिताः ॥ ९ ॥ ब्रह्माज्ञया समाजग्मुर्ग्रामं देवालयाभिधम् ॥ आश्विने शुक्लप्रतिपद्दिने ते गुरुणा
सह ॥ १० ॥ प्रातरेव समागम्य नवरात्रमहोत्सवम् ॥ आद्ये दिने ध्वजारोहो देवस्य मंदिरे कृतः
॥ ११ ॥ यस्यावलोकनादेव गृहे शैवंध्वजागमः ॥ ईषशुक्लप्रतिपदि देवतास्थापनं मतम् ॥ १२ ॥ दश-
म्युत्थापने यस्याः कृता पूजा सुखाय सा ॥ घटप्रदीपयोश्चैव स्थापनं नवरात्रकम् ॥ १३ ॥ सुगंधिपुष्पमा-
लायाः प्रत्यहं बंधनं मतम् ॥ यथा माला देवशिरः स्पर्शयेदर्पणं तथा ॥ १४ ॥ त्रिकालमर्चनं कार्यमारं-
भेऽविघ्नपूजनम् ॥ हविष्याशी नक्तभोजी निराहारपरोऽपि वा ॥ १५ ॥ पूजयेदतिभक्त्या वै जपेद्विष्णु-
सहस्रकम् ॥ श्रीसूक्तविष्णुसूक्तानि लक्ष्म्या नारायणस्य च ॥ १६ ॥ हृदयं पठनीयं वै व्यंकटेशस्य प्रीति-
दम् ॥ पौरुषस्य च सूक्तस्य पठनं पापनाशनम् ॥ १७ ॥ नित्यं षोडशवारं तु षण्मासपठनाद्ध्रुवम् ॥
महापापविनाशांते परं ज्ञानमवाप्नुयात् ॥ १८ ॥ खवेदसंख्यया नित्यपाठेन मंडलावधि ॥ मोक्षज्ञानं भवे-

---

१ कल्याणम् । २ एकोनपंचाशद्दिनम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तस्य संततिश्च गुणी वरा ॥ १९ ॥ नवरात्रे व्यंकटेशप्रीतये रसभूमितम् ॥ पाठादीश्वरभक्तिः स्यादुद्रपाठात्त-
थार्चनात् ॥ २० ॥ अभिषेकाच्च कल्याणं रोगनाशः सदा सुखम् ॥ नवम्यां शुक्लपक्षस्य महार्थं मंडपादि-
कम् ॥ २१ ॥ कृतं देवैर्भक्तिमद्भिर्यथा वै शोभनं भवेत् ॥ एकविंशतिसंख्याकाः स्तंभाः स्वर्गस्य भूमयः
॥ २२ ॥ परेशप्रीतये तासामागमो जायते किल ॥ गणेशप्रीतिदा संख्या तेन विघ्नो न जायते ॥ २३ ॥
एकं मुख्यं परं ब्रह्म त्यक्तद्वैतं हि निर्भयम् ॥ नित्यं क्रीडारतं यस्मिन् सूचितं स्तंभसंख्यया ॥ २४ ॥
तलानि सप्तद्वीपानि सप्तस्वर्गस्य भूमयः ॥ मंडपस्थानि जातानि तस्था जीवाः समागमन् ॥ २५ ॥ मंडपा-
नतरं कार्या नमस्काराः प्रदक्षिणाः ॥ गोविंद गोविंद इति मुखे हृदि च देवताम् ॥ २६ ॥ ध्यायन् स्वस्वगृहं
गत्वा भोजनं तदनंतरम् ॥ कार्यं दशम्यामुत्थाप्य देवदेवं जनार्दनम् ॥ २७ ॥ अभिषेकयुता पूजा
पंचामृतपुरःसरा ॥ कृता श्रीव्यंकटेशस्य महदानंदपूर्वकम् ॥ २८ ॥ विष्णोः प्रीतिकरान्मंत्रान् जप्त्वा
तु नवरात्रकम् ॥ कृत्वा द्वाराणि मुदा दशम्यां पूजनं वरम् ॥ २९ ॥ उपचारान् बहुविधान्सालंकारान्द-
दुर्मुदा ॥ दिव्यैराभरणैर्वस्त्रैः कुसुमैर्नंदनोद्भवैः ॥ ३० ॥ त्रिदशाः पूजयामासुर्वाद्यघोषस्तदाभवत् ॥

लक्ष्मीं धरां व्यंकटेशं परिवारगणानपि ॥ ३१ ॥ चतुःपुरुषपर्यंतं नैवेद्यं विविधं ददुः ॥ दक्षणां चैव
सौवर्णीं फलानि विविधान्यपि ॥ ३२ ॥ त्रयोदशपदार्थेन युक्तं ताबूलमेव हि ॥ आर्तिक्यं नवदीपेन
युक्तं कर्पूरदीपकम् ॥ ३३ ॥ प्रदक्षिणानमस्कारान् मंत्रपुष्पं जपं तथा ॥ कृत्वा समर्पणं सर्वं प्रसादं
तीर्थमेव च ॥ ३४ ॥ गृहीत्वा सेवकक्षिप्तं शरीरे शंखगं जलम् ॥ ते नष्टरोगकाया वै भोजनं चक्रिरे
मुदा ॥ ३५ ॥ एवं दिनं सुखेनैव निर्गतं सर्वतो जयः ॥ ततस्ते निर्जराः सर्वे सुखिनः साबलाः खलु ॥
॥ ३६ ॥ सायंसंध्यादिकृत्यानि स्वार्तिक्यं नित्यकर्मजम् ॥ संपाद्य देवतोत्साहे गतास्ते देवमंदिरम् ॥ ३७ ॥
एतस्मिन्समये तत्र यात्रार्थं बहुदेशजाः ॥ जनाः समागमन् प्रेम्णा नानावर्णाः सुशोभनाः ॥ ३८ ॥
स्त्रियश्च पुरुषाश्चैव बालका जरठा अपि ॥ मंदिरे देवदेवस्य गृहीतोपायना वराः ॥ ३९ ॥ ग्रामस्था ग्रा-
मिणः शूद्रा नैगमा ब्राह्मणा द्विज ॥ किरातपुल्कसादीनां शूद्राणां हीनजन्मनाम् ॥ ४० ॥ भक्तिः श्रीव्यंकटा-
धीशे ह्यधिका स्यात्कलौ युगे ॥ तेषामपि रमाधीशः शीघ्रं दास्यत्यभीप्सितम् ॥ ४१ ॥ सान्निध्यं कुरुते
तत्र भक्त्या क्रीतो यतो हरिः ॥ आर्यास्तुरुष्का मालव्या गौडा वंगाः कलिंगकाः ॥ ४२ ॥ आंध्राः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्नाटदेशीयाः कोसलोद्भूतमानुषाः ॥ अंगाश्चोलाश्च पांड्याश्च पांचालाः कुरवस्तथा ॥ ४३ ॥ द्वीपांतरगताश्चापि हूणाश्चीना दशेरकाः ॥ कोंकणा मागधाश्चैव म्लेंछाः संकरजातयः ॥ ४४ ॥ धारयंतो महाभक्तिं श्वपाकाधमयोषितः ॥ सहस्रशो जनास्तत्र मिलिताः प्रभुदर्शने ॥ ४५ ॥ आश्चर्यमाश्चर्यमिति ब्रुवंतो वैमानिकास्ते कमलासनाद्याः ॥ स्त्रियश्च तेषां परमा रमाद्याः प्राप्ता दशम्यां परमोत्सवे ताः ॥ ४६ ॥ ब्रह्मोवाच ॥ देवाः सर्वे समागम्य प्रणम्योचू रमापतिम् ॥ उत्तिष्ठ देवदेवेश शिबिकारोहणं कुरु ॥ ४७ ॥ देवा देवमथो गृह्य शिबिकाया रमाधरम् ॥ ॥ स्थापयित्वा स्वनं चक्रुर्जय गोविंद इत्यथ ॥ ४८ ॥ वाद्यानि वादयामासुर्गायनं नृत्यमेवच ॥ सर्वे जना नामघोषं प्रेम्णातीव प्रचक्रिरे ॥ ४९ ॥ ये पश्यन् शिबिकां देवं ते वै मुक्ता न संशयः ॥ पुत्रप्राप्तिर्भवेत् तेषां धनलाभो जयागमः ॥ ५० ॥ स्त्रीलाभः सर्वलोकेषु प्रतिष्ठां लभते नरः ॥ अतो यात्रां प्रकुर्वंति नानादेशसमुद्भवाः ॥ ५१ ॥ प्रत्यक्षं फलदं देवं यो हि पश्येत्सुखाकरः ॥ ततोऽमराः सर्व एव सह वै देवशर्मणा ॥ ५२ ॥ स्कंधे तां शिबिकां गृह्य निर्गता दक्षिणामुखाः ॥ वाद्यनामध्वनिस्तत्र सर्वतो व्याप्तदिङ्मुखः ॥ ५३ ॥ एतद्वै शृणु

यान्मर्त्यः सोऽचिरादमरो भवेत् ॥ ५४ ॥ इति श्रीदेवालयग्राममाहात्म्ये नवरात्रोत्सववर्णनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ श्रीनारद उवाच ॥ संशयं नाशय ब्रह्मन् दक्षिणामुखकारणम् ॥ रात्रौ किमर्थं गमनं जयार्थं यदि वा गमः ॥ १ ॥ तस्यां दशम्यां विजयो मुहूर्तो रुद्रसंख्यकः ॥ किंचिदुद्भिन्नतारो वा जयदः क्षण उच्यते ॥ २ ॥ ईशान्यां गमनं कार्यमत्र वामं कथं प्रभो ॥ सर्वं शंस महाबुद्धे व्यंकटेशकथानकम् ॥ ३ ॥ शृण्वन् सुखमवाप्तोऽहं धन्याद्धन्यतमोऽभवम् ॥ त्वं च धन्योऽसि हे ब्रह्मन् यतस्त्वज्जनकः प्रभुः ॥ ४ ॥ ब्रह्मोवाच ॥ सर्वसंशयनिर्मोकं करोमि तव नारद ॥ व्यंकटेशो बुद्धिदाता देवाः सर्वे तदानुगाः ॥ ५ ॥ चित्रं कलियुगे श्रीशो ग्रामे देवालयाभिधे ॥ भविष्यं कालमाज्ञाय भक्तार्थं क्रीडते तथा ॥ ६ ॥ व्यंकटेशात्परो देवो नास्त्यन्यः शरणं भुवि ॥ व्यंकटेशसमो देवो नास्ति नास्ति महीतले ॥ ७ ॥ स्वामिपुष्करिणीतीर्थसमं नास्ति न चास्ति हि ॥ अनुग्रहाय लोकानां क्रीडनं सर्वदा विभोः ॥ ८ ॥ तेषां वै रक्षणं कार्यमागता ये ममोत्सवे ॥ शिबिकाग्रे समीपे च पश्चाद्वापि

---

१ इतरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरंति ये ॥९॥ तेषां यमस्य नो पीडा स्वप्नगापि परंतप ॥ सर्वेषां मृत्युरस्तीह यममार्गागमो नहि॥१०॥
इत्येवं मनसा धृत्वा दक्षिणाशामुखः प्रभुः ॥ यमः संमुख आगत्य पूजां कृत्वा वदत्ययम्
॥ ११ ॥ तवानुगा ये खलु वेंकटेश ममानुगास्ते हि कदापि नैव ॥ अहं तु तान् विष्णुगृहं नयामि तदा-
नुगो बद्धकरांजलिः स्याम् ॥ १२ ॥ ततोऽसौ शिबिकारूढो निशीथे गमनं बहिः ॥ रात्रौ निद्राकुलो
लोकः सर्वदा जन्मजन्मनि ॥ १३ ॥ निद्रया ह्रियते नक्तमित्यपि श्रूयते ध्वनिः ॥ ममानुगा गता रात्रि-
रेकापि सर्वगा जया ॥ १४ ॥ सर्वरात्रिषु या निद्रा तदघानां विनाशिनी ॥ इयं रात्रिः समाख्याता सर्वदा
जयदः क्षणः ॥ १५ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ॥ विद्याबलं दैवबलं तदेव ल-
क्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥ १६ ॥ अन्ये मुहूर्ताः संतीह तेष्वपि स्मरणं वरम् ॥ अतो दुष्टमुहूर्तस्य
दोषो गच्छति वै लयम् ॥ १७ ॥ क्रीडार्थं देवदेवस्य निगमा नीररूपिणः ॥ शिबिकास्थो व्यंकटेशो
भार्याभ्यां तत्र खेलति॥ १८॥ भक्तास्तथैव कुर्वंति छत्रचामरधारकाः ॥ वाद्यघोषो नामघोषस्तदैव दि-
वमस्पृशत् ॥१९॥ क्रीडित्वा सुचिरं देवो प्लक्षाधः सुस्थिरः क्षणम्॥ तस्मिन्क्षणे दर्शनजं किं पुण्यं वर्ण्यते

मया ॥२०॥ चतुर्मुखः पंचमुखः षण्मुखोऽपि न वै क्षमः॥ सहस्रवदनः शेषः सोऽनंतः श्रमयुग्भवेत्॥२१॥
जिह्वाभ्यां द्विसहस्राभ्यां वर्णनं कर्तुमक्षमः ॥ यद्यदिच्छति तद्दृष्टा तत्तत्तु लभते नरः ॥ २२ ॥
तत्र ये पशुपक्ष्याद्या द्रष्टारो मुक्तिमार्गगाः ॥ जयध्वनिः कर्णरंध्रे गतो येषां सुपुण्यतः ॥ २३ ॥ तेऽपि
दिव्येंद्रियैर्युक्ता स्वर्गस्त्रीभोगिनो वराः ॥ अनेकाश्वत्थवृक्षादीन् त्यक्त्वा प्लक्ष एव प्रियः प्रभोः ॥ २४ ॥
व्यंकटाख्ये गिरौ रम्ये प्लक्षस्तत्स्थानमुच्यते ॥ देवो हरिः स्वजायाभ्यां भक्तैश्च रमतेऽनिशम् ॥ २५ ॥
किंचिदांध्रस्य संबंधात्तित्तिडी तत्प्रियाभवत् ॥ प्लक्षस्यार्थविचारेण सुखदः सर्वदा सतम् ॥ २६ ॥
प्लुं वै फलमिति प्रोक्तं क्षस्तु क्षयहरो मतः ॥ यस्मिन्वृक्षे सुखकरं फलं क्षयहरं विदुः ॥ २७ ॥ अतस्तत्रो-
पविष्टस्य दर्शनात्क्षयनाशनम् ॥ ततः सज्जनमार्गेण गमनं पश्चिमामुखम् ॥ २८ ॥ रुक्मिणीबुद्धतीर्थस्य
वाममार्ग उदग्दिशि ॥ गणेशस्तत्र चागत्य राजक्षेत्रगतः स्वयम् ॥ २९ ॥ आगत्य व्यंकटेशाय प्रणम्य
प्राह विघ्नराट् ॥ मदंशो ढुंढिराजस्ते क्षेत्रे विघ्नहरोऽस्ति हि ॥ ३० ॥ अद्यप्रभृति ते यात्रा बहुलोकस-

---

क्षमो क्षयहरो हरिः । क्षः प्लुं फलं बाणपूरे चेति मातृकाविलासः ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मागमः ॥ नवमे दिवसे देव संपूर्णा जायते किल ॥ ३१ ॥ अहं स्वयं विघ्नगणहरणार्थं वसामि च ॥
दैत्या दुष्टाः पीडयंति यात्राकर्मकरान्नरान् ॥ ३२ ॥ तेषां घाताय सगणः स्थास्यामि भवदालये ॥
चतुर्थ्यां तु गमिष्यामि स्थापयित्वा मदंशकम् ॥ ३३ ॥ इत्युक्त्वा व्यंकटेशेन चाज्ञप्तः पुरमाविशत् ॥
पूर्वदिग्वदनो देवो धर्मं प्राह सदा वस ॥ ३४ ॥ तत उत्तरकाष्ठास्य आंजनेयसमागमः ॥ तमाह रक्ष
मत्स्थानदर्शनाय समागतान् ॥ ३५ ॥ तत्रैव च कुबेरं तं प्राह देवो धनाधिपम् ॥ धनैस्तर्पय मद्भाम-
वासिनः सुखिनः कुरु ॥ ३६ ॥ ब्राह्मणानां दक्षणाशापूरणार्थं पुनः प्रभुः ॥ दक्षिणाशामुखो भूत्वा सर्वै-
र्नीराजितो विभुः ॥ ३७ ॥ मार्गे मार्गे कृतातिथ्यो गेहे गेहे वसुग्रहः ॥ स्त्रीभिर्बालैस्तु जरठैर्मार्गो निर्ग-
मनो बभौ ॥ ३८ ॥ भूमौ चूर्णं रक्तपीतकृष्णश्वेतमयं बभौ ॥ महार्हाणि च वस्त्राणि देवमार्गे शिवाय वै
॥ ३९ ॥ प्रसृतानि जनैर्देव शिबिकागमनं ततः ॥ हस्ते धृत्वा तु सौवर्णं रौप्यं वा ताम्रभाजनम् ॥ ४० ॥
तस्मिन्दीपान्पंचनेत्रनंदसख्या यथाबलम् ॥ गृहीत्वा चैव कर्पूरं नैवेद्यफलदक्षणाः ॥ ४१ ॥ तांबूलं
देवदेवाय दत्त्वार्तिक्यं स्त्रियो मुदा ॥ मुखं पश्यंति यास्तत्र धन्यं तासां कुलं भुवि ॥ ४२ ॥ या हीन।

पुत्रसंतत्या तया कार्यमिदं शिवम् ॥ संततिर्जायते शीघ्रं वेंकटेशप्रसादतः ॥ ४३ ॥ जीवत्पुत्रप्राणरक्षा
नीरोगत्वं प्रजायते ॥ जयस्वनैर्व्यात्तकाष्ठो महाद्वारगतो बभौ ॥ ४४ ॥ भविष्यत्साधुसंतोषजनकस्थान-
दर्शनम् ॥ अतस्तत्पृष्ठतः पूर्वं मृगासनमितीरितम् ॥ ४५ ॥ तत्रोपविष्टो देवेशः सज्जनानंददः शिवः ॥
तत्र वाद्यान्यवाद्यंत पुष्पवृष्टिश्च खाद्भभौ ॥ ४६ ॥ अग्रे नृत्यंत्यप्सरसो गंधर्वा ललितं जगुः ॥ भक्तानां
नामघोषोऽभूज्जयगोविंदपूर्वकः ॥ ४७ ॥ आर्तिक्यं विदधुस्तत्र वस्त्राभरणशोभिताः ॥ अतीव प्रेमसं-
युक्ताः स्त्रियो वै जयपूर्वकम् ॥ ४८ ॥ तत उत्थाय वै देवः स्वामिपुष्करिणीं ययौ ॥ मृगासनस्थदेवेशद-
र्शनात्सर्वसौख्यभाक् ॥ ४९ ॥ ज्ञानमार्गप्रवृत्तिश्च जायते मंदबुद्धिषु ॥ पुष्करिणीं प्रयाते तु वेंकटेशे दया-
निधौ ॥५०॥ आयुच्चैर्जयघोषोऽभूद्बालाजीति सुखाकरः ॥ जय गोविंद गोविंद गोविंदेति मुहुर्मुहुः॥५१॥
देवा मनुष्या नागाद्या जयशब्दं प्रचक्रिरे ॥ प्रियां पुष्करिणीं दृष्ट्वा तत्रोपाविशदच्युतः ॥ ५२ ॥ नीराज-
यंति तं देवाः स्त्रियश्च प्रेमपूर्वकम् ॥ तस्मिन्काले दर्शनेन द्रव्यलाभः परः क्षितौ ॥ ५३ ॥ ततो दक्षिण-
मार्गेण निर्गत्य मंडपेऽच्युतः ॥ प्राप तच्छिबिका भूमौ नास्पृशद्भारमापिता ॥ ५४ ॥ शिबिकाया उभौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंडौ दक्षिणोत्तरशोभिनौ ॥ बहुभिर्मानवैर्व्याप्तौ जयशब्दकरैर्मुहुः ॥५५॥ देवा इच्छंति तत्स्पर्शं गच्छंति शिबिकामुप ॥ मृदंगतालवीणानां ध्वनिर्झर्झरजस्तथा ॥५६॥ आनकाः पटहा भेर्यः प्रावाद्यंत सहस्रशः॥ मंगलानि च वाद्यानि रणवाद्यानि सर्वतः ॥ ५७ ॥ देववाद्यान्यवाद्यंत वेदघोषश्च मंदिरे ॥ आग्नेयद्रव्यमाकाशे प्रकाशमकरोद्बहुः ॥५८॥ तस्यापि शब्दः सुमहान् गजाश्वानां च वै ध्वनिः॥ अमायतातिमहता ध्वनिना पूरितं जगत् ॥५९॥ इतस्ततस्तु शिबिका बलवद्भिर्धृतापि हि ॥ स्वछंदेन गतिस्तस्या दृश्यते मंडपे तदा ॥ ६० ॥ धारकाणां गतिस्त्वन्या देवस्य गतिरन्यथा ॥ एवं चमत्कृतिं दृष्ट्वा बालाजोति जयध्वनिः ॥ ६१ ॥ एवं मुहूर्तमात्रं वै क्रीडां चक्रे हरिः स्वयम् ॥ ततस्तु मंदिरे गत्वा शिबिका स्थापिता भुवि ॥ ६२ ॥ व्यंकटेशोपवेशार्थं मंदिरे सुंदरे नवे ॥ रम्ये रत्नमये देवं स्थापयामासुरुत्सुकाः ॥ ६३ ॥ बंधमुक्तकरो देवो यात्राबंधहरोऽस्तु च ॥ जलवद्द्रव्यमानीय वृष्टिकर्ता भवत्वयम् ॥ ६४ ॥ इतीव तन्मुखो भूत्वा वरुणो बंधुरस्य च ॥ पश्चिमाशामुखो भूत्वा देवस्तिष्ठति भद्रदः ॥ ६५ ॥ जय गोविंद गोविंद पुनः शब्दो महानभूत् ॥ नृत्यंत्यप्सरसो ह्यग्रे घृताची मेनका वरा ॥ ६६ ॥ उर्वशी मंजुघोषा च

सुधन्या पुंजिकस्थली ॥ रंभा तिलोत्तमाख्याता सहजन्या सुजन्यका ॥ ६७ ॥ हाहा हूहूश्चित्रसेनस्तुंबुरुर्नारदस्तथा ॥ विश्वावसुपुरोगाश्च गायनं चक्रुरंजसा ॥ ६८ ॥ एवं नित्यमभूत्तत्र समाजस्तूत्तरोत्तरम् ॥ ववृधे देवदेवाय लोकैर्दत्तं धनं परम् ॥ ६९ ॥ अहं दास्ये त्वया देयमित्येवाच्युतक्रीडनम् ॥ नानादेशोद्भवा लोका आगत्य परया मुदा ॥७०॥ द्रव्यवस्त्रपशून् दत्त्वा प्रसादं लेभिरे मुदा ॥ एकादशीं समारभ्य तृतीयांतदिनेषु वै ॥ ७१ ॥ ब्राह्मणानां भोजनेन परानंदपदं विदुः ॥ गौरीतिथौ हि ललितं जायते सर्वभद्रदम् ॥ ७२ ॥ ललितं सुंदरं नाम तथैव भवति ध्रुवम् ॥ मंडपोद्वासनं देवस्थापनं पूर्वमंदिरे ॥ ७३ ॥ उत्तराभिमुखो देवः सर्वोत्तरमदर्शयत् ॥ रूपं स्वकीयं भक्तानां भुक्तिमुक्तिप्रदायकम् ॥ ७४ ॥ उत्सवे दर्शनात्पुण्यं ललितेऽतीव जायते ॥ श्रवणादपि यात्रायाः सफलं जन्म जायते ॥ ७५ ॥ इति श्रीदेवालयग्राममाहात्म्ये ललितांतोत्सववर्णनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॐस्कंद उवाच ॥ शिव शंकर सर्वात्मन् नीलकंठ नमोऽस्तु ते ॥ व्यंकटेशकथां ब्रूहि ततः किमभवन् गुरो ॥ १ ॥ देवैस्तु किं कृतं तत्र ममाख्याहि महामते ॥ शिव उवाच ॥ शृणु स्कंद प्रवक्ष्यामि श्रीगो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंदकथानकम् ॥ २ ॥ ललिते तु तदा जाते सर्वे देवाः प्रणम्य तम् ॥ गताः स्वस्वगृहं तूर्णं कार्तिक्यां पुनरागताः ॥ ३ ॥ ईषे श्रीशसमारंभो महालक्ष्म्यास्तु कार्तिके ॥ तेन प्रीती रमाधीशे भक्ताधीने दयाघने ॥ ४ ॥ उत्सवं महदानंदाच्चक्रुस्ते देवतुष्टये ॥ कार्तिकः सकलश्रेष्ठो मासेषु विहितः प्रियः ॥ ५ ॥ मासानां मार्गशीर्षोऽहमिति भागवतं वचः ॥ तस्मिंस्तदुत्सवो मोक्षमार्गदर्शी परः शिवः ॥ ६ ॥ भक्तिमार्गैकशिखरो भुक्तिमार्गैकराज्यदः ॥ अतस्तस्मिन्नरा नार्यो दर्शनेन सुखाकराः ॥ ७ ॥ कार्तिके शुक्लदशमी ह्युत्सवारंभणे तिथिः ॥ मण्डपारोहणं तस्यां कृतं देवैर्मुदायुतैः ॥ ८ ॥ एकादश्यां नामघोषः कीर्तनं जागरः कृतः ॥ द्वादश्यामुत्सवो लक्ष्म्या आनंदेन कृतोऽमरैः ॥ ९ ॥ समुद्रमथनाज्जाता जगदानंदकारका ॥ अस्यांस्तिथौ विवाहश्च विष्णोर्लक्ष्म्याश्च कीर्तितः ॥ १० ॥ पूर्वं या जानकीछाया सैव पद्मावती त्वभूत् ॥ व्यंकटेशस्य सा भार्या जाता परमसुंदरी ॥ ११ ॥ पाणिग्रहणमेतस्याः श्रीनिवासेन यत्कृतम् ॥ दशम्यां कार्तिके शुक्ले कुत्र वैशाख उच्यते ॥ १२ ॥ आश्विने श्रीनिवासस्य महऊर्जे तु तत्स्त्रियाः ॥ कार्यः सोऽतिप्रयत्नेन लक्ष्मीसंतानवृद्धिदः ॥ १३ ॥ धूपदीपादिभिः पुष्पैर्नानावर्णैः सुशोभितम् ॥ मंदिरं देवदेवस्य कृत्वा नैवेद्यमर्पयेत् ॥ १४ ॥ मालां पुष्पसमुद्भूतामर्पयेद्यो नरः सुधीः ॥ तस्य पुण्यफलं वक्तुमनंतोऽपि कृशस्त्वभूत् ॥ १५ ॥ देवस्य प्रियपुष्पाणि शृणु मे त्वं प्रयत्नतः ॥ विष्णुना स्वमुखेनैव प्रोक्तानि ब्रह्मणे पुरा ॥ १६ ॥ श्रीभगवानुवाच ॥ शृणु पुत्र प्रवक्ष्यामि माहात्म्यं पुष्पसंभवम् ॥ येन पुष्पेण मे प्रीतिर्भवेत्सम्यङ्न संशयः ॥ १७ ॥ मल्लिका मालती चैव यूथिका चातिमुक्तका ॥ पाटला करवीरं च तगरः कुंद एव च ॥ १८ ॥ पुन्नागबकुलाशोकः चंपकः कमलं प्रियम् ॥ शमीपत्रं च दूर्वाश्च केतकीपत्रमेव च ॥ १९ ॥ शेवंतिका पारिजातो मुनिपुष्पमतिप्रियम् ॥ यानि स्युर्वर्णयुक्तानि रसगंधयुतानि च ॥ २० ॥ अपामार्गो भृंगराजः खदिरः कुश एव च ॥ दमनं बिल्वपत्रं च तुलसी सर्वतोऽधिका ॥ २१ ॥ तुलसीकाष्ठजं गंधमतीव सुखदं विभोः ॥ तथैव मंजरीपत्रं सर्वपुष्पाधिकं विदुः ॥ २२ ॥ जातीपुष्पसहस्रेण कृतां मालां समर्पयेत् ॥ कल्पकोटिसहस्रं वै विष्णुलोके स तिष्ठति ॥ २३ ॥ चूतोत्थमंजरीदाने कोटिगोदानजं फलम् ॥ धूपं दद्याच्च देवाय कृष्णागरुसमुद्भवम् ॥ २४ ॥ गुग्गुलं शर्करायुक्तं साज्यं धूपे प्रदापयेत् ॥ सुगंधघृतसंयुक्तं बहुवर्तिसमाकुलम् ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकर्पूरं दीपदानं तेन नीराजयेद्विभुम् ॥ मंत्रहीनं क्रियाहीनं यत्कृतं पूजनं मम ॥ २६ ॥ सर्वं संपूर्णतामेति
कृते नीराजने सुत ॥ नीराजनं तु यः पश्येद्धूपशेषेण स्वां तनुम् ॥ २७ ॥ मार्जयेत्स प्रियतमो भवतीति
विनिश्चयः ॥ नैवेद्यं भक्तितो दद्यात्तेन तृप्तिः परा मता ॥ २८ ॥ अभावे सर्ववस्तूनामुदकेन निवेदनम् ॥
इति श्रीदेवालयग्राममाहात्म्ये धूपदीपादिवर्णनं नाम अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥
ॐ ब्रह्मोवाच ॥ नैवेद्यस्य विधिं ब्रूहि देव मे तत्वतः प्रभो ॥ अन्नं कतिविधं चेष्टं व्यंजनादीन्यशेषतः
॥ १ ॥ श्रीभगवानुवाच ॥ साधु पृष्टं त्वया वत्स मम प्रीतिकरं परम् ॥ वक्ष्यामि तेऽन्नपानादि व्यंजना-
दीन्यशेषतः ॥ २ ॥ आदौ हिरण्मयं पात्रं तदभावे च राजतम् ॥ तदभावे च पालाशं विस्तीर्णं बहुसुंद-
रम् ॥ ३ ॥ कचोलाः शतशः कार्याः पात्रे वै परितोऽनघ ॥ तन्मध्ये व्यंजना देया नानाफलमयाः शुभाः
॥ ४ ॥ पायसं चंद्रसंकाशं पात्रे वै शर्करायुतम् ॥ भक्तं कुमुदसंकाशं मुद्गान् काचप्रभान् शुभान् ॥ ५ ॥
नानाव्यंजनसंरुद्धं त्रिभिः पंक्तिभिरेव च ॥ निंबूरसेण चार्द्रेण फलमूलयुतेन च ॥ ६ ॥ वैकृतांश्च तदा
कार्याः शतशो भोजने मम ॥ द्राक्षास्तु मिश्रिताश्चूतकरमर्दकृताः शुभाः ॥ ७ ॥ मरीचं पिप्पलीसार्धं

कैलाचार्द्रकसंयुताः ॥ कथिकावटिकाः कार्याः शतशो भोजने मम ॥ ८ ॥ प्रलेहनास्तथा कार्याः कचो-
लशतसंकुलाः ॥ नानाकुसुमसंमोदयुक्ताः सहसि मे प्रियाः ॥ ९ ॥ मण्डका वर्तुला रम्याः समाः सर्वत्र
बिंदुवत् ॥ सितया सहितेनाथ दुग्धेन कथितेन च ॥ १० ॥ मधुवर्णेन गव्येन युक्ते तस्मिन् सुभाजने ॥
कचोले सुप्रभे वत्स स्थितं कांचनसप्रभम् ॥ ११ ॥ घृतं सुवासितं प्रीत्या देयं हि मम भोजने ॥ तत्र
गोधूममात्रेण चंद्रकेण हि चोज्ज्वलम् ॥ १२ ॥ सौवाल्लिकाः पूरिकास्तु शतछिद्राः सुवेष्टिताः ॥ पूरि-
कास्तु तथा क्षीरप्रकारांस्तु प्रकारयेत् ॥ १३ ॥ मणयः सूत्रसंज्ञाश्च मालतीकुसुमादयः ॥ पर्पटा बर्बरा
रम्या माषकूष्माडसंभवाः ॥ १४ ॥ वटका नवधा रम्या कुर्यान्मासे सहे मम ॥ द्विधाजातीमरीचैश्च
पूरिकार्द्रेण वै शुभाः ॥ १५ ॥ युक्तेन लवणेनातिशुद्धतैलेन पूरिताः ॥ कुंकुमाभाः स्नेहहीनाः सक्षता
इव दुर्जनाः ॥ १६ ॥ दधिदुग्धयुताः केचिच्चिंचणीचूतसंभवाः ॥ द्राक्षारसयुताः कैचित्तथान्ये कथिका-
युताः ॥ १७ ॥ राजिकाजलमध्यस्था तथान्ये सितया सह ॥ रसैश्चतुर्विधैश्चान्यैर्वटका नवधा मताः
॥ १८ ॥ वज्रप्रभा तु कणिका चारुबीजसुपाचकैः ॥ शकलैर्नारिकेलस्य लवंगशतसंयुताः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृतक्षीरसिताद्यास्ता कटाहे सुप्रलोडिताः ॥ लड्डा सितादिकूसररम्या स्निग्धाश्च फेनिकाः ॥ २० ॥ पराकिकासु वै पक्काः कृताश्चंद्रेण पोलिकाः ॥ मोदकास्तत्र वै कार्याश्चारुबीजभवाः परे ॥ २१ ॥ सितया सहिताः कार्या अन्ये दुग्धेन निर्मयेत् ॥ नारिकेलफलैश्चान्ये वृक्षनिर्यासनिर्मिताः ॥ २२ ॥ बदामैश्च शुभाश्चान्ये तिलैश्च कणबीजकैः ॥ ईदृशान्मोदकांश्चान्यांस्तुष्टयर्थं मम कारयेत् ॥ २३ ॥ अर्शोघ्नमोचनीकंदं तथार्द्रकरमर्दकम् ॥ नारिंगं चिंचणीकं च कंकोलफलमेव च ॥ २४ ॥ दशारं त्रिपुरीजातं शुभं निंबफलं बिसम् ॥ तिंदूफलं लवंगं च श्रीफलं तिलकं लुती ॥ २५ ॥ वल्कलं वंशकारीरं तथा कायफलं बलम् ॥ द्राक्षाफलं चूतफलं रम्यं कंटकिनीफलम् ॥ २६ ॥ धात्रीफलं शक्तिभवं फलमंबाडवं तथा ॥ रंभाफलं पिप्पली च मरीचाश्च मनोहराः ॥ २७ ॥ शुद्धसर्षपतैलेन लवणेन सुवेधितम् ॥ तथा रजिकयाविद्धं त्रिभिर्वर्षैर्घटे स्थितम् ॥ २८ ॥ एवंविधानि जातानि व्यंजनादि च मानद ॥ कर्तव्यानि सहोमासे मम प्रीतिकराणि वै ॥ २९ ॥ एतादृशे भोजने चेदसामर्थ्यं भवेद्यदि ॥ एवं कार्यं तदा तेन संक्षेपेण शृणुष्व मे ॥ ३० ॥ लड्डूकमेकं घृतपूरमेकं फेनद्वयं कोकरसत्रयं च ॥ घृतप्लुतं मंडकषोडशानां

वटाष्टदायी नरकं न पश्येत् ॥ ३१ ॥ अर्धाढकं सुचिरपर्युषितं च दध्नः खंडस्य षोडश पलानि शशिप्रभस्य ॥ सर्पिःपलं मधुपलं मरिचं द्विकर्षं सूच्यापलार्धद्विपलं च फलं चतुर्णाम् ॥३२॥ श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टं कर्पूरधूलिधवलीकृतभांडसंस्था ॥ एषा शुभा रसवती प्रकरोति यो वै कामान् ददामि सकलान् मनुजस्य तस्य ॥ ३३ ॥ एवं निवेदनं कृत्वा फलतांबूलदक्षिणाः ॥ प्रदक्षिणा नमस्कारान् दत्त्वा पुष्पांजलिं तथा ॥ ३४ ॥ प्रार्थयित्वा जपं कृत्वा शंखोदपरिभ्रामणम् ॥ देवोच्छिष्टं च देयं सुभक्तेभ्यः प्रेमभावतः ॥ ३५ ॥ तीर्थं प्रसादं संगृह्य शेषं गंधं तु धारयेत् ॥ देवदत्तं भावयित्वा निर्माल्यं शिरसा वहेत् ॥ ३६ ॥ एवं पूजां सदा कृत्वा सुसुखी जायते नरः ॥ एवं कार्तिकमासे तु सहोमासे तथैव च ॥ ३७ ॥ पुष्पपूजा प्रकर्तव्या मंदिरं पुष्पसंभवम् ॥ मार्गशीर्षः पूर्णिमांतो ह्यस्मिन् कर्मणि गृह्यते ॥ ३८ ॥ यः पूजां पश्यते प्राज्ञो वेंकटेशस्य धीमतः ॥ सुपुण्याल्लभते सर्वं मनोभीष्टं न संशयः ॥ ३९ ॥ अध्यायश्रवणाद्वापि पठनाच्चिंतनादपि ॥ मनोरथाः प्रसिध्यंति सत्यं सत्यं वदाम्यहम् ॥ ४० ॥ इति श्रीदेवालयग्राममाहात्म्ये पूष्पनैवेद्यादिपूजावर्णनं नामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यास उवाच ॥ एवं श्रीव्यंकटेशस्य माहात्म्यं मनुवर्णितम् ॥ श्रवणात्सर्वपापानां हानिरस्योपजायते ॥ १ ॥ जैमिनिरुवाच ॥ ममेच्छा तु समुत्पन्ना चरित्रश्रवणे हरेः ॥ किं कृतं देवदेवेन कस्य रक्षणमद्भुतम् ॥ २ ॥ श्रीव्यास उवाच ॥ रक्षणं कुरुते देवः श्रीनिवासः सतां गतिः ॥ यो धर्मेण स्वकीयेन वर्तते मानवो भुवि ॥ ३ ॥ तस्य दुःखं हरत्येव भगवान् नात्र संशयः ॥ स्वग्रामे धर्मवान् यस्तु तद्रक्षा किमु वर्ण्यते ॥ ४ ॥ कोपि नीचोऽथवा जाया दीपदा निकषा प्रभोः ॥ मृत्युं जयति देवस्य कृपया श्रीरमापतेः ॥ ५ ॥ आम्नायास्नानमात्रं वै सप्तजन्माघनाशनम् ॥ पुष्करिण्यां तदधिकं तुलामासे ततः परम् ॥ ६ ॥ भावशुद्धया तु यत्स्नानं कुलकोटिं समुद्धरेत् ॥ तुलामासे सहोमासे माघे वैशाख एव च ॥ ७ ॥ पुष्करिण्यास्तु माहात्म्यं को ब्रूयाद्भुवनत्रये ॥ स एव वक्ता श्रोता च सह स्रवदनः स्वयम् ॥ ८ ॥ मल्लिकाकुसुमैः शुभ्रैः तत्कालीयैश्च पंकजैः ॥ अर्चयित्वाच्युतं विष्णुं पायसान्नं निवेदयेत् ॥ ९ ॥ निवेदयित्वा श्रवणद्वादश्यां पायसं हरेः ॥ भोजयेद्ब्राह्मणान् भक्त्या सार्वभौमोऽभिजायते ॥ १० ॥ द्वादशाब्दं कुरुक्षेत्रे भोजयेद्यो द्विजान् शुचीन् ॥ देवालयग्राममध्ये सकृद्ब्राह्मण-

भोजनात् ॥ ११ ॥ द्वादश्यां पायसं विप्रं या नारी पुत्रगृद्धिनी ॥ भोजयेत्पुत्रिणी सा स्यादीर्घमांगल्यमश्नुते ॥ १२ ॥ सज्ञाना विधवा च स्यादंते विष्णुपदं व्रजेत् ॥ अमावास्यासंक्रमेषु कन्यामासि रविग्रहे ॥ १३ ॥ व्यंकटेशस्य प्रीत्यर्थं किंचिदानं ददाति यः ॥ स ईश्वरप्रसादेन सर्वान्कामानवाप्नुयात् ॥ १४ ॥ इयं हि मंगला यात्रा कर्तव्या सर्वथा नृभिः ॥ गया कृष्णा तथा गोदा कावेरी नर्मदापि च ॥ १५ ॥ आसु स्नानं तथा श्राद्धं कुत्रचित् क्षौरमुच्यते ॥ व्यंकटेशस्य यात्रायां ग्रामे देवालयाभिधे- ॥ १६ ॥ क्षौरं श्राद्धं न किंचिद्वै स्नानं ब्राह्मणभोजनम् ॥ कार्योऽभिषेको देवाय देयं द्रव्यमनेकधा ॥ तेन सर्वपितॄणां च तृप्तिरक्षय्यकारिणी ॥ १७ ॥ दध्यान्नदानाद्वैशाखे माघे वस्त्रप्रदानतः ॥ द्वादश्यां तु तुलामासे पायसान्नप्रदानतः ॥ १८ ॥ ऊर्जे चित्रान्नदानाच्च दीपाराधनतो हरेः ॥ मार्गशीर्षे च मुद्गान्नमुषःकाले निवेदयेत् ॥ १९ ॥ चैत्रे पानकदानाच्च पितॄणामनृणो भवेत् ॥ ज्येष्ठे क्षीरस्य दानाच्च शुचौ भक्तप्रदानतः ॥ २० ॥ श्रावणे फेणिकादानं भाद्रे तु शर्करापयः ॥ आश्विने भक्ष्यलड्डूकान् रसालां

---

१ श्रीखंड ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौषमासके ॥ २१ ॥ व्यंकटेशप्रियां नित्यं फाल्गुने दधिकूर्चिकां[1]॥ दत्त्वा देवाय तेनैव ब्राह्मणान् भोजये-
त्सुधीः ॥२२॥ तेन संसारदुःखानामवश्यं हानिरुच्यते ॥ द्रव्यलाभः परं पुंसां दुष्टप्रारब्धनाशनम्॥२३॥
लुब्धो वा नास्तिको भ्रष्टो दरिद्रः पापयुङ् नरः ॥ श्रीव्यंकटेशदेवस्य दर्शनात्सुखमाप्नुयात् ॥ २४ ॥
मा गंगा यमुना रेवा मा सेतुर्मा च पुष्करम् ॥ माब्धिगंगासंगमश्च मा प्रयागो हिरण्वती ॥
॥ २५ ॥ न द्वारका न चायोध्या बदरी नच नैमिषम् ॥ मा गौतमी मा मथुरा मा गोकर्णं च कौ[2] वरम्
॥ २६ ॥ यथा देवालये पुण्या नदी पुष्करिणीति च ॥ पुष्करिणी सदा ब्रूते शृणुतेदं वचो जनाः
॥ २७ ॥ मा भैष्ट यूयं हे पापाः कदा स्यात्पापनिष्कृतिः ॥ नरकेषु पतिष्यामः इति चिंतापि मास्तु
वः ॥ २८ ॥ स्नानं कुर्वंतु मत्तीर्थे ह्युद्धरेयमहं सदा ॥ कलौ बाहू समुद्धृत्य गर्जत्येवं नदी च सा ॥ २९ ॥
एवं नदी पुष्करिणी देवालयपुरस्थिता ॥ व्यंकटेशस्य परमतेजसा संयुता सती ॥ ३० ॥ तारयत्यति-
पापिष्ठान् तस्माद्देवप्रियं कुरु ॥ दानं देहि द्विजातिभ्यः स्नानं कुरु महामते ॥ ३१ ॥ इममध्यायश्रवणं

१ दधिमलयी । २ दक्षिणे प्रसिद्धा । ३ भूमौ ।

सदैव पठ भो सुत ॥ तव शक्तिर्भवेद्धन्या लोके ख्यातिमुपैष्यसि ॥ ३२ ॥ इति श्रीदेवालयग्राममाहात्म्ये
मासदानतीर्थवर्णनं नाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ श्रीशिव उवाच ॥ शृणु पुत्र
प्रवक्ष्यामि धर्माराधनतः स्वयम् ॥ यथा प्रसीदते देवो व्यंकटेशः सुखप्रदः ॥ १ ॥ अनादाविह संसारे
देवः संपूजितः स्वयम् ॥ परिपाल्यते घोरे संकटे दुःखहा प्रभुः ॥ २ ॥ तस्य प्रीत्यर्थकर्माणि दानानि
शृणु सत्तिथौ ॥ प्रतिपत्तिथिमारभ्य क्रमाद्वच्मि तवानघ ॥ ३ ॥ प्रतिपत्तिथिमासाद्य देवमाज्येन पूज-
येत् ॥ घृतं दद्याद्ब्राह्मणाय रोगहीनो भवेत्सदा ॥ ४ ॥ द्वितीयायां शर्करया दीर्घायुर्जायते नरः ॥ तृती-
यादिवसे दुग्धं तेन दुःखातिगो भवेत् ॥ ५ ॥ अपूपाश्च चतुर्थ्यां वै विघ्ननाशः प्रजायते ॥ पंचम्यां कदलीदा-
नान्मेधावान्पुरुषो भवेत् ॥ ६ ॥ षष्ठीतिथौ मधु प्रोक्तं सप्तम्यां गुडमेवच ॥ नारीकेलमथाष्टम्यां नवम्यां
लाजमेव च॥ ७॥ कृष्णान् तिलान्दशम्यां तु दत्त्वा यमभयं नहि ॥ एकादश्यां दधिप्रीतिर्पृथुकान् द्वादं-
शीतिथौ ॥ ८ ॥ त्रयोदश्यां तु चणकान् सक्तुदाने चतुर्दशी ॥ पायसं पूर्णिमायां तु त्वमावास्यां तदेव
तु ॥ ९ ॥ तत्तत्तिथ्युक्तवस्तूनामशेषारिष्टनाशनम् ॥ मुख्योपचारो नैवेद्यः पूजाकर्मणि प्रोच्यते ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवेद्यं पूजयित्वा तु दत्त्वा देवाय भक्तितः ॥ ब्राह्मणाय तथा दानं सदक्षिणमघापहम् ॥ ११ ॥ रविवारे पायसं च सोमवारे पयः स्मृतम् ॥ भौमे बुधे च कदली नवनीतं नवं सुत ॥ १२ ॥ गुरुवारे शर्करां च सितां भार्गववासरे ॥ शनिवारे घृतं गव्यं नैवेद्यं परिकीर्तितम् ॥ १३ ॥ तत्तद्दद्याद्ब्राह्मणाय श्रीशतोषाय जायते ॥ कार्तिके मार्गशीर्षे च पदार्थान् वच्मि ते सुत ॥ १४ ॥ आश्विने शुद्धनवमी दशमी विजयावहा ॥ कार्तिके दशमी शुद्धा द्वादशी पुण्यदा तिथिः ॥ १५ ॥ मार्गशीर्षे द्वादशिका पूर्णा चैव प्रकीर्तिता ॥ आसु देवाय विप्राय देयं ते कथयेऽधुना ॥ १६ ॥ घृतं तिलं शर्करां च दधि दुग्धं किलाटकम् ॥ दधिकूर्चीं मोदकं च फेणिकां घृतमंडकम् ॥ १७ ॥ कंसारं वटपत्रं च घृतपूरं सुमंडकम् ॥ कुंडलिनीं रसालां च तथा शिखरिणीं प्रियाम् ॥ १८ ॥ माषाणां वटकान् दद्यात् सुछिद्रानतिकोमलान् ॥ हयग्रीवं च नैवेद्यं चित्रान्नं शष्कुलीमपि ॥ १९ ॥ सहकाररसं श्रेष्ठं प्रियालघृतमिश्रितम् ॥ इक्षूणां च

१ रक्तशर्करा । २ सितशर्करा । ३ दुग्धमलयी । ४ दहीमलसी । ५ शक्करपारा । ६ सांजा । ७ पापड । ८ घोवर । ९ जिलिबी । १० श्रीखंड । ११ शिक्रण ।

रसं दद्याद्देवताप्रीतिहेतवे ॥ २० ॥ एभिर्वै देवदेवस्य तुष्टिः पुष्टिः प्रजायते ॥ एवं यो देवसान्निध्ये दीपदानं करोति च ॥ २१ ॥ अतीव श्रेष्ठतां याति मृत्युं जयति मानवः ॥ पुरा यथा सुशीला हि स्वपत्यू रक्षणं यमात् ॥ २२ ॥ अकरोद्देवकृपया तच्छृणुष्व महामते ॥ श्रवणादेव पापस्य लयो भवति भो सुत ॥ २३ ॥ पुरा पुष्करिणीवारिकणस्पृष्टश्च जंबुकः ॥ नष्टपापः क्षणादेव देवलोकमगाहत ॥ २४ ॥ इति श्रीदेवालयग्राममाहात्म्ये नानाविधनैवेद्यदानवर्णनं नामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ छ ॥

ॐ ॥ श्रीस्कंद उवाच ॥ कथं स जंबुको मुक्तः सुशीला च कथं पतिम् ॥ जीवयामास कथय मां पुत्र शिव हे पितः ॥ १ ॥ श्रीशिव उवाच ॥ पुरा देवालयग्रामे ब्राह्मणो वेदवित्तमः ॥ कालशर्मेति विख्यातः बहुपाठी बहुप्रजः ॥ २ ॥ आश्वलायनशाखीयः श्रौतस्मार्तविधानवित् ॥ सर्वशास्त्रार्थतत्त्वज्ञः खलानां संगतिप्रियः ॥ ३ ॥ परान्नभोक्ता स्वगृहे नतु भुंक्ते कदाचन ॥ तक्रादीनां च विक्रेता परस्त्रीकामुकः सदा ॥ ४ ॥ अतीव कृपणो दुष्टो धनसंग्रहतत्परः ॥ लोकैर्धिःकारितो ग्रामे निर्लज्जः स्वार्थसाधकः ॥ ५ ॥ तस्य भार्या सुशीला च भर्त्सितापि न कुप्यति ॥ पूर्वपुण्येन सा प्राप्ता भर्तृशुश्रूषणे रता ॥ ६ ॥ तस्मा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्प्रहारभीत्या तु संगृह्णात्यर्थमन्वहम् ॥ निपुणा गृहकृत्येषु बोधयामास तं पतिम् ॥ ७ ॥ मुहुर्मुहुः पुण्यकर्मकरणेऽपि स दुष्टधीः ॥ अतीव कोपनो जातः कृत्याकृत्येषु मुढधीः ॥ ८ ॥ कदाचिद्गुरवे दत्तमृणं वृद्ध्यभिकांक्षया ॥ तद्गृहीत्वा गुरुः प्रायात्सुनंदो नाम वै द्विजः ॥ ९ ॥ प्रयागं भार्यया सार्धं पुत्रे भारं निधाय च ॥ प्रयागमुत्तमं क्षेत्रं गत्वा कतिपयैर्दिनैः ॥ १० ॥ पंचत्वमभिपद्याथ मोक्षमार्गमुपेयिवान् ॥ भार्या च बंधुभिः सार्धं पुत्रांतिकमुपाययौ ॥ ११ ॥ तस्य श्रुत्वा तथापत्तिं तत्पुत्रं जगृहे कुधीः ॥ पिता ते स्वर्गतः पापी ह्यकृत्वा ऋणनिष्कृतिम् ॥ १२ ॥ ऋणं सवृद्धिकं देहि मा विलंबितुमर्हसि ॥ क्षणं न स्थीयते पुत्राऽगृहीत्वा तु न गम्यते ॥ १३ ॥ इत्युक्ते तेन शिष्येण गुरुपुत्रस्तमब्रवीत् ॥ कृत्वौर्ध्वदेहिकं कर्म यदेयं तच्च दीयते ॥ १४ ॥ क्षम तावन्महापत्तौ त्वादृशाः खलु बांधवाः ॥ त्वं हि शिष्यो मम पितुः मम बंधुस्त्वमेवहि ॥ १५ ॥ इत्युक्तेऽपि पुनः प्राह किमिदानीं न यच्छसि ॥ इदानीमेव मे देहि सवृद्धिकमृणं लघु ॥ १६ ॥ त्वमर्भको नार्जयितुं समर्थो न वा गृहे वास्ति पितुर्महद्धनं ॥ न विश्वसे त्वां चपलं युवानं तावत्त्वया देयमनर्घ्यवस्तु ॥ १७ ॥ इत्युक्तवंतं कृपणं महात्मा प्रत्युक्तवांस्ते त्वरया किमासीत् ॥

अहं च भार्या मम चैव माता त्वद्दास्यतामेत्य वसाम गेहे ॥ १८ ॥ इत्युक्ते गुरुपुत्रेण स दुष्टो वाक्यमब्रवीत् ॥ त्वं सभार्यः सुखं तिष्ठ चरन्क्वापि च मद्दणम् ॥ १९ ॥ प्रतिदेहि तु मद्दास्ये मातैषा तु विधीयताम् ॥ तदेतद्वचनं श्रुत्वा विस्मितो गुरुपुत्रकः ॥ २० ॥ मातैषा चावयोस्तात शिष्यं पुत्रेण पश्यति ॥ समं किं त्वं न जानासि मूढ तेस्थीयतां गृहे ॥ २१ ॥ दासी भवतु मे भार्या यावत्ते ऋणनिष्कृतिः ॥ तथास्त्विति च तेनोक्तं तां गृहीत्वा ययौ गृहम् ॥ २२ ॥ सर्वैर्निवारितो भार्यां गुरुपुत्रस्य गृह्य वै ॥ गृहे स्थितो भार्यया तु बोधितो न मुमोच ताम् ॥ २३ ॥ गुरोः स्नुषा कर्मकरा त्रिदिनं तस्य वै गृहे ॥ पतिव्रता महाभागा दुःखेन महता युता ॥ २४ ॥ गुरुपत्नी सुतं प्राह धन्यस्त्वं मातृरक्षकः ॥ शिवं करोतु ते नित्यं व्यंकटेशो दयानिधिः ॥ २५ ॥ मातुर्वचनमाज्ञाय स गत्वा देवमंदिरम् ॥ व्रतं निरशनं कृत्वा त्रिदिनं स्थितवानसौ ॥ २६ ॥ व्यंकटेशाज्ञया कोशादधिकारी धनं ददौ ॥ संतुष्टो गुरुपुत्रोऽसावृणं दत्त्वा सुखेन च ॥ २७ ॥ मोचयित्वा स्वपत्नीं च जनकस्य चकार सः ॥ भक्त्या च सुमहात्मासौ सकलं पारलौकिकम् ॥ २८ ॥ आनंदेन समायुक्ता माता पुत्रः स्नुषा तथा ॥ व्यंकटे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शस्य कृपया तस्थुस्ते सेवने रताः ॥ २९ ॥ सुशीलायास्तु वृत्तं वै भार्याप्रोक्तं स्वरक्षणम् ॥ श्रुत्वा श्वश्वूः पतिश्चैव तस्याः कल्याणचिंतनम् ॥ ३० ॥ कुर्वंति सर्वे सुहृदः साधूनां चित्तमीदृशम् ॥ दुष्टानां कालसमता मनसोऽतुष्टिरीरिता ॥ ३१ ॥ सतां संगेन दुष्टानां बुद्धि सन्मार्गगा भवेत् ॥ सुशीलासंगतः पापी भर्ता पुण्यकरोऽभवत् ॥३२॥ इतीदं चरितं श्रुत्वाऽधर्मं त्यक्त्वा शुभं कुरु ॥ सत्सेवामीशभक्तिं च कर्ता वै सुखमाप्नुयात् ॥ ३३ ॥ इति श्रीदेवालयग्राममाहात्म्ये कालब्राह्मणदुष्टकर्मवर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ॐ ॥ श्रीस्कंद उवाच ॥ सुशीलासंगतः पापी पतिः पुण्यमवाप्तवान् ॥ कथं कथयदेवेश श्रवणेच्छास्ति शंकर ॥ १ ॥ श्रीशिव उवाच ॥ एकांते पतिमासीनं शिरोरोगेण दुःखितम् ॥ अत्यंतं तापसंयुक्तं रुदंतं सा समाययौ ॥ २ ॥ उवाच दीनया वाचा किं दुःखं वद मां प्रभो ॥ काल उवाच ॥ प्रिये शिरसि मे शूलो भयदो दुःखकारकः ॥३॥ उत्तमं मरणं मन्ये न तु रोगस्य वेदनाम् ॥ किं करोमि प्रिये ब्रूहि शिरःशूलं निवारय ॥ ४ ॥ सुशीलोवाच ॥ अहं प्रणौमि भक्त्या त्वां विज्ञप्तिं शृणु मे प्रभो ॥ सुपुण्याज्जायते सौख्यं पापानां फलमीदृशम् ॥ ५ ॥ त्वया कृतानि पापानि बहूनि सुनृशंसवत् ॥

आगमिष्यंति कालेन फलानि दुःखदानि च ॥ ६ ॥ अत्युत्कटैः पुण्यपापैरिहैवं फलमश्नुते ॥ त्वया कृतं महत्पापमपराधी गुरोर्भवान् ॥ तेन ते मूर्धजा पीडा नरकं च गमिष्यसि ॥ ७ ॥ काल उवाच ॥ मुधा वदसि जाये त्वं पापमेव सुखप्रदम् ॥ दानवा दैत्यरक्षांसि पापेन सुखमाप्नुवन् ॥ ८ ॥ राज्ञः प्रीतिकरा ये च तान्रक्षति सदा नृपः॥ इदानीं तु कलिर्भूपस्तत्प्रियं पापकर्म च ॥ ९ ॥ स एव रक्षितास्माकं किं पुण्येन करिष्यसि ॥ पापमेव सदा कुर्यात् तेन मे धनसंग्रहः ॥ १० ॥ सुशीलोवाच ॥ अन्यायोपार्जितं द्रव्यं बहुकालं न तिष्ठति ॥ पापस्य फलकाले च समूलं च विनश्यति ॥ ११ ॥ पापद्रव्येण यद्दानं तदपि स्वल्पपुण्यदम् ॥ काल उवाच ॥ अमितद्रव्यलाभो वै मम पापेन कर्मणा ॥ १२ ॥ यदि पुण्येन मे पीडा नश्यति क्षणमात्रतः ॥ तदा करिष्ये वचनं तव मान्यं सदा प्रिये ॥ १३ ॥ सुशीलोवाच ॥ चम्त्कृतिं पुण्यजां त्वं पश्येदानीं सुखाय सा ॥ स्वकर्मणा त्वया पूर्वं कृतो यो धनसंग्रहः ॥ १४ ॥ तस्य व्ययेन विधिना पीडानाशो भविष्यति ॥ आज्ञां कुरु महाभाग तेनाज्ञप्ता तदाकरोत् ॥ १५ ॥ स्वर्णोपवीतं विप्राय धातृपूजनपूर्वकम् ॥ विप्राय वेदविदुषे पूजिताय सुभक्तितः ॥ १६ ॥ भर्तुः करेण सा प्रादात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्क्षणात्सा व्यथा गता ॥ श्रीशिव उवाच ॥ कालः संतोषमगमद्भार्यामाह प्रिये शृणु ॥ १७ ॥ सर्वं ज्ञातं हि कल्याणि दैवं हि बलवत्तरम् ॥ मयैतावत्प्रिये मौढ्याद्वासरा वितथीकृताः ॥ १८ ॥ इतः परं भवेद्धर्मो न भवेन्नरको मम ॥ तं धर्मं ब्रूहि मे शीघ्रं येन श्रेयोहमाप्नुयाम् ॥ १९ ॥ सुशीलोवाच ॥ धन्यस्त्वं खलु पुण्यस्त्वं सन्मार्गं ते ब्रवीम्यहम् ॥ प्रातरुत्थाय सुस्नात्वा प्रातःसंध्यामुपास्य च ॥ २० ॥ पूजां च व्यंकटेशस्य तर्पयेत्पितृदेवताः ॥ ब्रह्मयज्ञं वैश्वदेवं त्रिःसंध्योपासनं वरम् ॥ २१ ॥ अतिथीनां पूजनं च क्षुधितान्नदानकम् ॥ तृषिताय च पानीयं दद्यात्प्रेम्णा सुभक्तितः ॥ २२ ॥ व्यंकटेशप्रियार्थं च कार्यं कर्म प्रयत्नतः ॥ अश्वत्थारोपणं कार्यं सेवनं सर्वदाचरेत् ॥ २३ ॥ वर्धते तद्गृहे पुत्राः वर्धते च धनादिकम् ॥ सप्तप्रदक्षिणा येन क्रियंते भो दिनं प्रति ॥ २४ ॥ प्रदक्षिणीकृता भूमिः साब्धिद्वीपवनाचला त्रिमूर्तिरूपिणं वृक्षमश्वत्थं यः प्रपूजयेत् ॥ २५ ॥ धूपैर्दीपैः सुगंधैश्च स्रक्तांबूलफलांबरैः ॥ नैवेद्यैर्दक्षिणाभिश्च स नरो धनवान् भवेत् ॥ २६ ॥ न मध्याह्ने न सायाह्ने नापराह्णे न रात्रिषु ॥ मंदं विनान्यवारेषु न स्पर्शं कारयेद्बुधः ॥ २७ ॥ मंदवारेऽश्वत्थपूजां स्पर्शं कृत्वा करोति यः ॥ लक्ष्मीलाभो भवेत्तस्यान्यवारे

दुःखभाग् भवेत् ॥ २८ ॥ भानुवारेऽभिषेक्ता यः सोऽक्षिरोगाद्विमुच्यते ॥ गुरुवारेऽभिषेकेण लभेत्कन्यां सुधीः शुभाम् ॥ २९ ॥ शनिवारेऽश्वत्थवृक्षं स्पृष्ट्वा मंत्रं शनेर्जपन् ॥ सार्धसप्तसमा पीडा शनिजा न भविष्यति ॥ ३० ॥ कुंजराशनच्छायायां[1] स्नानेन गांगजं फलम् ॥ मृत्युंजयस्य मंत्रं वै जप्त्वा मृत्युर्विनश्यति ॥ ३१ ॥ ब्रह्मोवाच ॥ कालशर्माथ सद्बुद्ध्या भार्यया बोधितो द्विजः ॥ तथैव चक्रे सत्कर्म जरठो विजितेंद्रियः ॥ ३२ ॥ अश्वत्थस्थापनं कृत्वा कृत्वा वेदीं मणिप्रभाम् ॥ सिषेवे रंगवल्याद्यैर्वर्धयन् शोभनार्हणैः ॥ ३३ ॥ प्रातःस्नायी बोधिसेवी जलसेचनतत्परः ॥ दर्शनं व्यंकटेस्य नित्यं तीर्थस्य सेवनम् ॥ ३४ ॥ तस्य भार्या सती शुद्धा नित्यं भर्तृहिते रता ॥ पत्यायुषोऽभिवृद्ध्यर्थं दीपदा निकटे प्रभोः ॥ ३५ ॥ प्रार्थयामास तन्वंगी सौभाग्यार्थं रमापतिम् ॥ प्रदक्षिणां नमस्कारानन्वहं कुरुते सती ॥ ३६ ॥ यदिष्टं भोजने भर्तुस्तत्संपाद्य समर्पयत् ॥ भर्तारं भर्गमेवेति ध्यायंती सततं शुचिः ॥ ३७ ॥ नमस्करोत्यनुदिनं गुरुवृद्धान् सतो द्विजान् ॥ मध्याह्नकाले ह्यतिथीन् भिक्षुकान् सत्करोति सा ॥ ३८ ॥ वैश्वदेवार्थमन्नं

---

१ अश्वत्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा देवब्राह्मणकारणात् ॥ पचंती शुद्धमनसा धनाद्यैः पत्यनुज्ञया ॥ ३९ ॥ पगूंनधान् दरिद्रांश्च पोषयंती सुखेन सा ॥ एवंभूता महाभागा मध्याह्नेऽतिथिभिक्षुकान् ॥ ४० ॥ भोजयित्वा सती भर्तुः पर्यवेषयदेकदा ॥ एतस्मिन्नन्तरे याता वैवस्वतनियोजिताः ॥ ४१ ॥ कालशर्मगृहं प्राप्ता एतद्ग्रहणतत्पराः ॥ पातिव्रत्यप्रभावेण सुशीलायाः प्रधाविताः ॥ ४२ ॥ दह्यमानाश्च तेजोभिर्यमं प्राहुः समीपगाः ॥ गन्तुं न शक्तास्तद्गेहं धाविताः स्मो गृहान्तरम् ॥ ४३ ॥ सुशीलातेजसा दग्धा विद्रुताः स्मो दिशो दश ॥ एतद्वाक्यं यमः श्रुत्वा चित्रगुप्तमथाब्रवीत् ॥ ४४ ॥ क्षीणायुः कालशर्मा वै पापैर्दुर्भोजनादिभिः ॥ किंकराश्च विनिर्वृत्तास्तद्भार्यातेजसा हताः ॥ ४५ ॥ चित्रगुप्त जवाद्गत्वा कालशर्माणमानय ॥ इत्युक्तश्चित्रगुप्तोऽपि कालशर्मगृहं गतः ॥ ४६ ॥ भीतोऽन्तिकेऽवतस्थेऽस्य सुशीलायारसन्निधौ ॥ साध्विदं व्यंजनं सुभूर्दीयतां मे निशाभुजे ॥ ४७ ॥ इति द्विजवचः श्रुत्वा चित्रगुप्तो जहास च ॥ सुशीला तद्ध्वनिं श्रुत्वा नाप श्यत्कंश्चिदंतिके ॥ ४८ ॥ किमिदं क इहायातः केवलं श्रूयते ध्वनिः ॥ इति विस्मयमापन्ना हास्यमूलमचिन्तयत् ॥ ४९ ॥ व्यास उवाच ॥ इत्थं दीपस्य पुण्येन यमदूता भयं गताः ॥ चित्रगुप्तोऽपि गुप्तोऽभूत्कि-

माश्चर्यमतः परम् ॥ ५० ॥ अतो देवाय देयो वै दीपो नित्यं स्वकर्मणा ॥ तेन मृत्योर्विनाशः स्याच्छ्रवणादपि तत्फलम् ॥ ५१ ॥ इति श्रीदेवालयग्राममाहात्म्ये कालशर्मब्राह्मणमृत्युसमयवर्णनं नाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ जैमिनिरुवाच ॥ भो तारक गुरो मह्यं कथं त्वग्रे कथानकम् ॥ सुशीला किं चकाराथ शंस ह्येतन्महामते ॥ १ ॥ व्यास उवाच ॥ सुशीलया व्यंकटेशस्मरणं कृतमंजसा ॥ हास्यं केन कृतं तेन देयं दर्शनमद्भुतम् ॥ २ ॥ तदर्थं सा सती तस्मिन्क्षणे हि शपथान् जगौ ॥ पूजितश्चेन्मया रुद्रः पातिव्रत्यं ममास्ति चेत् ॥ ३ ॥ यद्यहं पतिभावा स्याम् कुरुतां शब्दकारणम् ॥ भर्तैव दैवतं नार्या इति सत्यं वचः सताम् ॥ यदातिथ्यं सदा कुर्यां कुरुतां शब्दकारणम् ॥४॥ यच्च किंचित् जगत्तस्मिन् दृश्यते श्रूयतेऽपि वा ॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ ५ ॥ स एव व्यंकटेशोऽभूद्ग्रामे देवालयाभिधे ॥ तस्य दर्शनमाहात्म्याद्दृश्यते हास्यकारकः ॥ ६ ॥ नारायणपरो ज्योतिरात्मा नारायणः परः ॥ इत्येषा चेच्छ्रुतिः सत्या कथ्यतां हास्यकारणम् ॥ ७ ॥ इत्थं सुशीलाशपथाकुलं वचः स चित्रगुप्तोऽपि निशम्य विस्मितः ॥ मध्यस्थ इत्थं यमशासयंत्रितो व्यदृश्यतास्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरतः शुचिस्मितः ॥ ८ ॥ तं दीप्तिमन्तं मधुराकृतिं शुभं विचित्रदिव्याभरणैरलंकृतम् ॥ वैश्वानरोऽयं हरिदश्व एव हरो हरिर्वा बहुधात्यचिन्तयत् ॥ ९ ॥ चिन्तयन्त्यथ निश्चित्य पातिव्रत्यप्रभावतः ॥ चित्रगुप्त इति क्षिप्रं भर्त्रानयनकारणात् ॥ १० ॥ आगतोऽयमिति ज्ञात्वा प्रणनाम पतिव्रता ॥ प्रणमंतीं च तां दृष्ट्वा कांतां कांचनसुप्रभाम् ॥ ११ ॥ दृष्ट्वाथ चित्रगुप्तोऽसावाशीर्वचनमुक्तवान् ॥ भद्रे सौभाग्यवती भव दीर्घसुमंगला ॥ १२ ॥ तद्वाक्यं मंगलं श्रुत्वा सौमंगल्यं ममागतम् ॥ आनंदेन समायुक्ता पूज्यं तं समपूजयत् ॥ १३ ॥ अवोचच्च वचो देव कस्मात्कुतः समागतः ॥ किमर्थं वद मे शीघ्रं किमर्थं हास्यमुच्यताम् ॥ १४ ॥ यमाज्ञयाहमायातश्चित्रगुप्तस्त्वदन्तिके ॥ तव भर्ता गतायुष्कस्तं नेतुमागमो मम ॥ १५ ॥ व्यास उवाच ॥ इति श्रुत्वा वचः साध्वी सांजलिः प्राह तं प्रभुम् ॥ सौमंगल्यं त्वया दत्तं परिपालयमेऽधुना ॥ १६ ॥ इत्युक्तो व्रीडितः किंचिच्चित्रगुप्तोऽब्रवीच्च ताम् ॥ त्वद्भर्त्रानयनायाहमागतो भवनं तव ॥ १७ ॥ नमन्तीं भवतीं दृष्ट्वा स्वाशीरूपं वचोऽब्रवम् ॥ अभिवादयतो ज्येष्ठो नाशीर्वाक्यं ब्रवीच्च यः ॥ तस्यायुः क्षीयते सद्यराशिषा योजयेच्च तान् ॥ १८ ॥ भद्रेष्वनुपनीतं तु प्रणतं श्रोत्रियो

गुरुः ॥ आयुष्मान् भव मेधावी इत्याशिषमुदाहरेत् ॥ १९ ॥ वर्णिनं वा गृहस्थं वा प्रणमंतं त्रिवार्षिकम् ॥ आयुष्मान् भव सौम्येति नामकर्मानु[1] तं वदेत् ॥ २० ॥ कन्यकां प्रणतां विप्रः सम्यग्भर्तृमती भव ॥ ऊढां नमन्तीं प्रवदेद्भव दीर्घसुमंगला ॥ २१ ॥ प्रणतां विधवां ब्रूयात्सम्यग्ज्ञानवती भव ॥ इत्येवमाशिषो भेदा एताद्विद्वान् सुखी भवेत् ॥ २२ ॥ नमस्कारस्य वै भेदः साष्टांगस्त्वंगपंचकः ॥ सामान्यः सांजलिः प्रोक्तः षट्कोण[2]श्च त्रिकोणकः ॥ उपसंग्रहणं मुख्यं गुर्वादीनभिवादने ॥ २३ ॥ तस्मान्नमंतीं त्वां दृष्ट्वा ह्यहमाशिषमब्रुवम् ॥ सौमंगल्यं मया दत्तं दीर्घायुस्ते पतिर्भवेत् ॥ २४ ॥ तथोपायं करिष्यामि येन सत्यं वचो मम ॥ त्वया नित्यं हि यो दीपो व्यंकटेशाय चार्पितः ॥ २५ ॥ स्वामिपुष्करिणीस्नानं कार्तिके यत्त्वया कृतम् ॥ तयोरेकदिनं पुण्यं भर्तुरायुष्यवृद्धये ॥ २६ ॥ देहि तेऽहं पतिं धर्मात् प्रत्यानेष्ये न संशयः ॥ सुशीलोवाच ॥ निष्कारणं किमर्थं त्वमहसो ह तदुच्यताम् ॥ २७ ॥ चित्रगुप्त उवाचैनामिति पृष्टः सुशीलया ॥ पापनष्टायुषं भद्रे त्वत्पतिं नेतुमागतः ॥ २८ ॥ मरिष्यतेऽद्य ते भर्ता

---

१ मो आयुष्मान् भव देवदत्तेति । २ कालिकापुराणे द्रष्टव्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणादेव न संशयः ॥ एतन्मरणमज्ञात्वा वर्तमान इव द्विजः ॥ रात्रौ मे दीयतामिष्टं वक्ति त्वामिति चाह-
सम् ॥ २९ ॥ इमे पुत्रा मया पोष्या इदं कार्यं गृहं शुभम् ॥ भार्येयं रक्षणीया मे कर्म कृत्वा विनिंदि-
तम् ॥ ३० ॥ मयि स्थिते गृहे तूष्णीममीषां का गतिर्भवेत् ॥ संसारपाशबद्धेन भ्रामितः सर्वतो दिशम्
॥३१॥ संचाराक्षमकाले तु सदाचारविवर्जितः ॥ इंद्रियेष्वथ नष्टेषु व्याधिग्रस्तः प्ररोदति ॥३२॥ रुदन्तं
पुत्र पुत्रेति भयाद्रक्षेति वादिनम् ॥ मूढ क्रोशसि किं तूष्णीमिति निंदन्ति बांधवाः ॥ ३३ ॥ ततः क्रो-
शति मूढात्मा न कृतं पारलौकिकम् ॥ अणुमात्रं च न कृतं कुत्र गन्तव्यमित्यहो ॥ ३४ ॥ अशनं नास्ति
गच्छेति लोभाद्भिक्षुर्निराकृतः ॥ इतः परंतु किंचिद्वा कर्तव्यः पुण्यसंचयः ॥ ३५ ॥ इत्यशक्तं तत्करणे
बंधुत्यक्तं सुदुःखितम् ॥ यमो गृह्णाति रंध्रेच्छुर्मार्जारो मूषकं यथा ॥ ३६ ॥ त्यक्त्वा तु ममतां धीरैः
कर्तव्यो धर्मसंग्रहः ॥ आम्नायास्नानदानेन त्वया दत्तेन भामिनि ॥ ३७ ॥ मदनुग्रहतो भद्रे चिरायुर्भ-
विता पतिः ॥ रक्षांगं याममात्रं त्वं प्रत्यानेष्ये तव प्रियम् ॥ ३८ ॥ कालशर्माथ तद्भर्ता ह्यज्ञात्वा ह प्रियां
द्विज ॥ तत्र मे दीयतां शीघ्रं गन्तव्यं कृषिवृद्धये ॥३९॥ इत्येवं च पुनः प्राह कालशर्मातिवेगतः॥ कंठा-
शननिरोधं तु व्याजीकृत्य क्षणेन वै ॥ ४० ॥ द्विजं गृहीत्वा पंथानं प्रायात्संयमनीं प्रति ॥ अधोत्तमर्णौ
मार्गे तं रुद्धातौ चर्मकारकौ ॥ ४१ ॥ दुरात्मन् कुत्र यासि त्वमद्य मध्यस्थमागतः ॥ पादरक्षां गृहीत्वासौ
पूर्वं द्रव्यं न दत्तवान् ॥ ४२ ॥ तां पादरक्षां देह्यद्य नो चेद्गंतुं न शक्यते ॥ चित्रगुप्तस्तु तावाह तन्मूल्यं
दीयते मया ॥ ४३ ॥ विप्रोऽयं गच्छतु स्वार्थं गृहीत्वा गच्छतं युवाम् ॥ तमूचतुः पुनर्वाक्यं चर्मकारौ
नयान्वितौ ॥ ४४ ॥ क्षुद्भारणाय विक्रीतं पादरक्षाद्वयं पुरा ॥ तत्काले नच नो दत्तं द्रव्यं दृष्ट्वा शपत्यसौ
॥ ४५ ॥ इदानीमेव दास्ये वां परं कार्यं महत्तरम् ॥ पुनर्दृष्टे तु तत्पश्चाद्गृहं यावो बहिःस्थितौ ॥ ४६ ॥
मास्तु द्रव्यमिदानीं नो चर्मावाभ्यां प्रदीयताम् ॥ गोघ्नः स्त्रीघ्नो द्विजघ्नश्च पापिनोऽन्ये च ये परे ॥ ४७ ॥
प्रायश्चित्तेन शुद्धेरन् ऋणग्रस्तस्य नैव तत् ॥ प्रत्यर्पणं तु द्रव्यस्य प्रायश्चित्तमिति श्रुतम् ॥ ४८ ॥
अन्यथा नरकानेव व्रजेदाभूतसंप्लवम् ॥ इदानीं पुत्रतां गत्वा भोक्षावोऽस्य गृहे धनम् ॥ ४९ ॥ इत्युक्त-
वन्तौ तौ क्रोधात् प्रहर्तुं प्रोद्यतौ द्विजम् ॥ एतस्मिन्समये तावत् कुमारौ ब्रह्मचारिणौ ॥ ५० ॥ तत्रा-
गम्य च संवादं तावब्रूतां वचः शुभम् ॥ पूर्वोपकर्तुरस्यावां कुर्वः प्रत्युपकारकम् ॥ ५१ ॥ अनेन वां तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं देयं दास्यावोऽद्य तदुच्यताम् ॥ चर्मकारावूचतुः ॥ पादरक्षां गृहीत्वासौ तद्द्रव्यं नच दत्तवान् ॥ ५२॥
तद्द्रव्यं मास्त्विदानीं नो चर्मावाभ्यां प्रदीयताम् ॥ इति चर्मकृतोर्वाक्यं श्रुत्वा ब्रूतां च वर्णिनौ ॥ ५३ ॥
अलभ्ये ते पादरक्षे आवाभ्यां तत्प्रदीयते ॥ विप्रो गच्छतु शुद्धात्मा विमुक्तो ऋणबंधनात् ॥ ५४ ॥
दीयतां चर्म चेत्युक्तौ निकृत्योर्वास्तयोः स्वयम् ॥ तौ हि प्रददतुश्चर्म वर्णिनौ चर्मकारयोः ॥ ५५ ॥ पाद-
रक्षासमं चर्म दत्तं च तुलया धृतम् ॥ गृहीत्वा चर्मकारौ तौ गतौ वै स्वगृहं परम् ॥ ५६ ॥ कालशर्मा
विस्मयेन बभाषे कौ युवामिति ॥ अव्याजेन हि वात्सल्यान्मयि स्नेहो निपातितः ॥ ५७ ॥ दयाल्वोर्यु-
वयोः को वा उपकारः पुरा कृतः ॥ कदा हि संगतिस्तस्माद्भवतोर्मे तदुच्यताम् ॥ ५८ ॥ साधूनां सम-
चित्तानां सर्वत्र करुणात्मनाम् ॥ पापौघो नश्यति क्षिप्रं यथाहिर्गरुडेक्षणात् ॥ ५९ ॥ तौ ब्रह्मचारिणावू-
चतुः ॥ त्वया संवर्धितौ पूर्वमावामश्वत्थभूरुहौ ॥ प्रत्यहं जलसेकेन रक्षितौ सेवितौ द्विज ॥ ६० ॥ प्रार्थय-
न्पापनाशं च सप्त प्रदक्षिणाः कृता ॥ मंदवारे विशेषेण सेवनं कृतमावयोः ॥ ६१ ॥ तदिदानीमनुस्मृत्य
आवां रक्षणतत्परौ ॥ दत्तं यच्चर्म प्रत्यक्षं भूमौ गत्वा निरीक्षासि ॥६२॥ त्वग्विहीनौ त्वया दृष्टौ पुनर्द्रक्ष्यसि

त्वग्युतौ ॥ इत्युक्त्वान्तर्दधाते तौ चित्रगुप्तोऽब्रवीद्वचः ॥६३॥ इदानीं मम तुष्टयर्थं स्तोत्रमेतत्पठस्व च॥
आशीर्गृहीत्वा त्वं पुण्यं पुनर्भूमौ कुरुष्व ह ॥६४॥ ब्रह्मोवाच ॥ उपदिश्य स्तवं श्रेष्ठं पुनर्विप्रमथाब्रवीत् ॥
मया नीतो यमस्य त्वं पार्श्वे तस्मै नमस्कुरु ॥ ६५ ॥ पतित्वा दण्डवद्भूमौ दृष्टमात्रेण भूसुर ॥ प्रसाद-
यैनं स्तोत्रेण तुष्टो दास्यति ते वयः ॥ ६६ ॥ तवाशीर्वादरूपेण दीर्घमायुर्भविष्यति ॥ चित्रगुप्तो वद-
न्नेवं तं निनाय यमान्तिकम् ॥ ६७ ॥ अवधार्य स्तवं विप्रो नीतः संयमनीपुरीम् ॥ सभास्थं धर्मराजानं
दूरादेव ददर्श ह ॥ ६८ ॥ महार्हनवरत्नाभस्फुरत्सिंहासने स्थितम् ॥ भासमानं किरीटेन भानुभासा
महाप्रभम् ॥ ६९ ॥ विलसद्रत्नसूत्राभ्यां केयूरकटकान्वितम्॥ मंजुमाणिक्यरत्नाढ्यं मुक्ताहारमनोहरम् ॥
॥ ७० ॥ तप्तहाटकवर्णाभ्यां कुण्डलाभ्यां लसन्मुखम् ॥ धर्माधर्मविचारज्ञं मुनिभिः परिवारितम् ॥
॥ ७१ ॥ स्फुरत्कंकणहस्ताभ्यां दिव्यस्त्रीभ्यां च विजितम् ॥ किंचिच्चलोरुहारं च चामराभ्यां सुवीजितम्
॥ ७२ ॥ ब्राह्मणैः पूर्वपुण्याढ्यै राजवैश्यैः समावृतम् ॥ महाराजं यमं दृष्ट्वा किंचिद्भीतो महीसुरः ॥ ७३ ॥
पतित्वा दण्डवद्भूमौ तुष्टावायुर्विवर्धये ॥ इति देवालयग्राममाहात्म्ये चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालशर्मोवाच ॥ धर्मराज नमस्ते तु साक्षाद्धर्मस्वरूपिणे ॥ धर्मिष्ठ शान्तरूपाय सत्यरूपाय ते नमः ॥ १ ॥ यमाय मृत्यवे तुभ्यं कालाय च नमो नमः ॥ सूर्यपुत्र नमस्तुभ्यं सर्वभूतक्षयाय ते ॥ २ ॥ साधूनां पितृतुल्याय वचसामृतदायिने ॥ कटकांगदकेयूरहारनूपुरधारिणे ॥ ३ ॥ दूरादेव सतो दृष्ट्वा निजाचारपरिप्लुतान् ॥ अर्चसे पुष्पगंधाद्यैः प्रत्युत्थानासनार्हणैः ॥ ४ ॥ मध्यस्थाय नमस्तुभ्यं तत्वज्ञाय नमो नमः ॥ ददते निजसर्वस्वं साधूनां समदर्शिनाम् ॥ ५ ॥ देवदेव नमस्तुभ्यं सर्ववेदान्तदर्शिने ॥ सुकृतं दुष्कृतं पूर्वजातं पाथेयमत्र हि ॥ ६ ॥ स्वर्लोकं गच्छत क्षिप्रमिति सत्कृत्य वादिने ॥ नमस्ते पितृरूपाय भक्तानामभयंकर ॥ ७ ॥ कमलाकान्तभक्ताय कमलोदरचक्षुषे ॥ कमलोद्भवभव्याय कमलाभासकत्विषे ॥ ८ ॥ नमो लावण्यनिधये नमस्ते करुणाब्धये ॥ पापानां घोररूपाय गर्जते दुर्जनाग्रतः ॥९॥ दंष्ट्राकरालभ्रुकुटीभीषणानन ते नमः ॥ ऊर्ध्वरोम्णे महारोम्णे दीर्घरोम्णे नमो नमः ॥१०॥ घंटारव महाचण्ड कालदण्डाय चण्डिने ॥ दंड्यान् दण्डयते नित्यमुग्रदण्डाय ते नमः ॥ ११ ॥ कोदण्डकालदण्डादिपरश्वधवरायुधान् ॥ धारिणे मारणे लोकान् पुण्यशीलस्वरूपिणे ॥ १२ ॥ ग्रहणे सर्वलोकानां जागरूकाधिकारिणे ॥ दिव्यज्ञानप्रशस्ताय समस्तांगाय ते नमः ॥ १३ ॥ व्यस्तरूपैः समस्तैश्च समस्ताकृतये नमः ॥ चतुर्हस्ताय साधूनां चतुरास्याय ते नमः ॥ १४ ॥ समस्तलोकवंद्याय समस्तात्मस्वरूपिणे ॥ कालाम्बुद महानिलमहामहिषवाहन ॥१५॥ कल्पानलमहार्सिधूज्ज्वलल्लोचन ते नमः ॥ भयंकराय पापानामभयाय सतां नमः ॥ १६ ॥ द्रवत्सुधांशुसंपूर्णचंद्रास्याय महात्मनाम् ॥ प्रलयांबुधिनिर्घोषभीषयित्रे सुदर्शने ॥ १७ ॥ गोभ्यां कारुण्यपूर्णाभ्यां पश्यते सुकृतात्मनः ॥ तत्वाय तत्वरूपाय तत्वद्रष्ट्रे नमोनमः ॥ १८ ॥ अतीवगर्जत्प्रलयांबुदध्वनिप्रमूर्च्छिताशेषदिगंतराय ॥ छिंधीति भिंधीति च चूर्णयेति वक्रं सतो धीक्ष विभो नमस्ते ॥ १९ ॥ कशालकायाय कठोरवाचा पापिष्ठजन्तून् भृशं भीषयित्रे ॥ ज्वलद्युगान्तोपमवाडवाग्निसमोर्ध्वरोम्णे परपीडकानाम् ॥ २० ॥ विषोल्बणाभीषणकृष्णसर्पदंष्ट्राभिघातासि विमोहयित्रे ॥ भक्तार्तिनाशाय सदा नमस्ते नमोऽस्तु ते देववर प्रसीद ॥ २१ ॥ साधुमित्राय ते मित्रमित्रपुत्राय ते नमः ॥ शांतगात्राय शांतानामुरुगाय महौजसे ॥ २२ ॥ पूजामात्रातितुष्टाय भक्ताभीष्टप्रदायिने ॥ शिपिविष्ट नमस्तुभ्यं नमस्ते परमेष्ठिने ॥ २३ ॥ वाचा प्रीणयते साधून्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूज्यान् पूजयते नमः ॥ प्रदात्रे साधुसल्लोकानपहर्त्रे सतां भयम् ॥ २४ ॥ धर्मशास्त्रस्वरूपाय न्यायशास्त्रार्थचक्षुषे ॥ वृकोदर नमस्तुभ्यं यमुनासोदराय च ॥ २५ ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ २६ ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥ २७ ॥ भूयो भूयो नमस्तुभ्यं भक्तरक्षण ते नमः ॥ ब्रह्मोवाच ॥ कालशर्मातिधर्मिष्ठः स्त्रोत्रधर्माभिरक्षितः ॥ २८ ॥ तमित्थं मंदहासेन धर्मराजं ननाम सः ॥ इति स्तुत्वा यमायाथ प्रणनाम पुनः पुनः ॥ २९ ॥ इति विप्रस्तुतः शास्ता संतुष्टो विप्रनंदनम् ॥ प्रजहर्ष भृशं सम्यक् प्रजानां परिपालकः ॥ ३० ॥ दुंदुभिस्वननिर्घोषः स्वनेनाघोषयन् दिशः ॥ आयुष्मान् भव सौम्य त्वमाशीर्वादमुदाहरत् ॥ ३१ ॥ न्यवेदयच्चित्रगुप्तो धर्मराज्ञे[1] महीयसे ॥ बभाषे कालशर्माणं हर्षेण तरणेः सुतः ॥ ३२ ॥ ईषदुत्स्मयमानः सन् स्तुतिप्रीतो दयानिधिः॥ दीर्घायुषं तं च कृत्वोवाच धर्मः स्वमंदिरम् ॥ ३३ ॥ गच्छ पुण्यं कुरुष्व त्वं पापबुद्धिं च मा कृथाः॥ इदं पापहरं स्तोत्रं पुण्यं मृत्युहरं शुभम्॥३४॥

१ धर्म एव राजा तेन राज्ञे इति प्रयोगः ॥

गुह्याद्गुह्यतमं स्तोत्रमायुष्यं चैव द्रव्यदम् ॥ अनेन स्तोत्रवर्येण यो मां स्तौति दिने दिने ॥ ३५ ॥ सर्वरोगविनिर्मुक्तो दीर्घायुष्यं समश्नुते ॥ किंच वक्ष्ये रहस्यं ते प्रभावो वर्ण्यते किमु ॥ ३६ ॥ जन्मर्क्षे वा मृताहे वा योऽनेन स्तौति मां शुचिः ॥ स स्यान्निरोगी दीर्घायुस्तत्कुले नापमृत्यवः ॥ ३७ ॥ अस्य स्तोत्रस्य पठनाच्छ्रवणाच्च सुखं बहु ॥ कालब्राह्मण उवाच ॥ केन पुण्यप्रभावेन दीर्घायुष्यं ममागतम् ॥३८॥ केन पापफलेनाद्य नष्टान्यायूंषि मे प्रभो ॥ तव त्वविदितं नास्ति सर्वं विस्तरतो वद ॥ ३९ ॥ यम उवाच ॥ परान्नादनदोषेण निरग्नित्वाच्च सर्वदा ॥ अभक्ष्यभक्षणाच्चैव त्वमल्पायुर्द्विजाभवः ॥ ४० ॥ जायया तव दीपस्य नित्यं दानं प्रभोरुप ॥ तथा पुष्करिणीस्नानाद्व्यंकटेशस्य दर्शनात् ॥ ४१ ॥ तेन पुण्यप्रभावेन दीर्घायुस्ते समागतम् ॥ तस्मादाचारवान् भूया नास्ति धर्मवतां भयम् ॥ ४२ ॥ पापाः पापगतिं यांति संतः सद्गतिमाप्नुयुः ॥ अष्टवर्षा भवेत्कन्या नववर्षा तु रोहिणी ॥ ४३ ॥ दशवर्षा भवेद्गौरी तत ऊर्ध्वं रजस्वला ॥ गौरीं ददन् नाकपृष्ठे वैकुंठे रोहिणीप्रदः ॥ ४४ ॥ कन्यां ददन् ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥ ये गुग्गुलप्रदा विप्रा ये दीपार्थे हरेर्घृतम् ॥ ४५ ॥ ये तंडुलप्रदा विष्णोर्नैवेद्याय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजन्मने ॥ ये शास्त्रज्ञानवक्तारं सत्कुर्वंति धनांबरैः ॥ ४६ ॥ धूपदीपादिपात्राणां ये कुर्युर्दानमुत्तमम् ॥ वस्त्रदानं च विष्ण्वर्थं ते नराः स्वर्गगामिनः ॥ ४७ ॥ शृणु विप्र प्रवक्ष्यामि पापिष्ठानां गतिं पराम् ॥ नास्तिकाश्च पुराणेषु ये परार्थविघातकाः ॥ ४८ ॥ त्रिकालसंध्यारहिताः पूजाजपविवर्जिताः ॥ कूटसाक्ष्यप्रदातारो यांति ते नरकान् बहून् ॥ ४९ ॥ शास्त्रं विचार्य कर्तव्यमन्यथा नरकं व्रजेत् ॥ विप्र गच्छ गृहं शीघ्रं दुखितास्तव बांधवाः ॥ ५० ॥ इत्युक्तश्चोदितो विप्रो यमं नत्वा विनीतवत् ॥ शीघ्रं नीतो गृहं दूतैः सुप्तवत्प्रत्यबुध्यत ॥ ५१ ॥ सुशीला च पतिं दृष्ट्वा मृतं पुनरिहागतम् ॥ सस्वजे प्रमदा गाढं प्रमोदाश्रुपरिप्लुता ॥ ५२ ॥ प्रणम्य तं निरीक्षंती पुनः स्नेहसमन्विता ॥ यमलोकस्य वृत्तांतमपृच्छत्सकुतूहला ॥ ५३ ॥ तेन तत्कथितं वृत्तं यमलोकगतं लघु ॥ ऋणानुबंधमश्वत्थं श्रुत्वा सा प्रशशंस ह ॥ ५४ ॥ तदारभ्य स्वयं साध्वी सदा भर्तृहिते रता ॥ अश्वत्थसेवामकरोदच्युतप्रियदर्शना ॥ ५५ ॥ स्नानेन पुष्करिण्यां तु दीपदानेन सा प्रिया ॥ व्यंकटेशस्य वै नित्यं वरात्तस्याः सुखं सदा ॥ ५६ ॥ तस्मिन् क्षणे हि जंबूको भीत्या प्रागात्समीपतः ॥ तया भीत्या जलं क्षिप्तं तस्यांगे पावनं परम् ॥ ५७ ॥ पुष्करिणी-

जलस्पर्शाद्दिव्यदेहोऽभवच्च सः ॥ तेन वृत्तं तु कथितमहं राजा पुराभवम् ॥ ५८ ॥ सुधर्मा नाम विख्यातोऽष्टावक्रमहसं मदात् ॥ तस्य शापाच्च जंबूको त्वत्कृपोद्धरणं मम ॥ ५९ ॥ इत्युक्त्वा स गतः स्वर्गं सापि सौख्यं सुतादिभिः ॥ उपभुज्य ततः काले वैकुंठं विष्णुमंदिरम् ॥ ६० ॥ भर्त्रा सह गता तत्र ब्रह्मानंदेन संयुता ॥ व्यंकटेशप्रिया चासीत् सत्कृता विष्णुवल्लभैः ॥ ६१ ॥ एवं दीपस्य महिमा स्नानस्य च मया तव ॥ कथितो भगवत्प्रेम्णा श्रवणात्तत्फलं लभेत् ॥ ६२ ॥ इति श्रीदेवालयग्राममाहात्म्ये सुशीलापतिजीवनं नाम पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥ जैमिनिरुवाच ॥ पाराशर्य गुरो ब्रूहि ममैकं मनसि स्थितम् ॥ पूर्वं गंगावेदनद्योः कलहे भाषणं कृतम् ॥ १ ॥ वेदनद्या तु यवनानुद्धरिष्याम्यहं कलौ ॥ तत्कथं सद्गुरो जातं भविष्यं कथय प्रभो ॥ २ ॥ दत्तात्रेयः कदा तत्र प्रकटो भविता ध्रुवम् ॥ अन्यच्चापि भविष्यं यत् शंस सर्वं दयानिधे ॥ ३ ॥ श्रीव्यास उवाच ॥ जैमिने कर्मपरम श्रीशपत्सेवने रत ॥ वक्ष्यामि ते सर्वमेव शृणुष्वैकाग्रचेतसा ॥ ४ ॥ पूर्वं कृष्णावतारे च गते वैकुंठमोजसा ॥ रुक्मिण्याद्याः स्त्रियो मुख्याः देवकी रेवती तथा ॥ ५ ॥ वसुदेवस्त्रियः सर्वा बलदेवस्य चाबलाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रद्युम्नप्रमुखानां च गताः स्वर्गं हि तत्क्षणे ॥ ६ ॥ कृष्णस्त्रियः शापदग्धाः पूर्वमप्सरसश्च ताः ॥ अष्टाव-
क्रेण वै शप्ता दस्युहस्तं गमिष्यथ ॥ ७ ॥ तेन शापेन ताः सर्वा जित्वार्जुनमथाहृताः ॥ गोपैर्भिल्लैर्दस्यु-
भिस्ता भुक्ता वै मदनव्रतम् ॥ ८ ॥ अष्टावक्रेण यत्प्रोक्तं कृत्वा पुण्याद्गता दिवम् ॥ तेनैव पापभोगेन
दस्यवस्ते कलौ युगे ॥ ९ ॥ यवना वै भविष्यंति यात्राकर्मणि विघ्नदाः ॥ शिबिकायां यदा श्रीशो मार्गे
त्रासकरास्त्विमे ॥ १० ॥ तदा श्रीव्यंकटेशेन समादिष्टोऽर्जुनस्त्वरन् ॥ चतुर्वर्णशरीरेषु शक्त्यंशं योज-
यिष्यति ॥ ११ ॥ तेन वै म्लेंछजातीनां निरुत्साहः पराजयः ॥ भविष्यति पुनस्तेयकर्मण्यपि पराभवः
॥ १२ ॥ श्रीशमूर्तिं हरिष्यंति पुनः प्राप्ता भविष्यति ॥ तेऽपि चोराश्च यवना अष्टावक्रेण शापिताः॥ १३॥
परंपरेशकृपया नदी तानुद्धरिष्यति ॥ तेऽपि विरोधभक्त्या वै गमिष्यंति सुरालयम्॥ १४ ॥ कलौ विशे-
षमहिमा कालाद्वृद्धिं गमिष्यति॥ अयं देवः श्रीनिवाशोः लक्ष्मीं सर्वसुखप्रदाम् ॥ १५॥ ददाति नित्यं भक्ते-
भ्यस्तस्माद्भजत सादरम् ॥ दास्यामि ते देववर्य द्रव्यं वस्त्रं तप प्रभो ॥ १६ ॥ मम कार्यं भवतु च प्रार्थि-
तस्तत्करोति सः ॥ कार्ये जाते न दत्तं चेद्विघ्नदो भवति प्रभुः ॥ १७ ॥ कस्यापि वाणीनिष्ठोऽसौ संकल्पि-

तस्मृतिप्रदः ॥ कृते देवस्य कृत्ये तु सदा सौख्यं ददाति सः ॥ १८ ॥ पूर्वं ये येऽवतारास्ते कृत्वा कार्यं
गता दिवम्॥ अयं देवो कलावेव जनसौख्यार्थमागतः ॥ १९ ॥ तस्मात्तत्सेवनं कार्यं भजनं पूजनं तथा ॥
स्मरणं नमनं चैव दर्शनं पुण्यदायकम् ॥ २० ॥ एवं दत्तोऽपि कालेन तत्र प्रागयमेष्यति ॥ व्यंकटेशा-
ज्ञया लोककल्याणं स करिष्यति ॥ २१ ॥ मुनिहृत्पद्मवासीयो दत्तात्रेयः सुतोषकृत् ॥ मध्याह्नेऽने-
करूपेण भिक्षार्थमटते पुरम् ॥ २२ ॥ अष्टाविंशे कलियुगे प्रसिद्धः स भविष्यति ॥ देवालयग्राम-
मुप व्यंकटेशप्रियः प्रभुः ॥ २३ ॥ भक्तश्रेष्ठो रमानाथो दत्तरूपेण संस्थितः ॥ त्रेतायुगे तु प्रथमे दत्तात्रेयो
बभूव ह ॥ २४ ॥ वर्णो द्वितीयो ह्यंतस्थो यस्य नामादिसंस्थितः ॥ परं स्पर्शैस्तृतीयस्तु प्रथमः शशिना
युतः ॥ २५ ॥ एतन्नाम्ना सुविख्यातस्तस्मात्ख्यातिमुपैष्यति ॥ श्रीदत्तः स्मर्तृगामी च सर्वाभीष्टं प्रदास्य-
ति ॥ २६ ॥ शेषेण प्रार्थितो लक्ष्मीपतिराज्ञापयिष्यति ॥ सीतया लक्ष्मणेनापि रामं दशरथात्मजम् ॥ २७ ॥
वासं कुरु मम ग्रामे जनकल्याणहेतवे ॥ ततो रामः सानुजश्च ससीतः केशवाज्ञया ॥ २८ ॥ वासं देवालयग्रामे

---

१ यरलवाः । २ कादयः स्पर्शाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करिष्यति सुखाय सः ॥ रामतीर्थं ततो ख्यातिं गमिष्यति धरातले ॥ २९ ॥ तथैव जिनदेवेंद्रो निज-
भक्तस्य तुष्टये ॥ व्यंकटेशाज्ञया चैवं स्वं स्थानं कल्पयिष्यति ॥ ३० ॥ विष्णोरेवावतारः स ऋषभो
भूमिसंस्थितः ॥ ममाभेदेन सेवा वै कार्या जिनहितेच्छुभिः ॥ ३१ ॥ इतीव देवदेवेन चाज्ञप्तो मान्य एव
सः ॥ विविक्ते देवसेवां सः कुर्वन् वासमुपैष्यति ॥ ३२ ॥ बुद्धतीर्थस्य माहात्म्यं पूर्वमेव मया तव ॥
कथितं यत्र पुण्येन गमनं भवति ध्रुवम् ॥ ३३ ॥ शृणु देवालयग्रामे सेवनादच्युतस्य च ॥ अच्युतो
भवति क्षिप्रं पुरुषार्थचतुष्टयात् ॥ ३४ ॥ ब्रह्मोवाच ॥ भो नारद पुरं गच्छ व्यंकटेशस्य दर्शनम् ॥
प्रत्यहं कुरु तेन त्वं ज्ञानवान् हि भविष्यसि ॥ ३५ ॥ नारद उवाच ॥ अहं ताताद्य गच्छामीत्युक्त्वा
देवालयं पुरम् ॥ गत्वातिष्ठत्स्वतीर्थं वै सेवां कुर्वन् प्रभोरपि ॥ ३६ ॥ गानं नित्यमुषःकाले सायं रात्रौ
करोति च ॥ अद्यापि तिष्ठते तत्र सर्वे देवाः पुरस्थिताः ॥ ३७ ॥ श्रीशिव उवाच ॥ एवं ते स्कंद महिमा
व्यंकटेशस्य वर्णितः ॥ गत्वा त्वया पुरे तस्य स्थेयं सेवां प्रकुर्वता ॥ ३८ ॥ व्यास उवाच ॥ इति श्रुत्वा
पितुर्वाक्यं व्यंकटेशं गतः सुधीः ॥ प्रणम्य पूजयामास तुलसीलक्षसंख्यया ॥ ३९ ॥ हृषीकेशेन चारिष्टो

मत्पुरस्थे हनूमति ॥ त्वया प्रविश्य च स्थेयं कार्तिक्या तव दर्शनात् ॥ ४० ॥ पूजनात्स्मरणाच्चापि
सप्तजन्मसु स द्विजः ॥ भवितेति प्रतिश्रुत्य कुमारौ वै तथाकरोत् ॥ ४१ ॥ व्यास उवाच ॥ तवाख्यातं
महाख्यानं व्यंकटेशस्य सिद्धिदम् ॥ किं वच्मि भवतः साधो भवान् कृष्णकृपायुतः ॥ ४२ ॥ जैमिनि-
रुवाच ॥ अहं त्वया गुरो धन्यः कृतः करुणया मुने ॥ मम माता पिता धन्यः कथायाः श्रवणाद्धरेः
॥ ४३ ॥ इत्युक्त्वा स गतो ग्रामे शीघ्रं देवालयाभिधे ॥ श्रीशं प्रणम्य निकटे नारदस्य स्थितिं ययौ
॥ ४४ ॥ एवं श्रीव्यंकटेशस्य माहात्म्यं परमाद्भुतम् ॥ व्यासेन कथितं यत्तु यथामति मयापि तत्
॥ ४५ ॥ भवद्भ्यः श्रोतृमुख्येभ्यो व्यंकटेशप्रियंकरम् ॥ व्यासोऽपि तत्र गत्वा वै व्यासतीर्थे समा-
स्थितः ॥ ४६ ॥ तत्तीर्थं दत्ततीर्थस्य समीपे वर्तते द्विज ॥ तत्र कृत्वा स्नानमाप पुरा विद्यां द्विजर्षभः
॥ ४७ ॥ व्यासमंत्रं तत्र जप्त्वा विद्यां लेभे सुमंगलः ॥ मृत्युंजयेन पुटितमधिकं फलमुच्यते ॥ ४८ ॥
इममध्यायश्रवणाल्लाभं लभति वै द्विजः ॥ किं वच्मि भवतां विप्राः कथयिष्ये सदानघाः ॥ ४९ ॥
इति श्रीदेवालयग्राममाहात्म्ये भविष्यकथनं नाम षट्पंचाशत्तमोऽध्यायः ॥५६॥ छ ॥ शौनक उवाच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत सूत वदास्माकं त्वं हि भाग्यवतां वर ॥ व्यंकटेशप्रियोऽसि त्वं संशयं नुद सर्वशः ॥ १ ॥ व्यंकटेश-
समीपं तु रेणुका कथमागता ॥ सा देवी जगतां धात्री लक्ष्मीशस्य प्रिया कथा ॥ २ ॥ सूत उवाच ॥
धन्या यूयं महाभागा ऋषयो माधवप्रियाः ॥ पुरा वृत्तं हि शृणुत रेणुकायाः समागमः ॥ ३ ॥ एकदा
देवशर्मा वै भगवंतं प्रणम्य च ॥ प्रार्थयामास त्वं देवः कुलदेवत्वमागतः ॥ ४ ॥ अस्मत्कुले रेणुका हि
कुलदेवीति विश्रुता ॥ कुलधर्मो न च त्याज्यस्तवाज्ञा शास्त्ररूपिणी ॥ ५ ॥ कुले येषां धर्मनाशस्तस्या-
भद्रं भविष्यति ॥ तस्मात्त्वया रेणुकाया आह्वानं कार्यमेव च ॥ ६ ॥ मम कर्म कथं शर्म तवाज्ञापालनं
तथा ॥ यथा भवेत्तथैव त्वं कुरु देव नमोऽस्तु ते ॥ ७ ॥ सूत उवाच ॥ इति श्रुत्वा भक्तवचो हास्यं
कृत्वा महाप्रभुः ॥ उवाच सुप्रसन्नात्मा भद्रं तव भविष्यति ॥ ८ ॥ रेणुका कुलदेवी ते करवीरनिवा-
सिनः ॥ आश्चर्यमेव लक्ष्मीः सा कुलदेवत्वमागता ॥ ९ ॥ अत्रैव मम सान्निध्ये रेणुका निवसिष्यति ॥
पूर्वावतारे हि मम माता सा परिकीर्तिता ॥ १० ॥ एकवीरा महामाया तुरजा सैव विश्रुता ॥ जमदग्नेः

शिवांशस्य भार्या सा रेणुकात्मजा ॥ ११ ॥ असूत भार्गवं रामं ममांशं सा पतिव्रता ॥ कंचित्कालं
प्रतीक्ष त्वमागमिष्यति रेणुका ॥ १२ ॥ सूत उवाच ॥ एकदा कुंभकोणस्था ब्राह्मणाः शंसितव्रताः ॥
अग्निसेवापराः सर्वे कर्मनिष्ठा जितेंद्रियाः ॥ १३ ॥ यज्ञं समारेभिरे ते वाजपेयाभिधानकम् ॥ सर्वा-
धिक्यं ब्राह्मणानां तस्मिन् यज्ञे प्रकीर्तितम् ॥ १४ ॥ दैत्यदानवदुष्टानां नाशो भवति तेन वै ॥ ततो
दैत्या राक्षसाश्च मिलित्वा यज्ञनाशने ॥ १५ ॥ प्राप्ता वृष्टिमकुर्वन् हि मांसरक्तमयी भृशम् ॥ अग्निर्नष्टो
द्विजा भ्रष्टाः पलायनपराः खलु ॥ १६ ॥ दैत्यैस्तु नाशितं सर्वं यज्ञस्तंभादिसर्वशः ॥ पृष्टलग्ना ब्राह्मणानां
त्रासदाः पीडयन्ति च ॥ १७ ॥ कांचीं गता द्विजास्तेन श्रीशैलं मधुरां तथा ॥ यत्र यत्र द्विजास्तत्र राक्षसाः
पीडयन्ति तान् ॥१८॥ अकस्मान्नारदः प्राप्तो ब्राह्मणैः प्रतिपूजितः॥ उवाच पर्वते रामं महेंद्रे यात भार्गवम्
॥ १९ ॥ ब्राह्मणा ऊचुः ॥ भवान् गच्छतु ह्यस्माभिर्दर्शनार्थं कृतक्षणः॥ तथेत्युक्त्वा गताः सर्वे प्रणम्य राम-
मब्रुवन् ॥ २० ॥ राम राम महाबाहो दुष्टक्षत्रियमर्दन ॥ दैत्यदानवरक्षोघ्न रक्षास्मान् करुणानिधे ॥ २१ ॥

---

१ रेणुकनामा राजा । २ मद्रीगाव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजकर्म सदा भ्रष्टं दैत्याब्धौ लयमागतम् ॥ लुप्तक्रियं भूमितलमुपोषणपराः सुराः ॥ २२ ॥ अस्माकं पृष्टलग्नास्ते दैत्यदानवराक्षसाः ॥ स्त्रियः कुत्र सुताः कुत्र गृहं धान्यं कुतो गतम् ॥ २३ ॥ किं कार्यं वा कथं स्थेयं त्वयि रक्षणकर्तरि ॥ सूर्ये तपति भो राम तमः प्रादुर्भवेत्कथम् ॥ २४ ॥ त्वयि जीवति भो राम नो दुःखस्योद्भवः कथम् ॥ ब्रह्मब्राह्मणपालस्त्वं माधवस्यांशजः प्रभो ॥ २५ ॥ अतस्त्वयैव कर्तव्यं रक्षणं दीनवत्सल ॥ सूत उवाच ॥ इति श्रुत्वा वचो रामो दीर्घमुष्णं च निश्वसन् ॥ २६ ॥ उवाच दीनया वाचा मद्वचः शृणुतानघाः ॥ किं करोमि महाभागाः प्रतिज्ञातं मया खलु ॥ २७ ॥ पुरा पितृनिदेशेन क्षत्रघातादनंतरम् ॥ पुनः क्षत्रस्य हनने शस्त्रन्यासः कृतो मया ॥ २८ ॥ अतो गच्छत भूपालं जनमेजयसंज्ञकम् ॥ पाण्डवानां वंशकरं परीक्षित्सुतमंजसा ॥ २९ ॥ स वः कार्यं विक्रमेण दैत्यनाशं करिष्यति ॥ ममोपायो हि नास्त्येव कृपां कुरुत मेऽनघाः ॥ ३० ॥ ब्राह्मणा ऊचुः ॥ त्वमेव कुरु नः साह्यं गृहीत्वा शस्त्रमुत्तमम् ॥ राम उवाच ॥ अहं नैव करिष्यामि सत्यं सत्यमिदं वचः ॥ ३१ ॥ ब्राह्मणा ऊचुः ॥ त्वमेव कार्यकर्ता नो भविष्यसि महामते ॥ राम उवाच ॥ अनृतस्य सुखं नैव न स्वर्गो नरकः

सदा ॥ ३२ ॥ पराजयो ह्यसत्येन नानृतात्पातकं परम् ॥ भवन्तो मां हि दुःखाब्धौ मज्जितुं समुपागताः ॥ ३३ ॥ यात यात नृपं यात रक्षकं भवतां द्विजाः ॥ न च शस्त्रं गृहीष्यामि कदापि मुनिपुंगवाः ॥ ३४ ॥ यूयं तु ज्ञानसंपन्ना दुःखं दातुं किमिच्छथ ॥ अज्ञानां दुर्बलानां तु दुष्टानां कार्यमीदृशम् ॥ ३५ ॥ ब्राह्मणा ऊचुः ॥ किं राम मिथ्या वदसि तवैव वचनं पुरा ॥ श्रुतं शस्त्रस्य ग्रहणं करिष्ये द्विजसेवने ॥ ३६ ॥ इदानीं त्वं कथं राम चापं न कुरुषे करे ॥ नारद उवाच ॥ राम राम द्विजा सत्यं वदन्ति रक्षणं कुरु ॥ ३७ ॥ तव हानिः प्रतिज्ञायाः कथं भवति मे वद ॥ असत्यमेव वचनं रक्षणं न करोषि चेत् ॥ ३८ ॥ राम उवाच ॥ शस्त्रास्त्रग्रहणेनैव ह्यसत्यं मम नारद ॥ यदा हि मे प्रतिज्ञातं तदा द्वापरमुच्यते ॥ ३९ ॥ इदानीं तु कलिः प्राप्तो ब्राह्मणा भ्रष्टधर्मिणः ॥ ब्राह्मणत्वं गतं तेषामीदृशां रक्षणं नहि ॥ ४० ॥ नारद उवाच ॥ ईदृक्त्वया न वक्तव्यं द्विजानामपमानकम् ॥ इमे विप्राः खलु श्रेष्ठाः शापानुग्रहकारिणः ॥ ४१ ॥ विचारं कुरु राम त्वं युगधर्मोऽत्र न स्थितः ॥ राम उवाच ॥ विचारेण कृतं सर्वं मे विचारद्धि नश्यति ॥४२॥ एतेषां रक्षणे चाहं शस्त्रग्राहो भवामि न ॥ गच्छन्तु वा विनशनं नाहं रक्षणकारकः ॥४३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणा ऊचुः ॥ तिष्ठ राम सुखेन त्वं भ्रष्टाचारा वयं खलु ॥ परं प्रतिज्ञां शृणु रे शस्त्रग्राहो भविष्यसि ॥ ४४ ॥ इत्युक्त्वा निर्गताः सर्वे नारदस्त्वब्रवीदिदम् ॥ भो राम शृणु मे सत्यां प्रतिज्ञां विद्धि भार्गव ॥ ४५ ॥ ब्राह्मणानां रक्षणार्थं शस्त्रधारी भविष्यसि ॥ राम उवाच ॥ तव वाचमसत्यां वै करिष्यामि विरंचिज ॥ ४६ ॥ नारद उवाच ॥ असत्या यदि मे वाणी ब्रह्मसूत्रं त्यजाम्यहम् ॥ वीणां नैव गृहीष्यामि संन्यासो भविताप्यहम् ॥४७॥ राम उवाच ॥ गच्छ नारद गच्छ त्वं कलहप्रियता हि ॥ नारदो ब्राह्मणानाह कृष्णातीरे हि गच्छत ॥ ४८ ॥ अमरापुरसंज्ञं यत्तीर्थं त्रैलोक्यविश्रुतम् ॥ कृष्णातीरे तत्र गता त्रिदिनात्सिद्धिदायकम् ॥ ४९ ॥ अनुष्ठानं विष्णुजपं कुर्वन्ति भक्तितत्पराः ॥ वैकुंठं नारदो गत्वा विष्णवे विनिवेदितम् ॥ ५० ॥ विष्णुः प्राह मुने गच्छ ब्राह्मणान् गृह्य सत्वरम् ॥ देवालये व्यंकटेशं पुरे मत्तेजसोऽधिकम् ॥ ५१ ॥ कारणं शृणु देवर्षे वैकुण्ठे केवलोऽप्यहम् ॥ मत्तेजः सर्वथा तत्र कलौ लोकस्य रक्षकम् ॥ ५२ ॥ श्रुत्वा वचो माधवस्य नारदो ब्राह्मणान् गतः ॥ उदन्तं सर्वमाचख्यौ तेऽपि सिद्धा गताः प्रभुम् ॥ ५३ ॥ व्यंकटेशं नमस्कृत्य साष्टांगं गद्गदस्वराः ॥ स्तुतिं चक्रुः सुमनसा

प्रेमाश्रुनयना द्विजाः ॥ ५४ ॥ इति श्रीदेवालयग्राममाहात्म्ये सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ॥

ब्राह्मणा ऊचुः ॥ व्यंकटेश जगन्नाथ भक्तानुग्रहकारक ॥ दयासागर सर्वेश कल्पवृक्षाय ते नमः ॥ १ ॥लोकानां प्रभवः पाता कर्ता हर्ता जगत्पतिः॥ आदिः स हि समस्तस्य प्रभवः कारणं हरिः ॥२॥ कर्तासमस्तस्य हरिः पुरातनः प्रभुः प्रभूणामपि यः सदात्मकः ॥ तदादिदेवं वरदं वरेण्यं स्तोतुं हरिं संप्रति संयताः स्मः ॥ ३ ॥ यस्य प्रसादाज्जगदेवमासीत् स्वप्राणिगंधर्वमहोरगौघम् ॥ देवं जगद्योनिमजं जनार्दनं स्तोतुं हरिं संप्रति संयताः स्मः ॥ ४ ॥ यस्योदयाद्विश्वमिदं प्रभूतं लयं च तस्मिन्समुपैति कल्पे॥ तस्यैव साक्षाद्दशवार्तिं विश्वं पश्याम देवं पुरुषोत्तमं हरिम् ॥ ५ ॥ स्रष्टा च योऽसौ सफलस्य देवः पाता च हर्ता च हरिः स एव ॥ पश्याम नित्यं भुवनेश्वरं हरिं पुराणमाद्यं प्रभविष्णुमव्ययम् ॥ ६ ॥ अजस्य कर्ता भुवनस्य गोप्ता भुवश्च कर्ता हरिरेक एव ॥ तं योगिनो योगविशुद्धबुद्धि लभेम तेनैव मतिः समाकुला ॥ ७ ॥ निगीर्य विश्वं सकलं जगत्पतिः शेते शिशुत्वं समवाप्य साक्षात् ॥ वटस्य पत्रे जगतां निवासः पादौ च विक्षिप्य करौ विधुन्वन् ॥ ८ ॥ यस्योदरे देवमुनिः पुरातनो ददर्श लोकानखिलान्स मायया ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रविश्य विश्वं सकलं यथावद्धर्हियथाभूतमभूदिदं महत् ॥ ९ ॥ निगीर्य विश्वं जगदादिकाले शेते महात्मा जलधेर्जलौघे ॥ देव्या श्रिया चामरलोलहस्तया निषेव्यमाणः पुरुषोत्तमस्तदा ॥ १० ॥ नाभेश्च यस्या-विरभूत्सपत्रं पद्मं महत्कांचनसप्रभं प्रभोः ॥ जन्मास्पदं लोकगुरोर्यदासीद्विस्तारि पद्मं जगदादिसृष्टौ ॥ ११ ॥ दधार यो भूतपतिर्महान् महीं दंष्ट्राग्रसंस्थापितरूढमूलाम् ॥ नदन्महामेघ इवादिकाले कुर्वन्वराहो मुनिगीतमूर्तिः ॥ १२ ॥ हरिः पुराणः पुरुषोत्तमः प्रभुः कर्ता समस्तस्य समस्तसाक्षी ॥ यज्ञात्मको यज्ञपतिर्जगत्पतिः स्तोतुं तमीशं वयमुद्यताः स्मः ॥ १३ ॥ केचिद्बहुत्वेन वदंति देवमेकात्मना केचिदिमं पुराणम् ॥ वेदान्तसंस्थापितसत्वयुक्तं स्तोतुं तमीशं वयमुद्यताः स्मः ॥ १४ ॥ अनेकमेकं बहुधा वदन्ति श्रुतिस्मृतिन्यायनिविष्टचित्ताः ॥ आहुर्यमात्मानमजं पुराविदो स्तोतुं तमीशं वयमुद्यताः स्मः ॥ १५ ॥ यं प्राहुरीड्यं वरदं वरेण्यमेकान्ततत्वं मुनयः पुरातनाः ॥ यं सर्वगं देवमजं जनार्दनं स्तोतुं हरिं संप्रति संयताः स्मः ॥ १६ ॥ यस्मिन्विश्वमिदं प्रोतमादिकाले जगत्पतौ ॥ तं स्तोतुमभिसंवृत्ताः कं नु वक्ष्याम सांप्रतम् ॥ १७ ॥ अयं स चक्री शरशार्ङ्गधन्वा गदी रथी सध्वजतूणपाणिः ॥ सहस्रमूर्धा

सकलामरेशो जगत्प्रसूतिर्जगतां निवासः ॥ १८ ॥ विष्णुर्जिष्णुर्जगन्नाथः पुराणः पुरुषोत्तमः ॥ विश्वात्मा विश्वकर्ता यः सोऽयमेष सनातनः ॥ १९ ॥ अस्यैव देवस्य हरेः स्तनान्तरे विराजते कौस्तुभरत्नदीपः ॥ यस्य प्रसादाज्जगदेतदादौ विराजते चंद्रमसेव रात्रिः ॥ २० ॥ योऽसौ पृथ्वीं दधाराशु दंष्ट्रया जलसंचयात् ॥ योऽयमेव हरिः साक्षाद्वाराहं वपुरास्थितः ॥ २१ ॥ बद्ध्वा तथा दानवमुग्रपौरुषं ददौ च शक्राय ततो नु राज्यम् ॥ बलिं बलादेष हरिः स वामनः स्तुतश्च भक्त्या मुनिभिः पुरातनैः ॥ २२ ॥ दंष्ट्राकरालान् सुमदान् हत्वा यो दानवान् रणे ॥ निशोकमखिलं लोकं चकारासौ जनार्दनः ॥ २३ ॥ आदौ दधारैकभुजेन मंदरं निर्जित्य सर्वानसुरान्महार्णवे ॥ ददौ च शक्राय सुधामयं महान्स एष साक्षादिह मामवस्थितः ॥ २४ ॥ यः शेते जलधौ नागे देव्या लक्ष्म्या सुखावहे ॥ हत्वा तौ दानवौ घोरौ मधुकैटभसंज्ञितौ ॥ २५ ॥ यमाहुराद्यं विबुधा जगत्पतिं सर्वस्य धातारमजं जनित्रम् ॥ अणोरणीयांसमतिप्रमाणं स्थूलात्स्थविष्ठं हरिमेव विष्णुम् ॥ २६ ॥ यत्र स्थितमिदं सर्वं प्राप्ते लोकस्य नाशने ॥ आदौ यस्मात्समुत्पन्नं सोऽयं विष्णुरिति स्थितः ॥ २७ ॥ यस्येच्छया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वमिदं प्रवृत्तं प्रवर्तते चापि जनार्दनस्य ॥ अयं स विष्णुः पुरुषोत्तमः शिवः प्रवर्तते मामिह यादवेश्वरः ॥ २८ ॥ भृगोर्वंशे समुत्पन्नो जामदग्न्य इति श्रुतः ॥ शिष्यत्वं समवाप्यैव मृगव्याधस्य यः स्थितः ॥ २९ ॥ जघान वीर्याद्बलिनं महारणे कुठारशस्त्रेण गिरीशशिष्यः ॥ सहस्रबाहुं कृतवीर्यसंभवं हयैर्गजैश्चैव रथैश्च निर्गतम् ॥ ३० ॥ कुरुक्षेत्रं समासाद्य यश्चकार पितृक्रियाम् ॥ निःक्षत्रियमिमं लोकं कृतवानेकविंशतिः ॥ ३१ ॥ दशरथकुले जातो रामो नाम जनार्दनः ॥ सीतया च श्रिया युक्तो लक्ष्मणानुचरः कृती ॥ ३२ ॥ कृत्वा च सेतुं जलधौ जनार्दनो हत्वा च रक्षःपतिमाशुगैः शरैः ॥ दत्त्वा च राज्यं स बिभीषणाय दशाश्वमेधैरयजच्च योऽसौ ॥ ३३ ॥ वसुदेवकुले जातो वासुदेवेति शब्दितः ॥ गोकुले क्रीडते योऽसौ संकर्षणसहायवान् ॥ ३४ ॥ उत्तानशायी शिशुरूपधारी पीत्वा स्तनं पूतनिकाप्रदत्तम् ॥ व्यसुं चकाराशु जनार्दनस्तदा दनोः सुतां तामवसत्सुखं हरिः ॥ ३५ ॥ पयःपानं तथा कुर्वन्भक्षयन्दधिपिण्डकम् ॥ दाम्ना बद्धोदरो विष्णुर्मात्रा रुषितया दृढम् ॥ ३६ ॥ ततश्च दाम्ना सुदृढेण बद्धो जघान योऽसौ यमलार्जुनौ च ॥ क्रीडन्हरिर्गोकुलवासवासी गोपीभिरास्वाद्य मुखं स्तनं च ॥ ३७ ॥

वृन्दावने वसन् विष्णुर्गोपैर्गोकुलवासिभिः ॥ तत्र हत्वा हयं राजन् विरराजांशुमानिव ॥ ३८ ॥ यः क्रीडते नागफणौ जनार्दनो निषेव्यमाणः सहगोपदारकैः ॥ महाह्रदे नागपतिं जगत्पतिर्ममर्द वीर्यातिशयं प्रदर्शयन् ॥ ३९ ॥ यो धेनुकं तालवने तत्फलैः सममच्छिनत् ॥ हत्वा दानवमुग्रं तं गोपान्विस्मापयत्यसौ ॥ ४० ॥ दधार यो गोधरमुग्रपौरुषान् महामतिर्मेघसमागमे सति ॥ बिडंबयञ्छक्रबलं प्रमोदयन् गोपांश्च गोपीश्च सगोकुलं हरिः ॥ ४१ ॥ गोपीनां स्तनमध्ये तु क्रीडते काममीश्वरः ॥ योऽसौ पिबंस्तदधरं मायामानुषदेहवान् ॥ ४२ ॥ गोपीभिरास्वाद्य मुखं विविक्ते शेते स्म रात्रौ सुखमेव केशवः ॥ स्तनान्तरेष्वेव तदा च तासां कामी च कान्ताधरपल्लवं पिबन् ॥ ४३ ॥ अक्रूरेण समाहूतस्तेन गच्छन्हि यामुने ॥ जले यो ह्यर्चितस्तेन नागलोके स एव हि ॥ ४४ ॥ ततश्च गच्छन् बलवान् जनार्दनो हत्वा तमुग्रं रजकं बलात्पथि ॥ हृत्वा च वस्त्राणि यथेष्टमीश्वरो ययौ सरामो मथुरां पुरीं हरिः ॥ ४५ ॥ लब्ध्वा च दामानि बहूनि कामदो दत्त्वा वरं माल्यकृते महान्तम् ॥ लब्ध्वानुलेपं सुरभिं च यादवः कुब्जां चकाराशु महार्हरूपाम् ॥ ४६ ॥ योऽसौ चापं समादाय मध्ये च्छित्त्वा महद्धनुः ॥ सिंह-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नादं महांश्चक्रे कल्पान्ते जलदो यथा ॥ ४७ ॥ हत्वा गजं घोरमुदग्ररूपं विषाणमादाय ततो तु केशवः॥
ननर्त रंगे बहुरूपमीश्वरः कंसस्य दत्त्वा भयमुग्रवीर्यः ॥ ४८ ॥ योऽसौ हत्वा महामल्लं चाणूरं निहत-
द्विषम् ॥ यादवेभ्यो ददौ प्रीतिं कंसस्यैव तु पश्यतः ॥ ४९ ॥ जघान कंसं रिपुपक्षघातिनं पितृद्विषं
यादवनामधेयम् ॥ संस्थाप्य राज्ये हरिरुग्रसेनं सांदीपिनं काश्यमुपागतो यः ॥ ५० ॥ विद्यामवाप्य
सकलां दत्त्वा पुत्रं महामुनेः ॥ साग्रजोऽथ जगामाशु मथुरां यादवीं पुरीम् ॥ ५१ ॥ हत्वा निशुंभं नरकं
महामतिः कृत्वा सुघोरं कदनं जनार्दनः ॥ ररक्ष विप्रान् मुनिवीरसंघान् देवांश्च सर्वान् जगतो जगत्पतिः
॥ ५२ ॥ स एष भगवान् विष्णुर्व्यंकटेशो जनार्दनः ॥ कृतकृत्याः स्म संजाता गतं दुःखं लयं च नः
॥ ५३ ॥ नमो भगवते तस्मै वासुदेवाय चक्रिणे ॥ नमस्ते गदिने तुभ्यं वासुदेवाय धीमते ॥ ५४ ॥
ॐ नमो नारायणाय विष्णवे प्रभविष्णवे ॥ नूहि भूयान् मनःशुद्धिः कीर्तनात्तव केशव ॥ ५५ ॥ दिने
दिने क्षणं चित्तं त्वयि संस्थं भवत्विति ॥ नमनः सर्वगं देव रक्षतां विषयान्तरे ॥ ५६ ॥ मनोविपर्यये घोरे
पुरुषान् हन्ति नित्यशः ॥ पापेषु योजयेत्पुंसः परपीडात्मकेषु च ॥ ५७ ॥ मनस्तद्रक्षतां देव भूयो भूयो

जनार्दन ॥ माभून्मनसि कालुष्यं मनो नो निर्मलं भवेत् ॥ ५८ ॥ कलुषं तस्य यच्चित्तं नरके पातयत्य-
मुम् ॥ ब्राह्यानि निर्मलान्येवमिंद्रियाणि भवन्त्युत ॥ ५९ ॥ न तानि कार्यवन्तीह मनश्चेत्कलुषं भवेत् ॥
नांगानि मुष्टिना मेध्यं गृहीत्वा यो व्यवस्थितः ॥ ६० ॥ बहिः प्रक्षालनं कुर्वन् किं भवेत्तस्य केशव ॥
व्यर्थो हि केवलं तस्य प्रग्रहो ब्राह्यगोचरः ॥ ६१ ॥ तस्मात्सर्वप्रयत्नेन चित्तं रक्ष जनार्दन ॥ बलवान्नि-
द्रियग्रामो वारयैनं जनार्दन ॥ ६२ ॥ परीवादाज्जगन्नाथ वाचं रक्ष दुरुद्गदाम् ॥ परद्रव्यान्मनो रक्ष परदा-
राज्जनार्दन ॥ ६३ ॥ सर्वत्र नो दया भूयात् प्रसादात्तव केशव ॥ त्वय्येव भक्तिरचला भूयाद्भूतेषु नो दया
॥ ६४ ॥ अर्थिनां कल्पवृक्षोऽसि दाता सर्वस्य सर्वदा ॥ यत्र यत्र भवेज्जन्म तत्र नो हृदि संस्थितः॥६५॥
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ इत्युक्त्वा प्रणिपेतुस्ते साष्टांगं नम्रबुद्धयः ॥६६॥ व्यंकटेश
उवाच ॥ भवत्कृतमिदं स्तोत्रं मम प्रीतिकरं परम् ॥ अनेन स्तौति यो नित्यं तस्याभीष्टं ददाम्यहम्
॥ ६७ ॥ पंचाशदूनमेकं तु दिवसं प्रपठेन्नरः ॥ बन्धनान्मुच्यते सद्यः काराग्रहगतोऽपि च ॥ ६८ ॥ यं यं
चिन्तयते कामं तं तं प्राप्नोत्यसंशयम् ॥ कन्यालाभः पुत्रलाभ आयुरारोग्यता तथा ॥६९॥ इति श्रीदेवा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लयग्राममाहात्म्ये व्यंकटेशस्तुतिर्नाम अष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ॐ ॥ सूत उवाच ॥ स्तुत्या प्रसन्नो भगवान् व्यंकटेशो दयानिधिः ॥ उवाच प्रहसन्मेघवाण्या तान्नन्दयन् द्विजान् ॥ १ ॥ वरं वृणुत भो प्राज्ञा किमिच्छथ ददामि वः ॥ ब्राह्मणा ऊचुः ॥ दुष्टानां नाशने रामं भार्गवं याचितुं गताः ॥ २ ॥ तेन नैव कृतं साध्यं सर्वनाशं गता वयम् ॥ तस्य प्रतिज्ञा शस्त्रादेरग्रहे खलु विद्यते ॥ ३ ॥ अस्माकं वचनं त्वं हि शस्त्रगाही भविष्यसि ॥ नारदस्य प्रतिज्ञा तु शस्त्रग्रहणकर्मणि ॥ ४ ॥ अस्मद्वचनसत्यत्वं तवाधीनं खलु प्रभो ॥ त्वदाज्ञा चेत्स रामो वै शस्त्रग्रहणतत्परः ॥ ५ ॥ भविष्यति च दुष्टानां हननं सुखदायकम् ॥ एवं कुरुष्व भो श्रीश नमस्ते परमेश्वर ॥ ६ ॥ नारद उवाच ॥ रामः सत्यप्रतिज्ञश्चेच्चतुर्थाश्रमवानहम् ॥ तवाभीष्टं वद विभो सत्योऽहं स च वा भवेत् ॥ ७ ॥ श्रीव्यंकटेश उवाच ॥ भवान् रामो द्विजाश्चैव सत्यसंधा भवन्तु च ॥ इत्युक्त्वा प्राह गरुडं रेणुकामानयेति च ॥ ८ ॥ स गत्वा प्रार्थयामास श्रीशाज्ञा गमने तव ॥ देवालयपुरं याहीत्युक्तागाद्गरुडेन सा ॥ ९ ॥ जननीमागतां दृष्ट्वा व्यंकटेशेन सत्कृताम् ॥ गरुडो राममगमदानयामास वै प्रभुम् ॥ १० ॥ श्रीशो भार्गवमाहेदं दैत्य-

नाशं कुरु प्रभो ॥ राम उवाच ॥ देवदेव दयासिंधो प्रतिज्ञारक्षणं मम ॥ ११ ॥ कुरु त्वदाज्ञा महती लंघने कः क्षमो भवेत् ॥ व्यंकटेश उवाच ॥ राम सत्यप्रतिज्ञस्त्वं भविष्यसि न संशयः ॥ १२ ॥ राम उवाच ॥ एवं चेत्तर्हि गच्छामि महेंद्रं पर्वतोत्तमम् ॥ रेणुका उवाच ॥ राम पुत्र शृणु मुने श्रीशाज्ञां मानयस्व रे ॥ १३ ॥ आज्ञयैव तु गच्छामि शृण्वन् हि सत्यसंधताम् ॥ रेणुकोवाच ॥ माधवस्याशयज्ञानं न ज्ञातं तनय त्वया ॥ १४ ॥ अहं वच्मि शृणु मुने दुष्टनाशनकारणे ॥ शस्त्रग्रहान्न वै मिथ्या श्रीशचित्तगताशयः ॥ १५ ॥ राम उवाच ॥ जननि त्वं कथं ब्रूषे सत्यं मम कथं भवेत् ॥ रेणुकोवाच ॥ राम राम भवान् श्रेष्ठः प्रतिज्ञाकारिणां सदा ॥ १६ ॥ पूर्वं त्वया प्रतिज्ञातं शस्त्रन्यासं करोम्यहम् ॥ परंतु दुष्टनाशार्थं करिष्ये ग्रहणं सदा ॥ १७ ॥ ब्राह्मणानां गवां चैव रक्षणार्थं च तद्ग्रहः ॥ अधुना यत् प्रतिज्ञातं शस्त्रत्यागे वृथैव तत् ॥ १८ ॥ पूर्वं यच्च वचो मुक्तं तत्तत्सत्यं कुरु प्रभो ॥ तेन मिथ्यात्वप्राप्तिर्न कदापि च भविष्यति ॥ १९ ॥ इत्थं विचारं मनसि कृत्वा भाषितमञ्जसा ॥ व्यंकटेशेन चाज्ञप्तः कुरु कार्यमनंतरम् ॥ २० ॥ मातुराज्ञोल्लंघनेन हत्या सा भवति ध्रुवम् ॥ पूर्वं मम वधेन त्वं लिप्तोऽसि यदि वै पितुः ॥ २१ ॥ वचने-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नापि शुद्धोऽसि तथापि त्वं हि युज्यसे ॥ अतो ममाज्ञया वत्स कुरु त्वं द्विजरक्षणम् ॥२२॥ सूत उवाच ॥
इत्थं मातृवचः श्रुत्वा तूष्णींभूतो हि भार्गवः ॥ व्यंकटेश उवाच ॥ राम त्वं जननीवाक्यं सत्यं कुरु ममाज्ञया
॥ २३ ॥ ब्राह्मणा ऊचुः ॥ द्विजानां रक्षणाद्धर्मो वृद्धिमेति न संशयः ॥ ब्राह्मणो भ्रष्टमार्गश्चेद्वागत्या शुद्ध एव
सः॥२४॥ सूत उवाच ॥ सर्वेषां वचनाद्रामो गृहीत्वा शस्त्रमुत्सुकः॥ गन्तुं समुद्यतो यावत्तावन्नारद ऊचिवा-
न् ॥२५॥ राम मे वचनं सत्यं राम ऊचे स्वभोर्मतम् ॥ रामो दैत्यान् राक्षसांश्च विक्रमेण जघान तान्॥२६॥
ब्राह्मणा इष्टमापन्ना रेणुकामब्रवीत्प्रभुः ॥ तिष्ठ त्वं मम सान्निध्ये भक्तकल्याणकारिणी ॥ २७ ॥ तयाप्युक्तं
तथैवास्तु ततः प्रभृति रेणुका ॥ तुरजा रेणुका लक्ष्मीरेकरूपतया स्थिता ॥ २८ ॥ तस्यास्तीर्थं दत्त-
तीर्थात्पंचहस्तं प्रकीर्त्तितम् ॥ इदं चरित्रं शृणुयात्पठेद्वा मानवो भुवि ॥२९॥ कल्याणं तस्य भवति रेणु-
कायाः प्रसादतः ॥ ततस्ते ब्राह्मणाः सर्वे प्राहुर्नम्रा रमेश्वरम् ॥ ३० ॥ भो भो देव दयासिंधो ज्ञानमार्ग
वदस्व नः ॥ येन मोक्षो भवेन्नो वै सतां मार्गं वदस्व हि ॥ ३१ ॥ इति श्रीदेवालयग्राममाहात्म्ये रेणुका-
वर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ सूत उवाच ॥ द्विजानां वचनं श्रुत्वा ब्रह्मज्ञा-

नमदात्प्रभुः श्रूयतां कार्तवीर्याय दत्तात्रेयवचो यथा ॥ १ ॥ कार्तवीर्यो नमस्कृत्य ज्ञानं देहीति चात्र-
वीत् ॥ येन मुक्तिर्भवेन्मह्यं घोरसंसारसागरात् ॥ २ ॥ दत्तात्रेय उवाच ॥ शृणुष्वेदं महाराज दत्तचित्तो
भवाधुना ॥ यथानुभूय चात्मानं जीवन्मुक्तो भविष्यसि ॥ ३ ॥ पुरा मे दुर्लभं दत्तमैश्वर्यमवमानदम् ॥
भोगार्थं धर्मकामस्य त्वमिदानीं मुमुक्षुसे ॥ ४ ॥ क्षुधितस्यान्नमेव स्यात्तृषितस्य पयस्तथा ॥ रुग्णस्य
चौषधं देयं बद्धस्यापि च मोचनम् ॥ ५ ॥ निद्रातुरे सुशय्यैव कामः कामातुरे विधिः ॥ यद्यस्य
वाञ्छितं तच्च तस्य देयमिति स्थितम् ॥ ६ ॥ अन्येच्छोरन्यदानं तद्व्यर्थमेव निरर्थकम् ॥ इत्यैवं मे पुरैश्वर्य-
मतुलं ते विभावितम् ॥ ७ ॥ योगसिद्धिश्च विविधा परचित्तज्ञता तथा ॥ मनोजवो गतिर्व्योम्नि तत्सर्वं
विद्धि नश्वरम् ॥८॥ यन्नित्यमक्रियं सत्यं तदिदानीं बुभुत्ससि ॥ बोधयामि निजं रूपं येन मुक्तो भविष्य-
सि ॥ ९ ॥ बद्धो मुक्त इति प्रोक्तः शब्दो योऽयं निरर्थकः ॥ न बद्धोऽस्ति कुतो मुक्तिस्तदिदानीं निबो-
ध मे ॥ १० ॥ वस्तुमात्रं ममाकारं पुरेदानीमतः परम् ॥ अस्तिभातिनामरूपदेशकालविवर्जितम् ॥ ११ ॥

बंधमोक्षौ चेन्न स्तः तर्हि किमास्ति । तदाह वस्तुमात्रमिति । नामादिरहितं वस्तु अबाधितस्वरूपमेव केवलमिदानीं सर्वत्रास्ति
भाति प्रकाशते च । नान्यद्रूपादिकम् । तत्र हेतुः पुरा दृश्याद्युत्पत्तेः प्रोक्त एवासीदतः परं प्रलयानंतरं च तदेवावशिष्यति । मध्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विशेषमसामान्यमनिर्वाच्यमकारणम् ॥ अलक्ष्यं लक्षणातीतमचिन्त्यमनिकेतनम् ॥ १२ ॥ भ्रममात्रावलंबं तं नामरूपविकल्पनम् ॥ शास्त्रेण तादृशेनोक्तं तादृशस्यात्मलब्धये ॥ १३ ॥ भ्रमस्तु मोहमात्रः स्यात्तस्य रूपं न विद्यते ॥ तमनादिं बुधाः प्राहुर्बालबुद्धिविशुद्धये ॥ १४ ॥ वस्तुतो नैव मात्रस्य शास्त्रेणैव प्रसाध्यते ॥ जीवो ब्रह्म विशुद्धा चित्तथा जीवेशयोर्भिदा ॥ १५ ॥ अविद्या तच्चिते- योगः षडस्माकमनादयः ॥ स्वाज्ञानकल्पितैवेयं जगज्जीवेशकल्पना ॥ १६ ॥ नाविद्यास्ति कुतो भेदः

द्वैतात्मकोऽधिष्ठानसत्तया प्रतीयतेत्यर्थः ॥ ११ ॥ अकारणं स्वयं कारणहीनम् । अन्यस्य च न कारणम् । चंद्रे यथा शाखा निःसंबंधैव लक्षणं सती तं लक्षयति तथा न अत्रत्यलक्षणं अत एवालक्ष्यमचिंत्यं च । निकेत आश्रयस्तद्रहितम् ॥ १२ ॥ तत्तस्य वस्तुनो यन्ना- मरूपविकल्पनं तत् भ्रमः । अविद्या सैवालंब आश्रयो यस्य । तत्तथा शास्त्रेण तादृशेन अविद्यकेनैवोक्तम् । तादृशस्य अविद्या- मोहितस्यैवात्मलब्धये स्वरूपप्राप्तये कल्पनां विनोपदेशासंभवात् ॥ १३ ॥ स तु मोहमात्रः तं च बुधाः शास्त्रज्ञाः बालबुद्धिविशुद्धये अनादिं प्राहुः । न वस्तुतः ॥ १४ ॥ तत्र वेदान्तिनां वाक्यं दर्शयति । जीवेति । जीवः त्वंपदार्थः । ब्रह्मेश्वरस्तत्पदार्थः । विशुद्धा चित् शुद्धं वस्तुमात्रम् । भिदा भेदः ॥ १५ ॥ योगः संबंधः नैव सत्येत्यत्रापि तेषामेव सिद्धान्तमाह । स्वाज्ञानेति । यो वादी स्वसंप्रदाया- भिनिवेशनो वैदिकं निर्युक्तिकं द्वैतमस्तीति पश्यति स मुखेन पश्यतु अयं भावः ॥ १६ ॥ यस्य प्रपंचोऽस्तीति स्थितिः तस्य कुत उत्पन्नं कथं च सृष्ट्यादिप्रवाह इति संदिग्धचित्तस्य तस्माद्वा एतस्मादात्मन आकाश इत्यादि सृष्टिप्रक्रिया तदर्थं षण्णामनादित्वं बाल

केन योगः परात्मनः ॥ चिदानंदेन च द्वैतं यः पश्यति स पश्यतु ॥ १७ ॥ सत्यं ज्ञानमनन्तं चिदक्षरं तपसः परम् ॥ आनंदमव्ययं नित्यमखण्डं चैकमद्वयम् ॥ १८ ॥ दृश्यते श्रूयते वापि चिन्त्यते जायते यथा ॥ वस्तुमात्रमिदं सर्वं विजानीहि महामते ॥ १९ ॥ भ्रमनाशनमार्गो हि ज्ञानं विद्येति यं विदुः ॥ मायाऽविद्या च द्वे रूपे मायायाः परिकीर्तिते ॥ २० ॥ अविद्यावेंबितो जीवो मायाबिंबित ईश्वरः ॥ मायाशक्तिद्वयं प्रोचुर्विक्षेपावरणात्मकम् ॥ २१ ॥ विक्षेपशक्तिर्लिंगादि ब्रह्माण्डं सृजतीति च ॥ शक्त्या- वरणया राजन् जीवाज्ञानं प्रकीर्तितम् ॥ २२ ॥ स ईशो यद्वशे माया स ईशो यस्तयार्दितः ॥ कोऽहं सोऽहमिति भ्रान्तो मुधा दीनो मुधामतिः ॥ २३ ॥ आत्मैव नेह नानास्ति मोहितस्यैव तज्जगत् ॥ भाति नान्यस्य भो राजन् स्वप्नो निद्रानुगो यथा ॥ २४ ॥ मनोरथकृता यद्वन्मनोरथपरंपरा ॥ असदेव सदा भाति नानाविषयगोचरा ॥ २५ ॥ वेत्स्यामि तदहं तत्वं कथमित्यत्र कथ्यते ॥ यस्मिन्यस्यान्यथाज्ञानं

बोधायोच्यते । स्वरूपज्ञाने दृष्ट्या न किंचिदस्ति मूढश्चेत्पश्यति । सोऽपि सद्गुरुप्रसादादवाक् पश्यः ततो न द्रक्ष्यतीति ॥ १७ ॥ सत्यमबाधितस्वरूपम् । ज्ञानं अजडस्वरूपम् । अनन्तं देशाद्यवाच्छिन्नम् । चित् चैतन्यरूपम् । अद्वैं जाताद्विलक्षणम् । तम अविद्यातः । परं आनंदः अपक्षयशून्यम् । अखण्डं विभागशून्यम् । एकं सजातिरहितम् ॥ १८ ॥ वस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोहाद्भवति वस्तुनि ॥ २६ ॥ तन्निरासं विना तत्वं न वेत्ति च कथंचन ॥ शुक्तौ रौप्यधियः प्रो॥ निर्णयोऽस्य विवेकिभिः ॥ २७ ॥ रौप्यं न वेति संदेहं परामृश्य विलोकनात् ॥ भ्रमे नष्टे यथा वस्तु शुक्तिरेवावशिष्यते ॥ २८ ॥ तथा चौरधियः स्थाणौ स्रजि सर्पमतेरपि ॥ निरसो यत्नतः प्रोक्तो भ्रमस्यैव न चेतरत् ॥ २९ ॥ भ्रमापनुत्तये सर्वं यागयोगादिकं विभो ॥ साधनं वस्तुसिद्ध्यर्थं नापेक्ष्यं किंचिदस्ति हि ॥ ३० ॥ एतदर्थं हि कर्तव्यं नित्यं कर्मविशुद्धये ॥ तच्चेश्वरे समर्प्य स्याद्भक्त्या तत् प्रवणं मनः ॥ ३१ ॥ कृत्वा भजेत तं प्रेम्णा शुद्धचित्तो भवेज्जनः ॥ गुर्वनुग्रहमात्रेण विचारः संप्रवर्तते ॥ ३२ ॥ विचारेण परं तत्वं स्वयमेव प्रकाशते ॥ तत्वमस्यादिवाक्यार्थमुपदिष्टं दयालुना ॥ ३३ ॥ सम्यगालोचनं षड्भिर्लिंगैस्तदवधारणम् ॥ श्रवणं तच्च विज्ञेयं तत्समासेन मे शृणु ॥ ३४ ॥ लिंगानि श्रवणस्यास्य वर्णयाम्यनुपूर्वशः ॥ उपक्रमोपसंहारावभ्यासो पूर्वताफलम् ॥ ३५ ॥ अर्थवादोपपत्ती च लिंगतात्पर्यनिर्णये ॥ आदावन्ते च शास्त्रार्थमारभ्याक्षिप्यते तथा ॥ ३६ ॥ उपक्रमोपसंहारावेकं तल्लिंगमुच्यते ॥ पौनःपुन्येन यन्मध्ये स एवार्थोऽभिधीयते ॥ ३७ ॥ अभ्यासोऽयमिति प्रोक्तं द्वितीयं लिंगमागमैः ॥ तेने-

वार्थः सुविज्ञेयः शास्त्रेणायं न चान्यथा ॥ ३८ ॥ अपूर्वतेति सा युक्ता लिंगमत्र तृतीयकम् ॥ प्रयोजनं तु विज्ञेयमज्ञानध्वान्तनाशनम् ॥ ३९ ॥ शास्त्रस्यास्य फलं नात्र चतुर्थं लिंगमुच्यते ॥ उक्तार्थस्य च दार्ढ्यार्थमर्थवादः प्रशंसनम् ॥ ४० ॥ बहुशः श्रूयते तच्च लिंगमुक्तं तु पंचमम् ॥ श्रूयतेऽत्र च यस्तर्कः शास्त्रार्थस्य विनिश्चितौ ॥ ४१ ॥ षष्ठं लिंगमिति प्रोक्तमुपपत्त्यात्मकं बुधैः ॥ तत्वमस्यादिवाक्यार्थविचारेणैव ब्रह्मता ॥ ४२ ॥ तत्पदेन परं ब्रह्म त्वंपदेन च पूरुषम् ॥ अनुद्यैक्यं तयोर्वाक्यं बोधयेदसिना ध्रुवम् ॥ ४३ ॥ परोक्षं तदिति प्रोक्तं त्वं च सन्निहितं भवेत् ॥ त्वमुद्दिश्य तदित्येतद्विधानं श्रुतिरब्रवीत् ॥ ४४ ॥ संसारिणस्त्वदर्थस्य तदर्थत्वं कथं भवेत् ॥ तत्रेदं शृणु वक्ष्यामि यथा स्यात्सुकरं तव ॥ ४५ ॥ देवदत्तः क्वचिद्दृष्टः स च देशान्तरे पुनः ॥ वार्धकं जरसं प्राप्तः सोऽयमित्येव धार्यते ॥ ४६ ॥ पूर्वदेश तथावस्थां विहायेदं च वार्धकम् ॥ देशं वापि यथैकेन पिण्डेनैक्यं प्रतीयते ॥ ४७ ॥ तथांशद्वयमत्रापि वाक्ये ज्ञेयं विचक्षणैः ॥ त्वंपदस्य च वाच्यांशः संसारीति विनिश्चितः ॥ ४८ ॥ कर्ता भोक्ता सुखी दुःखी माययेत्यभिधीयते ॥ वस्तुतः सच्चिदानंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपो गुणगोचरः ॥ ४९ ॥ एकोंऽशस्तत्र चैतन्यमन्यः संसारितास्य या ॥ तत्पदस्य च वाच्यार्थः स॥
परमेश्वरः ॥ ५० ॥ चिद्रूपत्वं च तस्यांशः सर्वज्ञत्वादि चापरः ॥ द्वितीयांशं प॥ यज्य तयोर्जीवेशयोरा
॥ ५१ ॥ चिदंशा लक्ष्य इत्युक्तः पदयोरुभयोरपि ॥ तेनैक्यं तु तयोर्ज्ञेयं व॥ज्ञाल्पज्ञयोरापि ॥ ५२ ॥
वाक्यार्थोऽयं मुनिष्पन्नो भागलक्षणया खलु ॥ ब्रह्मत्वमेव चिद्रूपं नास्ति भेदः कथंचन ॥ ५३ ॥ विशेष्यं
त्वंपदं तस्य तत्पदं स्याद्विशेषणम् ॥ निरस्यतेऽस्य दुःखित्वं तद्रूपत्वं विधीयते ॥ ५४ ॥ वैपरीत्येन
विज्ञेयं विशेष्यं तत्पदं महत् ॥ विशेषणं त्वंपदं स्यात्पारोक्षस्य निरासकृत् ॥ ५५ ॥ तद्ब्रूह परमं शुद्धं
त्वमात्मैव निरामयः ॥ एवमैक्यं सुविज्ञेयं श्रुत्युक्तं गुर्वनुग्रहात् ॥ ५६ ॥ ब्रह्मैव सन् ब्रह्माप्येति श्रुतिरेषा
तु सार्थका ॥ सोहमात्मा परं ब्रह्म ब्रह्मैवाहं परात्परम् ॥ ५७ ॥ इति विज्ञाय मुक्तो वै भवति क्षणमात्रतः॥
इति दत्तवचः श्रुत्वा कार्तवीर्योऽभवत्सुखी ॥ ५८ ॥ भवन्तो ब्राह्मणा श्रेष्ठा गतिमिष्टां गमिष्यथ ॥ सूत
उवाच ॥ व्यंकटेशं रेणुकां च नमस्कृत्य द्विजोत्तमाः ॥ ५९ ॥ देवालयग्रामभवां यात्रां कृत्वा गताः
स्थलम् ॥ अस्याध्यायस्य श्रवणाज्ज्ञानप्राप्तिर्भविष्यति ॥ ६० ॥ तस्माच्छ्रोतव्यमेवेदं चरितं पापनाश-

नम् ॥ इति श्रीदेवालयग्रममाहात्म्ये ज्ञानोपदेशो नाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ सूत
उवाच ॥ इति श्रीव्यंकटेशस्य माहात्म्यमुपवर्णितम् ॥ देवालयपुरस्थस्य सदा वै सुखदस्य च ॥ १ ॥
श्रवणात्पापहानिः स्यादतुलं सौख्यमाप्नुयात् ॥ नवरात्रेऽस्य पाठाद्वा श्रवणाद्वा हरेः प्रियः ॥ २ ॥ कार्तिके
मार्गशीर्षे वा श्रवणं संततिप्रदम् ॥ पुस्तकं वाचकं चैव समभ्यर्चारभेत्कथाम् ॥ ३ ॥ एकचित्तो भक्तिपरः
श्रवणेच्छुर्जितेंद्रियः ॥ हविष्याशी नित्यपूजां कुर्वन् स भलभागिह ॥ ४ ॥ वक्ता तु शुद्धचित्तेन कथां
कथयतु द्विजः ॥ श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥ ५ ॥ समाप्तौ पूजनं कार्यं वक्तृपुस्तकयो-
रपि ॥ वस्त्रैराभरणैर्दिव्यैर्धनधान्यैस्तथैव च ॥ ६ ॥ वाचके तु सुसंतुष्टे तुष्टाः स्युः सर्वदेवताः ॥ पुरैक-
चक्रानगरे वाचको तुष्टमानसः ॥ ७ ॥ श्रोतृभिः पूजितो नैव तेषां तस्य च शत्रुता ॥ तेन पापेन वक्ताभू-
द्बकनामा स राक्षसः ॥ ८ ॥ श्रोतारस्तत्र नगरे जन्म प्राप्य मृतिं ययुः ॥ बकासुरादतः पूज्यो वाचकः
श्रोतृभिर्नरैः ॥ ९ ॥ यदृच्छालाभसंतुष्टो वाचको भवतु ध्रुवम् ॥ एवं शृण्वन् पठन् भक्त्या दुःखसंघा-
त्स मुच्यते ॥१०॥ इषाद्यदिनमारभ्य दशम्यन्तं पठेत्सुधीः ॥ पुत्रान्पौत्रान्धनं धान्यं पशून् सौख्यं सदाप्नु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यात् ॥ ११ ॥ प्रथमाध्यायषट्कस्य श्रवणाद्विघ्ननाशनम् ॥ श्लोकं श्लोकार्धमथवा शृणोति सुखभागिह ॥१२॥ भो भो शौनक देवेन दत्ता बुद्धिर्यथा मम ॥ तथा कथितमाख्यानं संपूर्णवर्णनेऽक्षमः ॥ १३ ॥ कोऽपि नास्त्येव ब्रह्माण्डे मया किं वर्ण्यतेऽनघाः ॥ अनन्तस्यानन्तमिदं चरितं पापनाशकम् ॥ १४ ॥ इतीव वक्ति देवेशो व्यंकटेशो दयाघनः ॥ कृपां करोति सर्वत्र भार्याभ्यां सहितोऽनुगैः ॥ १५ ॥ नमस्तस्मै सुरेशाय व्यंकटेशाय धीमते ॥ देवालयपुरस्थाय रमेशाय नमो नमः ॥ १६ ॥ अहं गच्छामि तं द्रष्टुमित्युक्त्वानम्य निर्गतः ॥ शौनकाद्या ऋषिगणास्ते सर्वे तत्र वै गताः ॥ १७ ॥ नमस्कृत्य प्रपूज्याथ तीर्थयात्रां प्रचक्रिरे ॥ तत्रैव न्यवसन्सर्वे स्वानि तीर्थानि चक्रिरे ॥ १८ ॥ वेदनद्यां पुरोक्तानि सर्वपापहराणि च ॥ सौतितीर्थं प्लक्षवृक्षात्सन्मुखं परतीरजम् ॥ १९ ॥ माहात्म्यं पूर्णतां यातं साधवस्तोषमाप्नुवन् ॥ कृपया परमेशस्य तं वन्दे श्रीशमच्युत्तम् ॥ २० ॥ भो व्यंकटेश देवेश विघ्ननाश नमोऽस्तु ते ॥ प्रपन्नं पाहि गोविंद पतितं दीनवत्सल ॥ २१ ॥ इति श्रीदेवालयग्राममाहात्म्ये फलश्रुतिवर्णनं नाम एकषष्टितमोऽध्यायः ॥ ६१ ॥

इति श्रीदेवालयग्राममाहात्म्यं संपूर्णम् ।

ॐ श्रीगजाननार्पणमस्तु ॥ शके १८२७ आश्विनशुद्ध चतुर्थी सोमवार देऊळगावीं हें पुस्तक पूर्ण झालें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.08.19 15:15
,TRANSFERRED=2019/08/02 at 15:50:10
,PAGES=136
,TYPE=STD
,NAME=S0001256
,Book Name=M-38-DEVALYGRAMMHATMY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection